GOVERNMENT OF INDIA


DEPARTMENT OF ARCHAEOLOGY


CENTRAL ARCHÆOLOGICAL LIBRARY

Call No. 891.05/A.K.D.M.

Acc. No. 32016

D.G.A. 79.
GIPN—S4—2D. G. Arch. N. D./57.—25-9-58—1,00,000.


OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regd. No
INDIA



A494
50


Abhandlungen

für die

Kunde des Morgenlandes.



(197)



Abhandlungen

für die

Kunde des Morgenlandes

herausgegeben von der


Deutschen Morgenländischen Gesellschaft

unter der verantwortlichen Redaction

des Prof. Dr. **E. Windisch.**



32016



891.05
A.K.D.M.

Zehnter Band.

Leipzig 1897

in Commission bei F. A. Brockhaus.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 32016
Date 17. 7. 57
Call No. 891.05/A.K.D.M.

Inhalt.



OFFICE OF THE DIRECTOR GENERAL OF ARCHÆOLOGY
Library Reg. No
INDIA

DIE ÇUKASAPTATI.

Abhandlungen

für die

Kunde des Morgenlandes

herausgegeben von der

Deutschen Morgenländischen Gesellschaft.

X. Band.

No. 1.

DIE
ÇUKASAPTATI.

TEXTUS SIMPLICIOR.


HERAUSGEGEBEN

VON

RICHARD SCHMIDT.

Leipzig 1893

in Commission bei F. A. Brockhaus.




MEINEM HOCHVEREHRTEN LEHRER

HERRN

PROFESSOR DR. RICHARD PISCHEL

DANKBAR ZUGEEIGNET.



Meiner Ausgabe der Çukasaptati[1]) brauche ich nur wenige Worte zum Geleite mitzugeben. Was über das mir zu Gebote stehende Material zu sagen war, habe ich in der Einleitung zu meiner Doctorarbeit: „Vier Erzählungen aus der Çukasaptati", Kiel 1890, p. 2ff. angegeben. Hinzugekommen sind:

1) C_1, eine Abschrift von C[2]) in Bangālī, fast genau mit C übereinstimmend, auf Papier geschrieben und 119 Seiten umfassend. Ich verdanke dies MS. der Güte des Herrn Prof. Aufrecht. cf. l. c. p. 52.

2) M_1, eine mit M ziemlich genau übereinstimmende Marāṭhī-Uebersetzung. Der Titel lautet: शुकबाहात्तरी मुकाम इंदूर येथें । महाराज होळकर साहेब बहादुर यांचें छापखान्यांत छापिली असे ॥ सन १८४९ शके १७७१ ॥ 108 Seiten; ebenso wie M am Anfange mit einem Holzschnitte, der Prabhāvatī vor dem Papagei auf einem Ruhebette sitzend darstellt.

3) H, eine mit MM_1 durchaus übereinstimmende Hindūstānī-Uebersetzung mit Abbildungen. 214 Seiten. Der Titel lautet: श्री शुकबहोत्तरी चित्रसह हिंदुस्थानीभाषमें सूबलोकोंकेवास्ते मुंबई-मध्ये बापूसदाशिवशेटके छापाखानमें छा॰ संवत् १९३४ सन १८७७ ॥ Dieses Buch verdanke ich ebenso wie M_1 Herrn Oberbibliothekar Dr. Rost.

Ausserdem erhielt ich durch die Bemühungen des letztgenannten Herrn noch ein MS. für den textus ornatior; darüber in der Ausgabe desselben, die ich vorbereite.

---

1) Die (deutsche) Uebersetzung ist im Druck und wird bald erscheinen. In derselben werde ich Versehen oder schwierige Stellen des Textes zu verbessern bezw. erklären suchen.

2) Wenn ich pag. 2 der Dissertation sage, dass ich nur A, C und B selbst collationirt habe, so ist unter C das Tawney'sche Exemplar, nicht das von Rājendralālamitra beschriebene Originalmanuscript, zu verstehen, was ich hiermit, um Irrthümern zu begegnen, ausdrücklich bemerke.

Ob unter den MSS., die Angelo de Gubernatis aus Indien mitgebracht hat [1]), sich solche der Çukasaptati befinden, habe ich nicht erfahren können.

Im Folgenden gebe ich eine vergleichende Zusammenstellung der einzelnen Erzählungen, wobei Ç die vorliegende Ausgabe der Çukasaptati bedeutet.

A. Textus simplicior.

Ç	CC_1	L	O	P	A	MM_1H	G
1	1	1	1			1	1
2	2	2	2		2	2	2
3	3	3	3		3	3	3
4	4	4	4		4	4	4
5	5	5	5		5	5	5
6	6	6	6	6	6	6	6
7	8	7	7	7	7	7	7
8	9	8	8	8	8	8	8
9	10	9	9	9	9	9	9
10	11	10	10	10	10	10	10
11	12	11	11	11	11	11	11
12	13	12	12	12	12	12	12
13	14	15	15		15	13	13
14	15	16	16	13	16	14	14
15	16	17	17	14	17	15	15
16	17	18	18	15	18	16	16
17	18	19	19	16	19	17	17
18		20	20	17	20	18	18
19	19	21	21	18	21	19	19
20	20	22	22	19	22	20	20
21	21	23	23	20	23	21	21
22	22	24	24	21	24	22	22
23	23	25	25	22	25	23	23
24	24	26	26	23	26	24	24
25	25	27	27	24	27	25	25
26	26	28	28	25	28	26	26
27	27	29	29	26	29	27	27
28		30	30	27	30	28	28

Ç	CC_1	L	O	P	A	MM_1H	G
29	C 28, C_1 29	31	31	28	31	29	29
30	C 29, C_1 30	32	32	29	32	30	30
31	C 30, C_1 31	33	33	30	33	31	31
32	31	34	34	31	34	32	32
33	32	35	35	32	35	33	(33)[2]
34	33	36	36	33	36	34	34
35	34	37	37	34	37	35	35
36	35	38	38	35	38	36	36
37	36	39	39	36	39	37	
38	37	40	40	37	40	38	37
39	38	41	41	38	41	39	38
40	39	42	42		42	40	39
41	40	43	43	40	43	41	40
42	41	44	44	41	44	42	41
43	42	45	45	42	45	43	42
44	43	46	46		46	44	43
45	44	47	47		47	45	44
46	45	48	48		48	46	45
47	46				49	47	46
48	47	49	49		50	48	47
49	48	50	50		51	49	48
50	49	51	51		52	50	49
51	50	52	52			51	50
52	51	53	53			52	51
53	52	54	54				

1) cf. Bollettino delle publicazioni italiane 1886, no. 9, 15 Maggio. Aufrecht, Florentine Sanskrit Manuscripts, führt kein Ms. auf.

2) „λείπει ἐν τῷ χειρογράφῳ“.

Ç	CC_1	L	O	P	A	MM_1H	G	Ç	CC_1	L	O	P	A	MM_1H	G
54	53	55	55	52		54	52	63	62	64	64	60			
55	54	56	56	53		55	53	64	63	65	65	61		62	
56	55	57	57	54		56	54	65	64	66	66	62			
57	56	58	58	55		57	55	66	65	67	67	63		63	
58	57	59	59				57	67	66	69	69	64. 65		64	
59	58	60	60	56		58	56	68	67	13	13	66	13	65	
60	59	61	61	57		59	58	69	68	14	14	67	14	66	
61	60	62	62	58		60	59	Schluss							
62	61	63	63	59		61	60								

B. Textus ornatior (T) verglichen mit textus simplicior (t).

t	T	t	T	t	T	t	T	t	T	t	T	t	T	t	T
1	1	10	18	19	28	28	37	37	47	46	56	55		64	
2	2	11	19	20	29	29		38		47	57	56	64	65	
3	3	12	20	21	30	30	42	39	48	48	58	57		66	
4	4	13		22	33	31	40	40		49		58		67	
5	5	14	23	23	34	32	32	41	49	50	59	59		68	21
6	6	15	24	24	38	33	43	42	52	51	61	60		69	22
7	7	16	25	25	39	34	44	43	53	52	60	61		Schluss	
8	8	17	26	26	35	35	45	44	54	53		62			
9	17	18	27	27	36	36	46	45	55	54	63	63			

T	t	T	t	T	t	T	t	T	t	T	t	T	t	T	t
1	1	10		19	11	28	19	37	28	46	36	55	45	64	
2	2	11		20	12	29	20	38	24	47	37	56	46	[65]	
3	3	12		21	68	30	21	39	25	48	39	57	47	[66]	
4	4	13		22	69	31		40	31	49	41	58	48	[67]	
5	5	14		23	14	32	32	41		50		59	50	68	
6	6	15		24	15	33	22	42	30	51		60	52	69	
7	7	16		25	16	34	23	43	33	52	42	61	51		
8	8	17	9	26	17	35	26	44	34	53	43	62			
9		18	10	27	18	36	27	45	35	54	44	63	54		

Wenn die Regeln des Sandhi sehr oft in meiner Ausgabe nicht befolgt sind, so bemerke ich ausdrücklich, dass dies absichtlich geschehen ist.

So ist schliessendes *n* + anlautendes *t* beibehalten; unzählige Male ist der Hiatus stehen geblieben; fehlerhafte Formen sind über-

nommen worden, z. B. abhigaman 97,3; hanan 100,4; kuṭṭinyāgratō 133,2; pradōṣāgatāḥ 189,1; purōdhāpy ēṭad vacaḥ° 19,9 und Aehnliches. Seltene, im PW mit einem Stern bezeichnete oder noch unbekannte Worte sind: *antika* Ofen 50,4; *āūē*, cf. Marāṭhī āū (a term of courtesy in addressing or making mention of a Shúdra woman etc. Molesworth); *ārōhaṇikā* Leiter 120,13; *udgrāhaṇikā* eingetriebene Schuld 157,8; 158,3; *karṣuka* Bauer 67,7; 74,5; *kāṣṭhatakṣ* Zimmermann 147,4; *kharaḍitāḥ* bestäubt 106,5; cf. Marāṭhī kharaḍṇeṃ; *ciñciṇī* Tamarinde 169,6; 170,1; *chōṭayitvā* 103,3; *jhiṇṭa* Reisig 43,11; 44,3; cf. Marāṭhī jhīṃṭ; *aḍhaṃḍhōlayat* 50,4; Prākṛt; *talāra* Stadtwächter 104,6; 105,4,6; *daṇḍapāçika* Polizeidiener 139,12; *divākīrti* Barbier 180,9; *niyōgaka* Gebieter? 140,3; *niḥçrēṇikā* Leiter 121,1; *paṭṭaka* Kalb? 95,6,8; *paṭṭasūtra* Seide 111,4,5; *pāparddhi* Jäger 189,1; *pāraḍī* Kleid? 107,3,7; *pūgīphala* Betelnuss 174,3; *pratiprābhṛtam* Gegengeschenk 155,8; *pratisīrā* Vorhang 180,6; *prātivēçikā* 68,1 und *prātivēçmikā* Nachbarin 68,8; 69,8; *madhura* m. Melasse 78,3; *rāvaḍī* Dreck, Futter u. drgl. 111,7; *rāsabha* quidam coeundi modus 167,3; *vaṇijāraka* 62,9 cf. Marāṭhī vaṇjārī (a caste or class, or an individual of it. They are carriers of grain, salt etc. Molesworth); *vavvūla* Acacia arabica 57,3,8; *vyōma* (Masculinum!) 133,10; *çapatha* Gottesurtheil 144,4; *çambalī* Kupplerin 63,10; *çrēṣṭhiḥ* = çrēṣṭhī 65,10; *saṃdhivigrahika* 153,6; *sphēṭitāḥ* √ sphiṭ 30,6; *halē* 34,7.

Zum Schlusse bleibt mir die angenehme Pflicht, Allen, die diese Arbeit fördern halfen, auch öffentlich meinen herzlichsten Dank auszusprechen, besonders aber meinem hochverehrten Lehrer, Herrn Prof. Pischel, der mich nicht nur jederzeit mit seinem bewährten Rathe unterstützte, sondern sich auch selbstlos der Mühe unterzog, den grössten Theil der Prākṛt-Stellen zu bearbeiten. Dankbaren Sinnes gedenke ich ferner der Herren Professoren Aufrecht, Kuhn, Lanman, von Oldenburg, Pertsch und Tawney, sowie des Herrn Oberbibliothekar Dr. R. Rost: sie Alle haben in uneigennützigster Weise dazu beigetragen, dass meine Arbeit überhaupt möglich ward. Möchten sie diesen meinen Dank freundlich annehmen und gewiss sein, dass ich ihnen meine dankbare Gesinnung bewahren werde yāvaj jīvam.

Richard Schmidt.

॥ श्रीगणेशाय नमः ॥

प्रणम्य शारदां देवीं दिव्यविज्ञानशालिनीम् ।
वच्मि चेतोविनोदार्थमुदारं कीरसंमतेः ॥

अस्ति चन्द्रपुरं नाम नगरम् । तत्र विक्रमसेनो नाम राजा बभूव । तस्मिन्नगरे हरिदत्तो नाम श्रेष्ठी । तस्य भार्या शृङ्गारसुन्दरीनाम्नी । ५ तत्पुत्रो मदनविनोदनामा बभूव । तस्य पत्नी प्रभावती । सा सोमदत्तश्रेष्ठिनः कन्या । मदनविनोदस्तु अतीव विषयासक्तः कुपुत्रः पितुः शिक्षां न शृणोति । तस्य द्यूतमृगयावेश्यामद्यादिषु अतीव आसक्तिः । कुमार्गचारिणं तं कुपुत्रं दृष्ट्वा तत्पिता हरिदत्तः सपत्नीकः अतीव दुःखितः संजातः । तं हरिदत्तं कुपुत्रदुःखेन पीडितं दृष्ट्वा १० तस्य सखा त्रिविक्रमनामा द्विजः स्वगृहतो नीतिनिपुणं शुकं सारिकां च गृहीत्वा तद्गृहे गत्वा प्राह । सखे हरिदत्त एनं शुकं सपत्नीकं पुत्रवत्त्वं परिपालय । एतत्संरक्षणेन तव दुःखं दूरीभविष्यति । हरिदत्तस्तु तं शुकं गृहीत्वा पुत्राय समर्पयामास । मदनविनोदेन शय-

---

१) C_1 श्रीश्रीग° । २) C_1O शारदा । ३) L पालिनीं सर्वभूतानामादिदेव्यै नमो नमः । O कुर्वे भवाविनोदस्वमुदार कीरसप्तते । MM_1H om. प्रणम्य° । G *προσκυνήσας τὴν θεὰν Σαρασβατὴν, τὴν ἔφορον πάσης ἐπιστήμης καὶ μαθήσεως, συγγράφω ψιτταχοῦ μυθολογίας, εἰς ἡδεῖαν διατριβὴν τῶν νοημόνων ἀνθρώπων.* ४) LO चंद्रकुलं । MM_1H चंद्रकला । G *Σανδρακαλα.* M_1 विक्रमसैन्य । H विक्रम । LO om. बभूव । ५) C_1 हरिदत्तनामा श्रेष्ठिः । ६) C_1 तत्पुत्रः । ११) C_1 स्वगृहतः । Was LO betrifft, cf. Anmerkungen. १२) CC_1 हरदत्त । १३) CC_1 हरदत्तस्तु ।

नमन्दिरे स्वर्णपञ्जरस्थः स्थापितः परिपोषितश्च । अथैकदा रहसि शुको मदनं प्राह । हे सखे ।

पित्रोस्ते दुःखिनोर्दुःखात्पतत्यश्रुचयो भुवि ।
तेन पापेन ते वत्स पतनं देवशर्मवत् ॥

५ स प्राह । कथमेतत् । शुक आह । अस्ति पद्मपुरं नाम नगरम् । तत्र सत्यशर्मा ब्राह्मणः । तद्भार्या धर्मशीलानाम्नी पुत्रस्तु देवशर्मा । स च अधीतविद्यः पितृप्रच्छन्नवृत्त्या देशान्तरं गत्वा भागीरथीतीरे तपः कृतवान् । एकदा स तपस्वी गङ्गातीरे जपार्थमुपविष्टः । तस्मिन्काले कयाचित् बलाकया उड्डीयमानया तदङ्गोपरि पुरीषोत्सर्गः
१० कृतः । स च तपस्वी क्रोधाकुलितनेत्रः यावदूर्ध्वं पश्यति तावत्तत्क्रोधाग्निना भस्मीभूतां बलाकां भूमौ पतितां दृष्ट्वा [बलाकां दग्ध्वा] नारायणद्विजगृहे भिक्षार्थं ययौ । स्वभर्तृशुश्रूषापरया तत्पत्न्या कोपाभिविष्टो निर्भर्त्सितः सत्यमिहायमुक्तश्च । नाहं बलाकेव त्वत्कोपस्थानम् । स च प्रच्छन्नपातकज्ञानाद्भीतो विस्मितश्च प्रेषितश्च तया

---

३) C °श्रुचयद्भुवि । ४) CC_1 हे statt ते । L देवदर्शन । MM_1H om. पित्रोस्ते° । ५) LO om. स — अस्ति । तथा हि पंच° । C चम्पकपुरं । G *Παυσαπούρα.* M पंचपूर । M_1 चंपपुर । H चंपापुर । ६) LO सत्यधर्मा । MM_1 सप्तशर्मा । G *Σατεσσαρμάν.* LO भार्या धर्मशीलाभिधा । C_1 तत्र statt तद्भार्या । LO सुतो statt पुत्रस्तु । ७) CC_1 om. च । LO प्राप्तविद्योऽपि मातृपितृतः प्रच्छन्नवृत्त्या विद्यार्थं सिद्धिस्थानं नाम देशान्तरं गतः तीर्थे च तत्कोपात् ब्रह्मतेजसा तत्र शिंसपोपरिस्थां [Ó शिंसि°] बलाकां [O नाकां] भस्मीकृत्य नारायणद्विजगृहं भिक्षार्थं प्रविष्टः । १२) C भिक्षार्थं । CC_1 om. स्वभर्तृ° । O °परतया । LO कोपाविष्टो । १३) CC_1 सत्याख्यायमुक्तश्च । L सत्यवचया° । O सत्यवचया° । LO om. यमुक्तश्च । L बलाकावत् । O कृत्वावत् । LO om. त्वत् । १४) LO om. पातक ।

धर्मव्याधपार्श्वं वाराणसीं नगरीं ययौ । तत्र रक्ताक्तहस्तं यमप्रतिभं मांसविक्रयं विदधानं तं दृष्ट्वा दूरमन्ते स्थितः । व्याधेन स्वागतप्रश्नपूर्वकं स्वगृहं नीत्वा निजपितरौ सभक्तिकं भोजयित्वा पश्चात्तस्य भोजनं दत्तम् । तदनन्तरं स च व्याधं ज्ञानकारणं पप्रच्छ । कथं सती ज्ञानवती कथं च त्वं ज्ञानवान् । तेन व्याधेनोक्तम् । ५

निजान्वयप्रणीतं यः सम्यग्धर्मं निषेवते ।
उत्तमाधममध्येषु विकारेषु पराङ्मुखः ॥
स गृही स मुनिः साधुः स च योगी स धार्मिकः ।
पितृशुश्रूषको नित्यं जन्तुः साधारणश्च यः ॥

अहं सापि च एवं ज्ञानिनौ त्वं च निजपितरौ परित्यज्य भ्रमन्मादृशां न संभाषणार्हः । परमतिथिं मत्वा जल्पितः । एवमुक्तः स ब्राह्मणो विनयपरं व्याधं पप्रच्छ । तेनोक्तम् । १०

न पूजयन्ति ये पूज्यान्मान्यान्नो मानयन्ति ये ।

---

१) O वाणारसीं । CC_1 om. नगरीं । LO रक्ताक्तं यमप्रभं । २) L मांसं विदधानं । CC_1 om. तं । LO दृष्ट्वा अदूरसीमन्ते । स्वागतप्रश्नादि विहितं । ३) LO om. स्वगृहं नीत्वा । om. पश्चात् । परमान्नादि भोजनं । ४) CC_1 ददौ । O तस्य तदनन्तरं । LO तेन ब्राह्मणेन व्याधः संपृष्टः [O स्पष्टं] ५) CC_1 तेनोक्तं । ६) L द्विजा॰ । LO यो नित्यं । C निसेवते । ७) CLO विचारेषु । MM_1H om. निजान्वय॰ । ९) LO ॰पितृशुश्रूषकश्च सः । तेनाहं [O येनहं] पितृशुश्रूषां यावज्जीवं त्यजामि नो । MM_1H om. स गृही॰ । १०) LO अत एव मम ज्ञानमुत्पन्नमस्ति । C पितरं । C_1 पितरौ । LO परिभ्रमन् । CC_1 मादृशां वक्तव्यो न । ११) C परमतिथिर्मत्वा । L परं चातिथित्वात् । O परः चंतीथित्वात् । १२) L विनयपरस्तं पप्रछ । O विनय पप्रछ । १३) LO न पूज्यान्पूजयन्ति ये न मान्यान्मानयन्ति च । MM_1H न पूजयंति ये पूज्यं न मान्यं मानयंति ये ।

जीवन्ति निन्द्यमानास्ते मृताः स्वर्गं न यान्ति च ॥
व्याधेन बोधितस्तेन स ययौ गृहमात्मनः ।
अभवत्कीर्तिमान् लोके परतः कीर्तिभाजनम् ॥

तस्माद्वणिग्धर्मं स्वकुलोद्भवं स्मर पित्रोश्च विनयपरो भव । एवमुक्तः
५ स मदनः पितरौ नमस्कृत्य तदनुज्ञातो भार्यां चापृच्छ्य प्रवहणम-
धिरूढवान् गतो देशान्तरम् । पश्चात्तत्पत्नी कतिचिद्दिनानि शोक-
युक्ता निर्वाह्य स्वैरिणीभिः सखीभिः प्रतिबोधिता पुरुषान्तराभिला-
षुकाभवत् । यतस्ताभिरेवमुक्तम् ।

तावत्पिता तथा बन्धुर्यावज्जीवति मानवः
१० मृतो मृत इति ज्ञात्वा क्षणात्स्नेहो निवर्तते ॥

---

१) C यान्ति ये । MM₁ जीवन्मृताश्च ते ज्ञेया मृताः स्वर्गं [H स्वर्गे] न यान्त्यपि । २) O add vor व्याधेन मातापित्रोरभरक-क्रियामुद्दिगणायाकः मृतश्चैष्या प्रतियाहि न भूयः पुरुषो भवेत् १ धर्ममेवं श्रुत्वा गत्वा पित्रोरभरो भवा २ । LO °ब्राह्मणः सक्रियो गृहे । अभवत्प्रीतिशोभाढ्यो° । O °कीर्त्तिशो° । C₁ om. आत्मनः । ४) LO om. वणिग् । CC₁ धर्मं कुलोद्भवं । LO एवं प्रतिबोधितः । ५) LO तदनुज्ञातः तेन पुत्रेण किं फलं यः पितृदुःखाय [O °दुःखिः] तस्माद्गन्तव्यं [O यस्मा°] तात देशेनैव देशान्तरं । कांति कथय कथं भविष्यसि त्वं । कथं त्वां विनाहं भविष्यामि । इति भार्यां चापृच्छ्य तुरगमारूढवान् [O चाछ्या प्रवहणमा] ६) CC₁ om. गतो देशान्तरम् । MM₁H add Böhtlingk, Ind. Spr. No. 1081. ७) LO सती statt निर्वाह्य । CC₁ om. स्वैरिणीभिः । ८) L ततस् statt यतस् । ९) L om. तावत्पिता° । LO कतिपयदिनसंस्थायि यौवनं सुनितम्बिनि [O यौवनस्य नितम्बिनि] कामं कमलपत्राक्षि भुंक्ष्व भोगानहर्निशं ॥

अतस्त्वं स्वपतिमप्राप्यमाना निजशरीरस्य कतिचिद्दिनस्थायियौवनस्य पुरुषान्तररमणाद्गृहाण फलम्। ततस्तासां वचनेन पुरुषान्तरस्य गुणचन्द्रसंज्ञस्य रमणाय शृङ्गारं विधाय यावत्प्रचलिता तावत्सारिकया मा गच्छेत्यादिवचनैर्निर्भर्त्सिता। ततो यावत्सा तां सारिकां गलमोटनपूर्वं विनाशयति तावदुड्डीय ययौ। ततः चणं स्थित्वा इष्टदेवतां हृदि स्मृत्वा ताम्बूलं प्रगृह्य यावच्चलिता तावत् शुकः प्राह। सिद्धिरस्तु। क्व गन्तव्यमित्यादिवाक्यैः पृष्टा। सा च शुकवचनं शकुनमिति कृत्वा प्रहस्य तमाह। हे शुकराज नरान्तरास्वादं विज्ञातुं प्रचलितास्मि। शुक उवाच। युक्तमिदं कर्तव्यमेव परं दुष्करं निन्दितं च कुलस्त्रीणाम्। किं च। तदा गम्यतां यदि विपरीते समायाते सति तव बुद्धिरस्ति। यदि नास्ति तदा पराभवपदं भविष्यसि।

१) LO om. अतस्त्वं। CC_1 om. स्वपति॰। LO स्व॰ पुरुषान्तरं भजस्व यतः चणभंगि यौवनं। इत्यादि प्रतिबोध्य पुरुषान्तरं गुणचन्द्रसंज्ञं रमणाय स्वागारं विहाय यावच्चलति तावत्सारिकावदत् [O statt रमणाय॰ — रमाण पुरुषान्तरं भजव यतः चणभंगि यौवनं इत्यादि प्रतिवाध्य पुरुषान्तरगुणचन्द्रसंज्ञं रमणाय शृङ्गारं॰] २) CC_1 गुणचन्द्रसुतस्य। ४) CC_1 मा गा इत्यादि। om. ततो। LO ततस्तया सा गल॰ विनाशिता। ५) LO om. तावदुड्डीय ययौ। CC_1 om. गल॰। शुकस्तावदुड्डीय। om. ततः। इष्टदेवतां। ६) CC_1 om. हृदि। LO ताम्बूलादि। O चलति। ७) LO सिद्धिरस्तु शिवाः सन्तु पन्थानः। CC_1 वाक्यं। om. पृष्टा। LO शकुनमिव ज्ञात्वा हृष्टा [O add सा च शुकवचनं शकुनमिति कृत्वा दृष्टा] शुकं प्राह। ८) CC_1 om. हे। शुकं। CC_1 ज्ञातुं प्रचलिता। L जनान्तरा॰। ९) LO चलितास्मि। CC_1 शुकः। om. उवाच। LO परं यद्दुःकरं पतति तन्निन्दितं। १०) CC_1LO om. च। LO om. किं च तदा गम्यतां। CC_1 om. यदि। विपरीते समायाते बुद्धिरस्ति यदि स्वयं परबुद्धिपरो लोकः पराभवपदं यतः॥ om. यदि — यतः। LO ततो विपरीते पाते [O om. पाते] सति बुद्धिरस्ति न वा यदि नास्ति॰।

यतः। कौतुकान्वेषिणो नित्यं दुर्जना व्यसनागमे ।
मासोपवासिनी यद्वद्वणिक्पुत्त्रकचग्रहे ॥
पप्रच्छ सा तदा सार्धं पुंश्चलीभिः कृतादरा ।
ससंभ्रमा जगादेदं किमिदं भाषितं शुक ॥
५ यदि ते कौतुकं सुभ्रु परार्थं गच्छ सुन्दरि ।
स्थिरीभूय त्वया पश्चात् श्राव्येयं महती कथा ॥

एवं शुकोक्तं श्रुत्वा यदा सा कौतुकाकुलचेतसा निजगृह आसीनास्ति तदा शुकः कथां प्राह । अस्ति चन्द्रावती पुरी । तस्यां भीमनामा नृपः । तत्र सुधनो नाम मोहनश्रेष्ठिसुतः तन्नगरवासिनो हरिदत्तस्य
१० कलत्त्रं लक्ष्मीं रन्तुमीहते । तद्वत्सा न मन्यते । ततो मासोपवासिनीं पूर्णाभिधानां गत्वा पूर्णधनावर्जितां कृत्वा हरिदत्ते नगराद्बहिर्गते तद्गृहे दूतीत्वेन प्रेषयामास । सापि चाटूक्तिभिर्लक्ष्मीं प्रसादयामास । प्रसन्नया च तयेत्युक्तम् । यत्त्वं याचसे तत्करोमि । पूर्णयोक्तम् ।

---

१) CC_1 कौतुकान्वेषणे । दुर्जनो । ४) LO ससंभ्रमं जगादाथ [O जगादाथ] किमिदं भाषितं शुक । पप्रच्छ सा तदा सार्द्धं पांशुलाभिः कृतादरा ॥ ५) C_1 शुभं statt सुभ्रु । ७) CC_1 शुकोक्तां कथां । यदा स्वसा निजगृह्यः कौतुकाकुलचेतसः तदा° । L °श्रुत्वा कौ° सा यदा आसीना निजगृहेस्तदा शुकः कथामाह । O °चेतसः सुधता यदा निजानिगृह्यः तदा° । ८) LO om. अस्ति । M_1 चंद्रवती । G *Σανδραβατη*. LO om. तस्यां । भीमो नाम राजा । MM_1 भीमक । H भीमसेन । Der Name des Königs wird nicht genannt bei G. ९) LO तत्र मो° सुधनो नाम । मोहन ist der Sohn von भीमक in MM_1H. In G ist मोहन „*υἱὸς ἐμπόρου*“, हरिदत्त wird nicht genannt. १०) LO लक्ष्मीनाम्नीं । समीहते । om. तद्व° । ११) LO पूर्णानाम्नीं । om. गत्वा । प्रचुरैर्धनमानदानैः संतोष्य [O °दानैरावर्ज्य] । CC_1O om. नगराद् । LO add सति । १२) LO om. तद्गृहे । CC_1 om. दूतीत्वेन । LO स प्रे° हरिदत्तस्य गृहे [O °दत्तगृहे] CC_1 सा । LO प्रसन्नां चक्रे । १३) LO प्र° तया चेत्युक्तम् ।

तर्हि मन्मतं नरं भज । तयोक्तम् । कुलस्त्रीणां नैतद्युज्यते परं यत्त्वाद्ये प्रतिपन्नं तत्करोमि ।

उक्तं च । छिज्जउ सीसं अह होउ बन्धणं चअउ सव्वहा लच्छी ।
पडिवणपालणे सुपुरिसाण जं होउ तं होउ ॥

तथा च । दिढलोहसिङ्खलाणं असाण वि विविहपासबन्धाणं । ५
ताणं चिअ अहिअअरो वाआबन्धो सुपुरिसस्स ॥
अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु चात्मपृष्ठे ।
अम्भोनिधिर्वहति दुःसहवाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ १०

तच्छ्रुत्वा हृष्टा पूर्णा । एवमेवैतत् । ततस्तां लक्ष्मीं प्रतिविधाय गुणमोहनार्थं प्रदोषे स्वगृहे निनाय । ततः स मोहनः कथितवेलोपरि नागतः किंचित्कार्यादिवैयग्र्येण । ततो लक्ष्म्या सकामयोक्तम् ।

---

१) CC₁ om. तर्हि । C मन्मत । L ममाभिमतं । O मम मतं । LO कुलवधूनां । CC₁ न युज्यते । L प्रतिपन्नं यत्तत्करोमि । O प्रतिपन्नत्वात्करोमि । २) CC₁ om. तवाद्ये । ३) om. MM₁H. O विज्जउ । L सीमं । CC₁ ब्रंधनं । ४) C पडिवस्सपालने सुपुरिसाणं । C₁ उडिवस्सपालने सुपुरिसाणं । L पहिंडिवलपालणे पुणराण । O पुडीवन्नपालणा नराण । LO जं होइ । ५) C दिढलोहसिंखलाणं । विविहपासवंधाणं । C₁ दिढलोहसिंखलानां विअ असान विविविहापसवन्धानं तानं विअ अहिअअरो वाआवन्धं सुपुरिसस्स ॥ LOMM₁HG om. दिढ° । ७) CC₁MM₁HG om. अद्यापि° । ८) L किल चात्मपृष्ठे । ९/१०) om. O. ११) CC₁ एवं विचार्य गुणमोहनार्थं° । O तद्दृष्ट्वा । L प्रविधाय । O प्रगुणीं विधाय । LO om. गुणमोहनार्थं । १२) LO स्वगृहं । CC₁ om. ततः । स मोहनो न प्राप्तः । om. कथित° und किंचि° । LO om. स । L मोहनः सुतः । १३) CC₁ om. ततो

यत्कमपि नरं समानय। ततः पूर्णया मूढया तत्पतिरेव समानीतः। स्वभर्तरि समायाते सा कथं भवत्विति कथं गृहं यात्विति त्वं सख्य-स्तव वा कथयन्तु। ता ऊचुः। न जानीमः। त्वमेव कथय। शुक आह। यदि न यासि तदा कथयामि। तयोक्तम्। न यास्यामि।
५ शुकः। सा आगच्छन्नेव स्वपतिरिति ज्ञात्वा तं कचग्रहं प्रगृह्यैवमु-वाच। हे शठ सर्वदा त्वमिति ममाग्रे जल्पसि यन्मे त्वां विना ना-न्या वल्लभा अस्ति। अधुना तु मया परीक्षितो ज्ञातश्चेति कोपं चक्रे। स च तां कष्टेन सुकोमलवचनैरनुनीय स्वगृहं निन्ये।

कथां श्रुत्वा शुकेनोक्तां भयविस्मयकारिणीम्।
१० पुंश्चलीवृन्दसंयुक्ता सुप्ता रात्रौ वणिक्प्रिया॥

इति शुकसप्ततौ प्रथमा कथा॥

---

१) CC_1 om. नरं। LO om. यत्। तं नरं शीघ्रं स°। CC_1 om. ततः। LO अत्याकुंठितमूढया। समानीते। २) LO सा किं करोतु किं गृहं यातु किं वान्यत्किंचित्करोत्विति विचारय भवती [O भवति] सपरिवारा तयोक्तं न जानीमः। ३) LO शुकोवाच। यदि न [O om. न] जानासि ततो विपरीते पतिते [O om. पतिते] कथं निर्वहसीति तर्हि श्रूयतां। ५) CC_1 सा आगच्छन्पति°। LO स आग° इत्यभिज्ञातः ततः कच° प्रगृह्य प्रोक्तः। CC_1 प्रगृह्यैवमुक्तः। ६) CC_1 om. हे शठ। सर्वस्वं। LO हे शठ त्वमपि ममाग्रे इति जल्पसि यत्त्वां विना ममान्या वल्लभा नास्ति। ७) CC_1 om. तु। LO परीक्षितोसि मया ज्ञा°। ८) CC_1 सोऽपि तामनुनीय स्वगृहं निन्ये। LO सुकोमल° कष्टेन स्व°। ९) CC_1 °कारिणी। LO इति कथां श्रुत्वा शुकेनोक्तां भय° पुंश्चली° [O पुंश्चलीवृतसंयुक्ता] प्रसुप्ता सा प्रभावती। MM_1H om. कथां°। ११) CC_1 इति श्रीशुकप्रोक्तद्वि-सप्ततिकथायां शुकप्रभावतीसंवादे मासोपवासिनीकथा प्रथमा समाप्ता। LO इति शुकसप्ततिग्रंथे [O शुकसत्तरी°] शुकेन्द्रप्रोक्तं प्रथमं कथानकं।

सा तथैव समं ताभिर्द्वितीये ऽह्नि निशामुखे ।
शुकमापृच्छ्य चलिता शुकस्तामिदमब्रवीत् ॥
यथेष्टं गच्छ सुश्रोणि यदि जानासि दुःकृते ।
प्रत्युत्तरं समायाते यशोदेवीव संकटे ।

ततः प्रभावती पृच्छति । का यशोदेवी । कदा कस्मिन्संकटे तया 5
क उपायः कृत इति । शुकः । यदा कथयामि तदा मयि सुरत-
विघातेन तव कोपः प्राणनिसूदनः स्यात् । सा आह । सुहृदां सा-
ध्वसाध्वपि श्रोतव्यमेव । इत्यनुज्ञातः शुक आह । अस्ति नन्दनं नाम
नगरम् । तत्र नन्दनो नाम राजा । तत्पुत्रो राजशेखरः । तद्वधूः
शशिप्रभा । तां धनसेनसुतो वीरनामा दृष्ट्वा सकामः सन् ज्वरपी- 10
डितो ऽभूत् । भोजनादि न विधत्ते । स च मात्रा यशोदेव्या पृष्टः
सन्सगद्गदं कारणमाह । सा च राजकन्या दुर्लभा । स कथं जीवतु ।
इति प्रश्नः । तयोक्तम् । त्वमेव कथय । शुकः । यदि प्रभावति अद्य
न यासि तदा कथयामि । इत्युक्ते सा आह । कथयेति । अथ शुकः ।

---

1) C_1 °र्द्वितीयाह्नि । LO द्वितीयेह्नि सा प्रभावती ताभिः सखीभिः [O add समं] शुक° । 3) L यथेच्छं । O यथेच्छं । CC_1 दुःकरे । MM_1H यथेष्टं गच्छ सुश्रोणि [H सुश्रेणि] यदि यास्यसि सुन्दरि [M सुन्दरी] । यद्युत्तरं समर्थासी यशोदेवीव संकटे ॥ 5) LO तया स पृष्टः कथां प्राह यदि कथयामि° । 6) LO सुरत° मयि । 7) CC_1 °विघाते निद्रानिसूदनः कोपो न स्यात् । LO प्राण-सूदनः । साह । साध्वसाधुमपि । 8) LO शुकः प्राह । LOC_1 om. अस्ति । LO om. नाम । 9) LO तत्र राजा नंदनो नाम । H नंदनेश्वर । CC_1 om. नाम । LO तत्सुतो । तद्वधूः शशिप्रभां ध° [O धर्मसुतो] वी° दृष्ट्वा° । 10) LO ज्वरितो । 11) LO om. स च । 12) CC_1 गद्गदं । LO राजपत्नी । CC_1 जीवति । LO जीवतु शुकेन पृष्टं । 13) CC_1 om. तयो°—कथय । LO om. शुकः । 14) C_1 ततः । CC_1 इत्युक्तवति । LO साह । CC_1 अथ किं statt कथयेति । om. अथ ।

सा यशोदेवी एकां शुनीं भोजनाद्यैरावर्जयित्वा आभरणानि परिधायात्मना सार्धं गृहीत्वा शशिप्रभापार्श्वे गत्वा तां विजने सगद्गदा जगाद । अहं च त्वं च इयं च पूर्वभवे भगिन्यो ऽभूवन् । मया निःशङ्कया त्वया तु सशङ्कया परनराभिलाषः पूरितः । अनया तु
५ नैव । अतो ऽस्याः शीलप्रभावात्केवलं जातिस्मरणमेव न भोगाः शुनिका च संजाता । संभोगविघ्नाज्जातिस्मरणं च न ते वर्तते । मम पुनर्भोगान्निर्विघ्नान्निर्विघ्नजातिस्मरणं च । अतो ऽहमनुकम्पया इमां शुनकीं त्वां च दृष्ट्वा कथयितुमागता । अतस्त्वयार्थिनां काङ्क्षितं दातव्यमेव । यो दानं कुर्यात्स भवेत्सर्वसंपदां स्थानम् ।

१० उक्तं च । कथयन्ति न याचन्ते भिक्षाहारा गृहे गृहे ।
अर्थिभ्यो दीयतां नित्यमदातुः फलमीदृशम् ॥

ततः शशिप्रभा सकण्ठग्राहं रुदित्वा प्राह । मामपि कल्याणि पुरुषान्तरेण योजय । ततो यशोदेवी तां स्वस्वीकृत्य भर्तृविदितां स्वगृहं नीत्वा स्वपुत्रेण योजयामास । स च राजशेखरो द्रव्यादिदानतोषितः
१५ सखीयमिति कृत्वा न निवारयामास ।

---

१) CC_1 om. एकां । LO शुनकों भोजनाभरणाद्यै॰ । CC_1 शान्तयित्वा । LO om. आभ॰ परिधाय । २) LO शशिप्रभायाः पार्श्वे गृहीत्वा । om. तां विजने । C_1 om. विजने । ३) L अहं त्वं इदं च । O अहं त्वं इदं । CC_1 ऽभूवं । LO सख्य आसन् । ४) LO om. तु । ५) LO ततो । C_1 ऽस्यां । LO भोगः । ६) LO om. च । जाता सविघ्ना भोगा जातिस्मरणं वर्त्तते । CC_1 om. वर्तते । LO भोगा निर्विघ्ना जातिस्मरणं च । ततो । ८) LO om. शुनकीं । L यतस् । ९) LO यो दत्ते स परभवे [O परभवेत्] om. सर्व । १०) CC_1 उक्तं च यतः । ११) L दीयते । MM_1H om. कथयन्ति॰ । १२) CC_1LO कण्ठ॰ । CC_1 रु॰ शशि॰ । LO आह । CC_1 ममापि क॰ निपुरुषान्तरे । LO मां नरान्तरेण योजय । १३) CC_1 om. ततो । O भर्त्व॰ । LO स्वगृहे । १४) L द्रिव्यापाराद्गृहागतो सखी॰ । O द्रव्यादिव्यादिदानतो सखी॰ । १५) LO न किंचिद्विचारयामास ।

राजपुत्रं राजपुत्रीं प्रतार्यैवं च भामिनि ।
यशोदेव्या महद्बुद्ध्या निजकार्यमनुष्ठितम् ॥
बुद्धिरस्ति यदीषा ते व्रज सुभ्रु परान्तिकम् ।
भज निद्रां विशालाचि मान्यथा त्वं विडम्बय ॥
इति शुककथां श्रुत्वा प्रभावती सुप्ता ॥ ५

इति शुकसप्ततौ द्वितीया कथा ॥ २ ॥

अथान्यद्दिने प्रभावती शुकं पृच्छति । शुकः ।
गच्छ देवि किमाश्चर्यं यत्र ते रमते मनः ।
नृपवद्यदि जानासि परित्राणं त्वमात्मनः ॥
प्रभावती पृच्छति । कथमेतत् । शुकः कथयति । अस्ति विशाला १०
नगरी । तत्र सुदर्शनो राजा । तत्र च विमलो नाम वणिक् ।
तस्य च पत्नीद्वयं सुभगं रूपसंपन्नं दृष्ट्वा कुटिलनामा धूर्तस्तद्भार्या-
द्वयग्रहणेच्छया अम्बिकां देवीमाराध्य विमलरूपं ययाचे । लब्ध्वा
च तत्प्रकृतिं विमले बहिर्गते तद्गृहं गत्वा प्रभुत्वं चकार । प्रसादध-
नदानैर्वशीकृतो ऽखिलो ऽपि परिजनवर्गः । तद्भार्याद्वयं बहुमानदा- १५

१) LO ततः शुकः प्राह भामिनि राजपुत्रमेवं विप्रतार्य यशो-
दया महा° । MM_1H om. राजपुत्रं° । ३) L यदीत्थं ते । O य-
दिकं दे । ४) C_1 त्व statt त्वं । MM_1H om. बुद्धिरस्ति° ।
५/६) LO इति द्वितीया कथा । ७) LO अन्यदा । CC_1 om. शुकं ।
८) O तत्र । MM_1 गच्छ तत्राद्य [M_1 द्य] शीघ्र त्वं । H गच्छ
देव्यद्य । ९) O किमात्मनः । १०) LO om. प्रभावती — कथयति ।
L शाला । M शिला । M_1H विशाल । ११) LO पुरी । om. तत्र ।
H सुंदरसेन । CC_1LO om. च । L विमलनामा । १२) LO om.
सुभगं । तं दृष्ट्वा । Der Name des धूर्त fehlt in MM_1HG. CC_1
कुटिलो धू° । १३) CC_1 अम्बिका । तल्लब्ध्वा च । १४) LO add
सति । तद्गृहे । १५) LO निखिलो । CC_1 परिजनः । CC_1 दाना-
दिना परद्रव्येण ।

नादिना संतोष्य स्वेच्छया भुङ्क्ते। विमलो ऽयं धनाद्यनित्यतां श्रुत्वा दाता बभूवेति परिजनो ऽनवरतं चिन्तयति। अथ सत्यविमलो ऽपि द्वारमागतः कुटिलाज्ञया द्वारपालेन निषिद्धः। ततो बहिःस्थः फूत्करोति। वञ्चितो ऽहं धूर्तराजेन। तस्य चैवं क्रन्दतो गोचरा जनाः
५ कौतुकाच्च मिलिताः। तत्क्षणात् हट्टानि मुक्त्वा वणिक्सार्थौ मिलित्वा आरक्षिकमन्त्रिमुख्यानां पुरतः फूच्चक्रे। राजन्वञ्चितो ऽस्मि धूर्तराजेन। ततो राज्ञा तदवलोकनाय प्रहिताः पुरुषाः। तेनापि ते द्रव्यादिदानेन सानुकूलाः कृताः। तं धनदायकं गृहे दृष्ट्वा जनो वदति। स्वामिन्विमलो गृहे विद्यते। अयं च धूर्तराट् द्वारस्थः। ततो नृपेण
१० द्वावप्येकत्र कृतौ। ततो द्वयोर्मध्यान्न को ऽपि धूर्तेतरयोर्व्यक्तिं जानाति। जातः कोलाहलो ऽखिललोकव्यवहारनाशकरः राज्ञश्चापवादः। यतो राज्ञां दुष्टनिग्रहः शिष्टपालनं च स्वर्गाय।

उक्तं च।　　प्रजापीडनसंतापात्समुद्भूतो हुताशनः।

---

१) LO परितोष्य। यथेच्छं स्वेच्छया विलसति। CC_1 दानादिकमनित्यतां श्रुत्वा। L दाता किमनित्यतामस्य बभूवेति। O nur दाता बभूवेति　२) O om. ऽनवरतं। L नित्यं। CC_1 अथास्य विमलो। LO तावता सत्यविमलो।　३) LO om. ततो। L क्रंदनं करोति। O पूत्करोति।　४) CC_1 गोचया। L गोचजो जनो [O गोचज्ञो] मिलितः।　५) LO हट्टान्निर्मुक्तो।　६) CC_1 आरक्षिम°। L आरचम°। O आरचरम°। L पुरो विज्ञप्तिं चकार। O पुरः पूत् चक्रे। LO वंचिता धू°।　७) CC_1 राजा। LO om. तद्। CC_1 प्रहितो लोकस्। LO तेन ते। CC_1 तेनापि सर्वो ऽपि जनः परद्रव्यदानेन सानुकूलो विदधे।　८) LO सत्कृताः।　९) LO om. नृपेण।　१०) LO om. ततो। कोपि तयोर्मध्ये धू° न जानाति। ११) LO को° जातो निखिल°। CC_1 °नाशकः।　१२) CC_1 यतो राज्ञः दुष्टनिग्रहशिष्टपरिपालने निश्चयः कुरुते।　१३) MM_1H °संतापसमु°।

राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते ॥
ततो राजा एकान्ते तयोर्निर्णयमचिन्तयत् । तत्कथय कथं निश्चयः
स्यादिति प्रश्नः । शुकः । स राजा लब्धोपायस्तद्विमलभार्याद्वयं पृथ-
क्पृथक्संस्थाप्य पृष्टवान् । किं युवयोः पाणिग्रहणे भर्त्रा विभूषणं प्रदत्तं
धनं च । पश्चात्किं जल्पितं प्रथमसङ्गे च का वार्त्ता भर्त्रा सहाभूत् । ५
का माता कश्च पिता । किं कुलम् । का जातिः । इत्येवं पृष्टाभ्यां
यथालब्धं यथावृत्तं यथाप्रोक्तं यथासुप्तं सर्वं ताभ्यां कथितम् । पश्चात्तु
तौ पुरुषौ पृष्टौ परस्परं विसंवदन्तौ । ततो भार्याद्वयस्य रुक्मिणी-
सुन्दरीनामधेयस्य यः संवादं वदति स सत्यः । इतरस्तु धूर्तो राज्ञा
निर्वासितः । सत्यस्तु राज्ञा सभार्यः सत्कृतः स्वगृहं गतः । इति महा- १०
राजबुद्धिः । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्तती तृतीया कथा ॥ ३ ॥

---

१) MM_1 राज्ञां । MM_1H प्राणान्दग्ध्वेव वि° । LOG om. प्रजा° । A schaltet folgende zwei Verse ein vor प्रजा°: प्रजानां रक्षणं सम्यक् दुष्टानां निग्रहः सदा । एष राज्ञः परो धर्मो परत्रेह च शर्मणे ॥ प्रजाणां रक्षणं सम्यक् राज्ञः स्वर्गस्य कारणं । अरक्षित् नरकं याति तस्माद्रक्षा सदा प्रजा ॥ २) CC_1 om. तयोर् । C_1 निर्णयं चिंतयत् । LO व्यचिंतयत् । ततः für तत्कथय । ३) O om. स्याद् । L वितो राजा । O om. ततो राजा — भर्त्रा । L om. लब्धो° । वि-मलस्य भार्या° । ४) CC_1 अवस्थाप्य । पृष्टं । LO किं भूषणं [O विभूषणं] दत्तं । ५) O om. च । LO पूर्वसंगे । L om. च । LO का का । सह संजाता । ६) LO कः पिता । CC_1 add कश्च पतिः । LO om. इति । ७) LO यथोक्तं । om. यथासुप्तं । CC_1 add तथाकृतं । LO सर्वमावेदितं । om. तु । ८) LO परस्परं पृष्टौ । CC_1 संवदतः । L विसंवदतः । O °वदता । Die Namen der Frauen fehlen in MM_1HG. ९) C_1 संवादो । C_1 संवाद् । LO संवदति । O om. स सत्यः । LO धूर्त्तः धूर्त्तो । १०) CC_1 इतरस्तु für सत्यस्तु । CC_1 सभार्थः सत्कृतः ततो राजा बुद्धिमान् कथां श्रुत्वा शुकेनोक्तामित्यादि । O om. इति । १२) LO om. इति° । C om. शुकसप्तती । C_1 om. इति शु° ।

अथान्यदा प्रभावती शुकं पृच्छति । शुकः । मां हतावज्ञं हत्वा मा गच्छ । यतो बालकादपि हितं वाक्यं ग्राह्यम् ।

हतावज्ञः पुरा देवि वृद्धवाक्यपराङ्मुखः ।
पतितो ब्राह्मणो ऽनर्थे विषकन्याविवाहने ॥

५ प्रभावती पृच्छति । कथमेतत् । शुकः । अस्ति सोमप्रभं नाम द्विजस्थानम् । तत्र विद्वान्धार्मिकः सोमशर्मा नाम विप्रः । तत्पुत्री रूपौदार्यगुणोपेता विषकन्येति विख्याताभूत् । तेन तां भयेन को ऽपि न विवाहयति । ततः सोमशर्मा वरार्थं भुवं पर्यटन्संप्राप्तो द्विजस्थानं जनस्थानं नाम । तत्र गोविन्दनामा ब्राह्मणो जडो निर्धनश्च । तस्मै
१० कन्या प्रदत्ता । तेन सुहृदां निवारयतामपि हतावज्ञेनोढा सर्वरूपलावण्यगुणोपेता मोहिनी विषकन्या । सा विदग्धा गोविन्दस्तु मूर्खः लघुवयाश्च । ततश्च सा आत्मनो रूपलावण्ययौवनं शुशोच ।

अविदग्धः पतिः स्त्रीणां प्रौढाणां नायको गुणी ।
गुणिनां त्यागिनां लोको विभवश्चेति दुःखकृत् ॥

---

१) CC_1 अन्यदा । om. हत्वा । C मे ऽवज्ञां मा कुरु in margine. LO om. मां — यतो । ४) O °विवाहिते । M पतितो ब्राह्मणः कृच्छ्रे । M_1 कृस्ने । H कृत्स्ने । ५) CC_1 om. प्रभावती पृच्छति । om. शुकः und अस्ति । LO om. प्रभावती — अस्ति । L सोमभानधि द्विजस्थाने । O सोमप्रभाभिधे । ६) CC_1 विद्वान्ब्राह्मणो धार्म्मिकः । CC_1 om. तत्पुत्री — ततः । ७) O om. न । ८) CC_1LO om. ततः । CC_1 सोमशर्म्मा भुवं पर्य्यटन् वरार्थं संप्राप्तो द्विजस्थानं नाम । LO सोमशर्मा वरार्थं [O add भुवं] पर्यटन् संप्राप्तो° । ९) L गोविन्दो नाम । O om. नाम । LO ब्राह्मणः जडो° १०) LO सा विषकन्या । ११) CC_1 विप्रो मूर्खः लघुवयश्च । १२) C_1 °यौवनो । LO ततः सा [O सन्] निजरूपलावण्ययौवनानि [O °नादिकं] यतः [O यतश्च] १३) CC_1 पति । O om. नायको गुणी । १४) C_1O गुणीनां । LAMM_1HG om. अविदग्धः° ।

पाउससमअपवासो जोव्वणद्दिअहि तहा अ दालिद्दं ।
पढमसिणेहविओओ तिण्णि वि गरूआइ दुक्खाइं ॥
अप्पत्थावे पढिअं कण्ठविहूणं च गाइअं गीअं ।
मा मा भणन्तिसुरअं तिण्णि वि गरूआइ दुक्खाइं ॥

सान्यदा गोविन्दं पतिमित्यब्रवीत्। मम पितुर्गेहात्समागताया बहूनि ५ दिनानि संजातानि । ततो ऽहं त्वयैव सह गमिष्ये नान्यथा । ततः शकटं मार्गयित्वा सभार्यकः स चलितः । यावत्प्रयाति तावत्पथि

१) CC_1MM_1H om. पाउस° ॥ A पाउससमये पवासो जोवण-दियहे य जुज दालिद्दं । L पाउससमयपवासो जव्वणसमये वजघ दालिद्दं । O थांउससमयपुवोसो ज्जवाणसमये जं च दालिद्रं । २) A पहमसणेद्दिवियोगो तिह्णि वि गरूआइं दुःखाइं । L तिन्नि पढमसिणेहविडगो तिन्नि वि गुरूआइं दुरकाइं । O पढमसणेहवित्तंगो तिखि वि गिरूआंइ दुरकांयी । ३) CC_1MM_1H om. अप्पत्थावे° । A अपक्कावेपढयं कंठविहूणं च गेययं गायं । L अप्पवे पढियं कंठ° गाइयं हीयं । O अप्पक्कावे पढीयं कंठविहूणं च मायं गोयं । ४) A मा मा भणंतसुरयं तिन्नि वि दुःखाइं गरूआइं । L मा मा भणियंतसुरयं तिन्नि वि गुरूयाइं दुरकारं । O मे मा भणीयं सुरथं विन्निलोपणायदाः लिर्ष्यंति । LO stellen die beiden Prākṛt-Verse um und schalten Folgendes vor denselben ein: L दालिद्दं तिन्नि वि गुरूआइं दुरकाइं । O अन्निअहिपईपोढगणाणसामीडंमुरिकाचयिणय-हालिदं तिन्नि वि गिरूआइं दुरकायीं । ५) CC_1 सा कदाचित् सर्वगुणोपेता सर्वोत्सववर्हिःकृता निर्धनं तं महामूर्खं गोविन्दं पति-मब्रवीत् । LO यच्मम । L पितुर्गृहात्त्वया नीता ततो ऽहं त्वयैव सह गमिष्ये । O °गृहागताया बह्वनो° । ६) CC_1 ततः शकटं मा° चलतः यावत्सभार्य्यकः प्रयाति । LO ततः सभार्यः स चलितः यावत्पथि प्रयाति । तावद्देको ।

एको युवा वाग्मी सुरूपः शूरश्च विष्णुनामा ब्राह्मणो मिलितः ।
तस्य ब्राह्मणस्य तस्याश्चान्योन्यमनुरागः संजातः ।
उक्तं च । प्रीतिः स्याद्दर्शनाद्यैः प्रथममथ मनःसङ्गसंकल्पभावो
निद्राच्छेदस्तनुत्वं वपुषि कलुषता चेन्द्रियाणां निवृत्तिः ।
५ ह्रीनाशोन्मादमूर्च्छामरणमिति जगद्यात्यवस्था दशैताः
लप्रैर्यत्पुष्पबाणैः स जयति मदनः संनिरस्तान्यधन्वी ॥
स पथिको दम्पत्योः पूगपत्त्रोच्चयं ददाति । इत्येवं ग्राम्यब्राह्मणो वि-
ष्णोर्विश्वस्तः आत्मनो निरोधसङ्गभयादुत्तीर्य(?) तं गन्त्रीवाहमारोह-
यति । विष्णुना च पत्नी वृक्षान्तरगते सा मोहिनी भुक्ता आत्मवशीकृता ।
१० तया चात्मीयं नाम गोत्रं कुलक्रमं चाज्ञापितः । पत्युश्च समागतस्य
त्वं चौरो ऽसीति गन्त्र्यारोहणं कुर्वतो निषेधः कृतः । विष्णुरपि तां
गृहीत्वा गोविन्दं धर्षितवान् । ततस्तयोः केशाकेशि संवृत्तम् ।

---

१) LO वाग्मी [O add युवा] सुरूपः [om. CC₁] शूरः विष्णु° विप्रः पथि मिलितः तयोश्चान्योन्यमनुरागः [O मिलितयोश्चा°] । ३) MM₁HG om. प्रीतिः° । ४) LO निद्रोच्छेद° । ५) L ह्रीःकंपोन्माद° । O ह्रीष्टकंपोन्माद° । CC₁ जगत्याद्य° । LO जगद्यात्यवस्थां । A जगद्याद्यवस्था दशैते । ६) O om. यत् । L संनिर्यतायधन्व । ७) LO पथिकः । O दम्पत्ये । CC₁ युगपत्रौस्वयं । L यूग° । O यूगपूत्रोन्वयं । LO om. इति । °ब्राह्मणो गोविंदो । ८) LO विश्वसितः । CC₁ निरोधसंगात् [C₁ °संगाद्] उत्तीर्य । L निरोधशंकाभंगायोतीर्य तं वाहनमारोहयत् । O निरोधसंकासंभागायोत्तीर्य° । ९) CC₁ om. च । LO पत्नी वृक्षांतरिते विष्णुना सा मोहिनी । स्वायत्ता [O °त्ति] कृता । १०) LO तया च विष्णुर्निजनामकुलक्रमं सर्वं ज्ञापितः । पतिः समागतः । ११) CC₁ om. त्वं । C तया आरोहणं निषेधः कृतः । C₁ कुपश्चोति? LO गंत्र्यामारोहणं कुर्वन्निषिद्धः । अतस्तयोः केशाकेशि संवृत्तं । गोविंदस्तु [O om. तु] निर्जितः विष्णुस्तां गृहीत्वा गोविंदं धर्षयित्वा स्वगृहं प्रति चलितः । १२) CC₁O संवृत्ता ।

गोविन्दस्तु विष्णुना विषकन्याप्रभावेन निर्जितः । ततस्तां गृहीत्वा
विष्णुः स्वगृहं प्रतिचलितः । गोविन्दः पृष्ठस्थो मार्गासन्ने ग्रामे गत्वा
फूत्कृतवान् । यदनेन चौरेण मम भार्या गृहीता । त्रायतां ताम् । मम
शरणं भो जनाः । अथ ग्रामाधिपेन विष्णुर्मोहिनीयुतो धृतः । पृष्टे-
नोत्तरं दत्तं विष्णुना यथेयं मया परिणीता । मदीयां च भार्यामेष ५
पथिको मार्गे दृष्ट्वा ग्रहिलो बभूव । गोविन्देनापि पृष्टेन इदमेवोत्त-
रितम् । ततो मन्त्री तयोरेकमेवोत्तरं श्रुत्वा ज्ञात्यादिकं पृष्टवान् ।
त्रयमपि तु संवदति । ततः कथं निश्चयः । इति शुकप्रश्नः । ततस्तया
पृष्टः शुक आह । मन्त्रिणोक्तम् । कियन्ति दिनानि संगमस्य युष्माकं
प्रयाणे । तैरुक्तम् । कल्ये भोजनानन्तरं संवृत्तः समागमः । ततो १०
मन्त्रिणा ब्राह्मणी पृथक्पृथक्पृष्टौ । किमनया कल्ये भोजनवेलायां
भुक्तम् । यच्च तया भुक्तं तद्गोविन्दो जानाति इतरस्तु न । ततः स
विडम्बितः सचिवेन । गोविन्दः शिक्षितः । धिगिमां ब्राह्मणीं परत्रेह
च दुःखदां मुञ्च शीघ्रम् ।

---

१) CC_1 विष्णुना गोविन्दो विष° । २) CC_1 om. विष्णुः । फूत्कृतवान् । LO गोविंदेन पृष्ठलग्नेन समागच्छता मार्गास्थग्रामे [O मार्गे°] गत्वा फूत्कृतं । ३) LO जगृहे । CC_1O मामशरणं । L मां शरणं । ४) LO अहो । मोहिनीसहितो । पृष्टः सनुत्तरं दत्ते राजनियं मम भार्या । ५) CC_1 om. च । भार्या एनां । LO एष पथिको मार्गे एतां [O एनां] दृष्ट्वा मोहितः । ६) LO गोविंदे-नापि इदमेवोक्तं । ७) LO om. मन्त्री । ८) CC_1 त्रयमपि न संव-दति । LO न विसंवदति । CC_1LO om. तु । LO om. इति । CC_1 om. शुकप्रश्नः । om. ततस्तया । LO om. तत° — आह । ९) LO मंत्रिणा प्रोक्तं । १०) L पूर्वे द्युर् für कल्ये । C_1LO संगमः । CC_1 ततो महत्तमेन ब्राह्मणेन पृथक्पृथक्पृष्टौ । ११) O पृथक्पृष्टौ । LO om. कल्ये । १२) LO om. यच्च — तद् । O इत्यस्तु मेवोक्तं statt इतरस्तु न । १३) CC_1 गोविन्दो शिक्षितो ।

उक्तं च। वैद्यं पानरतं नटं कुपठितं मूर्खं परिव्राजकं
योधं कापुरुषं विटं विवयसं स्वाध्यायहीनं द्विजम्।
राज्यं बालनरेन्द्रमन्त्रिरहितं मित्रं छलान्वेषि च
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति ये पण्डिताः॥
५　तथापि कामिनीलुब्धो धिक्कृतः साधुभिस्तदा।
तामेवादाय चलितस्तत्कृते निहतः पथि॥
तद्देवि यः करोत्येवमवज्ञां वृद्धशिक्षितः।
स पराभवमाप्नोति गोविन्दो ब्राह्मणो यथा॥
इति कथां श्रुत्वा प्रभावती सुप्ता॥

१०　इति शुकसप्ततौ चतुर्थी कथा॥ ४॥

पुनरन्यदिने सा गमनाय शुकं पृच्छति। शुकः।
गच्छ देवि विजानासि यदि कर्तुं त्वमुत्तरम्।
सभायां नृपतेर्यद्वद्विषमे बालपण्डिता॥

---

१) L कुपठितं स्वाध्यायहीनं द्विजं। O कु° मूर्षं परीव्रजकं। २) CC_1 युद्धे। L योधं का° हयं गतरयं देशं च सोपद्रवं। O योद्धकापरुषं विदं गतवयं। ३) L राजानं च कुमंत्रिभिः परिवृतं मूर्खं परिव्राजकं। O राज्यं कालनारंद्र°। वलत्वेषीणं। CC_1A छलान्वेषिणं। ४) L मुंचंति तूर्णं बुधाः। O मुंचंति मानवाः। A मुंचंति ते पंडिताः। MM_1HG om. वैद्यं°। ५) CC_1 तथान्य। LO सब्धोन्यः कामिनी°। ६) CC_1 नहतः। MM_1H om. तथापि°। ७) CC_1 तद्देव। O om. यः। MM_1 पुरुषो यः°। ८) LO पराभवमवाप्नोति। H om. तद्देवि°। ९) CC_1 विषकन्याकथां। १०) CC_1LO om. इति°। ११) CC_1 om. सा und शुकं। LO सान्यदा शुकं°। १२/१३) MM_1H °कर्तुं चेत्त्वयमुत्तरं सभामध्ये यथा सा हि°।

प्रभावतीपृष्टः शुकः कथां प्राह । अस्ति उज्जयिनी नाम नगरी ।
तत्र विक्रमादित्यो राजा । तस्य राज्ञी कामलीला नाम उत्तमकु-
लजाता । सा च राज्ञो ऽतीव वल्लभा । एकदा नृपस्तया सार्धं भो-
जनं कुर्वन्भृष्टमत्स्यांस्तस्यै दापयामास । सा आह । स्वामिन्नाहमेतान्पु-
रुषानवलोकयितुमपि समर्था किं पुनः स्पर्शनम् । इति श्रुत्वा तेन ५
मत्स्या अट्टाट्टहासेन तथा जहसुर्यथा नागरिकलोकेन श्रुतम् । राजा
च तन्मत्स्यहास्यकारणं मन्त्रिज्योतिर्विच्छाकुनिककोविदान्पृच्छति । यदा
न को ऽपि जानाति तदा सर्वद्विजाग्रेसरं पुरोहितं प्राह यथा त्वयैव
मत्स्यहास्यकारणं कथनीयमन्यथा देशान्निर्वासं प्राप्नोषि । पुरोधास्ते-
तद्वचः श्रुत्वा दिनपञ्चकं व्यवधाने याचयित्वा सविषादो गृहमागमत् । १०
स पुरोहितः सदुत्तरमजानन्पुरस्ताद्राज्ञा निर्वास्यते । स कथं भव-
त्विति प्रश्नः । उत्तरमप्याह शुकः । स ब्राह्मणो विषादापन्नः पुत्र्या
बालपण्डितया बभाषे । तात कथमुद्विग्नचित्त इव लक्ष्यसे । कथय
विषादस्य कारणम् । विद्वद्भिर्विपद्यपि उच्चैः स्थातव्यम् ।

---

१) LO om. प्रभावती° — अस्ति । उज्जयिन्यां विक्रमादित्यो
राजा कामलीला राज्ञी । MM_1 उज्जनी । H उज्जैन । २) MM_1H
विक्रम । MM_1 कामलिका । H लक्ष्मी । LO om. उत्तम° — वल्लभा ।
४) LO साह । om. नाहं । पुरुषाख्यान् । ५) LO न समर्था ।
om. पुनः । om. तेन । ६) LO बृहद्धासेन तथा जहसुर्मत्स्याः ।
७) LO om. च । शकुनज्ञान्पप्रच्छ । ८) CC_1 सर्वद्विजाग्रेसरः ।
om. पुरोहितं । LO प्रत्याह । om. यथा । ९) LO मत्स्यहास° ।
CC_1 कथनीयमिति । LO पुराद्देशान्निर्वासयिष्यामि । १०) LO तद्वचः ।
om. व्यवधाने । add चंतरं [O चंतरे] । °गतः । ११) L तदु-
त्तर° । O यदुत्तर° । LO राजाज्ञा । १२) LO शुकप्रश्नः ।
CC_1 उत्तरमाह शुकः । LO विप्रो दुःखितो । बाल° पुत्र्या ।
१३) CC_1 om. चित्त । कारणं विषादस्य । om. अपि ।

उक्तं च। संपदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वम्।
तं भुवनत्रयतिलकं जननी जनयति सुतं विरलम्॥

ततो ब्राह्मणो ऽविरलं वृत्तान्तमाचष्टे। अनेन कारणेन राजा मां नगरान्निर्वासयति।

५ यतः। न सौहृदं न विश्वासो न स्नेहो न च बन्धुता।
केनापि सह संसारे कुतो राज्ञा छलार्थिना॥

उक्तं च। काके शौचं द्यूतकारे च सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता राजा मित्रं केन दृष्टं श्रुतं वा॥

किं च। नदीनां नखिनां चैव शृङ्गिणां शस्त्रपाणिनाम्।
१० विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥
भोगिनः कञ्चुकासक्ताः क्रूराः कुटिलगामिनः।
दुःखोपसर्पणीयाश्च राजानो भुजगा इव॥
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः।

---

१) Vor संपदि° add CC_1 विपद्युच्चैः स्थेयमित्यादि। LO रणेपि। AMM_1H om. संपदि°। २) CC_1 जनिनी। ३) LO निखिलं। CC_1 वृत्तमा°। निर्वा° नगरात्। LO येन का°। om. मां। ५) LO om. यतः। CC_1 न च स्नेहो। MM_1H बंधुषु। ६) LO कार्या केनापि संसारे यस्माद्राज्ञां छलात्मनां। CC_1 राज्ञा यस्माच्छार्थिना। MM_1H केनापि च न [om. H] मंतव्यं। महात्मना। A om. न सौहृदं°। MM_1HG haben vor dieser Strophe noch Böhtlingk, Ind. Spr. 1237 und 3171 [om. HG]. ७) CC_1 क्लीबे° सर्पे° काके। L द्युतकारेषु। O nur काके शौचं°। L शांतिः। ८) CC_1A om. नदीनां°। LO om. किं च। OMM_1H नदीनां च नखीनां च। MM_1 शृंगिणामाततायिनां। १०) M राजकुलेष्वपि। ११) A om. भोगिनः°। CC_1 कञ्चुकाविष्टाः। १२) MM_1H सुदुष्टा [सुदृष्टा] मंत्रसाध्याश्च। पन्नगा इव। १३) L nur हसन्नपि नृपो हन्ति। AMM_1H om. हसन्नपि°।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ॥

एष राजा आ बाल्यात्सेवितो ऽपि मयि विपरीतो बभूव । तस्मान्मया जीवितुमिच्छता द्विजैः सह परदेशं गन्तव्यम् ।

उक्तं च । त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ५

ततः सा बालिका तातवचनं श्रुत्वा प्राह । तात त्वया युक्तमुक्तम् । परं स्वामिरहितानां न कापि पूजा ।

यत उक्तम् ।
अप्रधानः प्रधानः स्याद्यदि सेवेत पार्थिवम् ।
प्रधानो ऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः ॥ १०
आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसंस्तुतं वा ।
प्रायेण भूमिपतयः प्रमदा लताश्च
यः पार्श्वतो भवति तं परिवेष्टयन्ति ॥
आरोहन्ति शनैर्भृत्या धुन्वन्तमपि पार्थिवम् । १५
कोपप्रसादवस्तूनां विचिन्वन्ति समीपगाः ॥

---

२) LO आबाल्यतोपि मया सेवितोभूत् । तथापि मयि प्रतिकूलः [om. O] तस्मान्मया परदेशे । ४) AG om. त्यजेदेकं° । ६) LO बालपंडिता । om. तातवचनं श्रुत्वा । CC_1 om. तात । ७) CC_1 स्वस्थानरहितानां । LO क्वापि । ८) LO यतः । व्यवहारी धनी विद्वान्कुलीनश्च सतां मतः । निपतन्ति नरे यस्मिन्स्निग्धाः पार्थिवदृष्टयः ॥ ९) LO add किं च । AG om. अप्रधानः° । C प्रधान स्य । सेवे । १०) L भुपतिर्वर्जितः । O भूपतिविवर्जितः । ११) CC_1AG om. आसन्नमेव° । १२) MM_1H °पंडितं वा । १५) ALOG om. आरोहन्ति° । MM_1H वंशं [H वश्यं] नयांति [H याति] विनता [H विनतां] धन्वंतमपि [M_1 धु° । H धुन्वत°।] पार्थिवं [H पार्थिवः] तस्माभीष्टं सुचतुरा° ।

तथा च । विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् ।
सेवावृत्तिविदां चैव नाश्रयः पार्थिवं विना ॥
ये जात्यादिमहोत्साहा नोपगच्छन्ति पार्थिवम् ।
तेषामामरणं भिचा प्रायश्चित्तं विनिर्मितम् ॥
५ रोगैर्ग्रहैर्नृपैर्ग्रस्तो यो न वेत्ति जडक्रियः ।
मध्यमन्त्रमुपायं च सो ऽवश्यं तात न स्थिरः ॥
उक्तं च । सर्पान्व्याघ्रान् गजान्सिंहान्दृष्ट्वोपायैर्वशीकृतान् ।
राजेति कियती मात्रा धीमतामप्रमादिनाम् ॥
तथा च । राजानमेव संश्रित्य विद्वान्याति परोन्नतिम् ।
१० विना मलयमन्यत्र चन्दनं न विवर्धते ॥
धवलान्यातपत्राणि वाजिनश्च मनोरमाः ।
सदा मत्ताश्च मातङ्गाः प्रसन्ने सति भूपतौ ॥
तस्मात्तात त्वं राज्ञा मान्यः प्रसादपात्रं च । ततः संदेहे ऽस्मिन्मा विषादीभव ।
१५ यतः । राजगृहे समायाते विषमे कार्यसंशये ।

---

१) ALOG om. विद्यावतां° । MM_1 वि° गृहस्थानां° । CC_1 °विक्रय° । २) M सेवावृत्तिं विना । CC_1 नाश्रयं पार्थिवं विदुः । ३) AG om. ये° । CC_1 वैजात्यादि° । LO महोत्सहान्नो° । MM_1H ये च मर्त्या° । ४) CC_1 मिथ्या statt भिचा । L °भरणं । M °मर । H °मरणा । MM_1H भिचां । विनिर्दिशेत् । ५) $ALOMM_1HG$ om. रोगै° । ७) LOAG om. सर्पा° । MM_1H सर्पव्याघ्रगजादीनां [H °न] ये नयंति [H यांति] वशं [H स्ववशं] नराः [M सपव्याघ्रं° ।] तेषां नृपवशीकारो नैव लोकेतिदुष्करः ॥ ९) AG om. राजानमेव° । LO om. तथा च । CC_1 om. च । पति परोनित्यं । १०) MM_1H चंदनो । MM_1 निवर्धते । ११) ALOG om. धवला° । १२) MM_1H सदा रमासु । १३) LO om. तस्मात् । C राजा । LO राज्ञो । ततो ऽस्मिन्संदेहे । L मा विषीद । om. O. १४) $ALOMM_1HG$ om. राजगृहे° ।

संदिग्धमनसां राज्ञां प्रधानाः संशयच्छिदः ॥

ततो हे तात स्थिरीभव । मत्स्यहसनोत्तरं राज्ञः पुरतो मयाभिधे-
यमिति । स्नाहि भुङ्क्ष्व । ततः स एवं श्रुत्वा राज्ञो ऽग्रतो गत्वा सर्वं
निवेदयामास । नृपो ऽपि तुष्टस्तामाजुहाव । सा आशीर्वादं दत्त्वा
राजानमब्रवीत् । राजन्मा मुधा विप्रान्विडम्बय । किं त्वया एवंविधं ५
मत्स्यानां हास्यं दृष्टं श्रुतं वा । कथं मामबलाजनं पृच्छन्न विलज्जसे ।

यतः । इतरो ऽपि न सामान्यो नृपतिर्दिव्यरूपभृत् ।
त्वं पुनर्विक्रमादित्यो यथार्थो ऽसि परंतप ॥

उक्तं च । इन्द्रात्प्रभुत्वं ज्वलनात्प्रतापं क्रोधं यमाद्वैश्रवणाच्च वित्तम् ।
सत्त्वस्थिरे रामजनार्दनाभ्यामादाय राज्ञः क्रियते शरीरम् ॥ १०

तथा च भारते ।
मा वृकोदर पादेन एकादशचमूपतिम् ।
पद्मानामपि यो भर्त्ता नासाप्रकृतिमानिनी (?) ॥

स्वामिन्कथं न त्वं स्वयमेव विचारयसि । यतस्त्वमेव सर्वसंशयच्छेत्ता ।
अथान्येभ्यश्चेत् श्रोतुं कौतुकं तर्हि शृणु । १५

---

२) LO om. ततो । O om. हे । L स्थिरो । O स्थिरे । LO वि-
धेय॰ । ३) CC_1 आहि भुंचच । ४) CC_1 तुष्टात्माजूहाव [C_1 ॰जु-
हाव] । LO दत्ताशीर्वादा । ५) CC_1 ॰ब्रवीदिति । om. विप्रान् ।
LO त्वयैवंविधं हास्यं मत्स्यानां । ६) O om. वा । CC_1 सामब-
लाजनं पृच्छन्विलज्जसे । ७) CC_1 ॰रूपभृक् । ८) CC_1LO परं-
तपः । AMM_1HG om. इतरो॰ । ९) O पंचमी बालपंडिताकथा
उक्तं च वगवक्करखंडानां गृहीत्वा प्रथममाचरं धृष्ट्वा रासभमूत्रेण
द्वेवनक्रुरः धृतः statt उक्तं च । CC_1 कौपं यमात् । L क्रोधं हराद् ।
AMM_1H om. इन्द्रा॰ । ११) om. LO. १२) LOAMM_1HG om.
मा वृकोदर॰ । १३) CC_1 पद्मानामपि यो भर्त्ता नासाप्रकृतिमा-
निनी । १४) LO विचारयसे यतस्त्वं स्वयमेव सर्वं॰ । १५) LO
अथान्यवाचाकौतुकं तर्हि शृणु । CC_1 तद्विशृणु ।

इयं राज्ञी न स्पृशति ह्यस्मान्मत्स्यान्महासती ।
पुरुषाख्यानतो राजन् हसिताः शफरा ध्रुवम् ॥
परिभाव्यस्त्वया राजन् श्लोकार्थो ऽयं सदा हृदि ।
मूढधीरन्यथा देव यदि पृच्छसि मां पुनः ॥

५ राजन्राजपत्न्याः सूर्यमपश्यन्त्यास्तत्कथमसतीत्वशङ्का स्यात् ।
श्लोकार्थे प्रस्तुतार्थे च मत्स्यानां हसनं बुधाः ।
सनृपा न विजानन्ति अपि सर्वार्थकोविदाः ॥

ततः सदो मूढं दृष्ट्वा बालपण्डिता उत्थाय ययौ । शुको ऽप्याह । अहं प्रातः कथयिष्ये । इति कीरोक्तिं श्रुत्वा प्रभावती सुप्ता ॥

१० इति शुकसप्ततौ पञ्चमी कथा ॥ ५ ॥

अथापरस्मिन्दिवसे प्रभावती शुकं प्राह । शुक स मत्स्यहास्यव्यतिकरो राज्ञा ज्ञातो न वेति । शुक आह । स नृपः श्लोकार्थमजानन्न निद्रां लेभे ।

---

१) CC_1O om. इयं । CC_1 राज्ञी स्पृशति नो मत्स्यान्या कापि महासती° । L °ह्यस्मान्कापि महासती । O राज्ञी न स्पृशत्यस्मान्पक्षानपि महासती । MM_1H राज्ञी नाह [H नाहं] स्पृशत्यस्मान्मत्स्यानपि महासती । २) O om. शफरा । MM_1 °नसतू शफरी ध्रुवं । H °शरीरं च असत् ध्रुवं । A om. इयं° । ३) CC_1 श्लोकाधार्य्या सदा । ४) CC_1 पृच्छति । AMM_1H om. परिभाव्य° । ५) CC_1 सूर्य्यमपश्यतस्तत्कथमसती° । L राजपत्न्यो ह्यसूर्यं पश्यास्तत्कथ° । O राजपुत्रो ऽसूर्यं पश्यास्तत्कथ° । °शंक्यं । ६) AMM_1H om. श्लोकार्थे° । ७) CC_1 °कोविदः । LO °शब्दार्थकोविदाः । ८) CC_1 तत्सदो । LO ततः सदः संशयमापन्नं दृष्ट्वा । ९) C_1 om. इति । CC_1 कीरोक्तं । सुप्ता प्रभावती । १०) CC_1 इति बालपण्डितकथा पञ्चमी । LO om. इति° । ११) CC_1 om. अथा । अपरस्मि° । LO प्रत्याह । om. स । CC_1 om. हास्य । १२) CC_1 राजा । LO कथं ज्ञातः । O nur यः । LO om. शुक आह । CC_1 om. स ।

उक्तं च। निद्रा भद्रे कुतस्तेषां ये ऋणव्याधिपीडिताः ।

अविधेयकलत्राश्च ये चान्ये कृतवैरिणः ॥

राजा निद्राभावे कष्टेन निशां नीत्वा प्रातर्बालपण्डितामाकार्य प्राह । बालिके श्लोकार्थो न ज्ञातो मया । तस्मान्मत्स्यहास्यकारणं निवेदय । सा आह । राजन्मां मा पृच्छ । ५

यतः। पश्चात्तापो ऽत्र भविता भार्याया वणिजो यथा ।

आग्रहेण कृतः पत्नी मण्डकागमनं प्रति ॥

राजा । कथमेतत् । शुकः । अस्त्यत्र जयन्ती नाम नगरी । तत्र वणिक्पुत्रः सुमतिर्नाम । तस्य प्रिया पद्मिनी नाम । तस्य च वणिजः पुण्यक्षयाद्धनं क्षीणम् । स च जनैः परित्यक्तः । यतो जनो धनमित्रः । १०

उक्तं च। यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।

---

१) MM_1H गुरुव्याधि॰ । २) CC_1 ॰कलत्राणां । A ॰कलत्रांश्च । MM_1H अस्वाधीनकलत्रा [M_1 आ॰] ये [M_1 यै] ये [H यैर्] जिताश्च न वैरिणाः [M_1 वैरिणः] । LO add अट्ठ महीपत्ति [O ॰पत्ति] निद्द न लहंति पावासुउ वाहिउ [O वाहिओ] जं च तं च अमरिसुवेहेतउ [O अमरीसुवहंतउ] नियकलत्तवित्तोहिउ [O ॰त्तोहिउ] परकलत्त [O ॰कमलत] जो न [O रन] आसउत्तउ [O आसत] विज्जाकंखिउ [॰कंखिलउ] धणरहिउ निय [O नीअ] सयणिंहिं [O सयणीहिं] परिचतु [O ॰त्तु] आयहअउह निद्द कउ जाव [O अद्दनिजाउजाव] न कज्जसमत्थ [O ॰मत्थ] । ३) L om. राजा — पृच्छ । CC_1 om. निशां । om. प्रातर् । O बाल । ४) O om. मया । om. तस्मान्मत्स्य । ५) O साह । राजन्ना मां । ६) AMM_1H om. पश्चात्तापो॰ । CC_1 कुतः statt यतः । L भवतो । ७) CC_1 कुतः । C_1 ॰गमने । ८) CC_1 om. राजा । om. शुकः । LO om. राजा — शुकः । om. अत्र । MM_1 उज्जनी । H उज्जैन । G *Οὐζζαγινη*. LO पुरी । CC_1 ॰र्नामा । L सुमतिनामा । ९) LO om. नाम । CC_1 om. च । १०) CC_1 जनैश्च त्यक्तः । यतो ऽधनो न मित्रं । LO om. स च ।

यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः ॥

तथा च भारते ।

जीवन्तो ऽपि मृताः पञ्च श्रूयन्ते किल भारत ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥

५ तथा च । इह लोके हि धनिनां परो ऽपि स्वजनायते ।
स्वजनो ऽपि दरिद्राणां तत्क्षणाद्दुर्जनायते ॥

सो ऽपि च तृणकाष्ठादिकमानीय पुरीमध्ये विक्रीणाति । अन्यदा अनेन तृणकाष्ठादिकं किमपि वने न प्राप्तम् । दृढकाष्ठमयो ऽपि विघ्नविनायकः प्राप्तः । ततश्चिन्तितम् । किमसौ मम विधास्यति ।

१० उक्तं च । बुभुक्षितः किं न करोति पापं क्षीणा नरा निःकरुणा भवन्ति ।
प्राणार्थमेते हि समाचरन्ति मतं सतां यन्न मतं तदेषाम् ॥

---

१) MM_1H zweimal यस्यार्थः । LO स च जीवति । O add त्यजंति मित्राणी धनैर्विहिनः । २) CC_1 इत्यादिः तथा° । LO om. च । ३) CC_1 श्रूयते । L श्रूयंते । O om. श्रूयन्ते — धनिनां । H श्रूयतां । CC_1LO भारते । om. G. ४) CC_1A दरिद्री । जीवन्तो° und दरिद्रो° umgestellt in A. ५) LO om. तथा च । CC_1 ऽपि für हि । AMM_1H om. इह लोके° । CC_1 add पूज्यते यदि पूज्यो ऽपि इत्यादि । A add No. 4160 von Böhtlingk's Ind. Spr. ७) CC_1 om. च । LO तृणकाष्ठादीनि समानीय तेन वनमध्ये तृण° । ८) CC_1 om. न । LO दृष्टः काष्ठमयो° । C_1 om. ऽपि । ९) O om. मम । LO करिष्यति । १०) CC_1 विभुक्षितः । O om. न । CC_1 जना । P निष्करुणा । L vor बुभुक्षितः — त्यजेत्क्षुधार्त्ता महिलापि पुत्रं खादेत्क्षुधार्त्ता भुजगी स्वमंडं । ११) CC_1L om. प्राणा° । A प्राणार्थामने° । सतीयन्न चतां च तेषां । P प्राणार्थमत्ते° । यत्न मत तेषां । MM_1H om. बुभुक्षितः° । CC_1 आख्याहि भद्रे प्रियदर्शनस्य न गङ्गदत्तः पुनरेति कूपम् statt प्राणा° ।

यावत्स तस्य विनायकस्य पाटनायोत्तिष्ठति तावत्तुष्टः सन् जगाद् । अहं तव प्रतिदिनं पञ्च पञ्च मण्डकान्दास्ये खण्डघृतयुतान्। ममालये प्रातर्ग्राह्याः । परं कस्यापि इदं रहस्यं न कथनीयम् । कथिते तु मद्वचो वितथं भविष्यति । सो ऽपि च तथेति प्रतिपद्य नित्यं मण्डकपञ्चकं भार्याया अर्पयति । तद्दैवं मण्डकपञ्चकं घृतखण्डयुक्तमादाय तद्भार्या निजकुटुम्बं तृप्तीकरोति । नित्यं च तान्मण्डकान् गोत्रिणां गृहे वाहयामास । निजसख्या मन्दोदर्यास्तृप्त्यर्थं नित्यं प्राहिणोत् । अन्यदा सा सखी तां पप्रच्छ । पद्मिन्यपि मण्डकागमनमिदं न जानाति । ५

---

१) LO om. स । P om. विनायकस्य । CC_1 विनायकस्या । L °त्तिष्ठित् । LO तावद्विद्विनायकस्तुष्टो जगाद् । २) CC_1 om. तव । LO प्रति° तव । मंडकपंचकं । CC_1 मोदकान् । °युतान् । PLO om. खण्ड° । CC_1 ममालयात् । LO ममालये प्रातर्ग्राह्यं । P मम आलये प्राप्ताः प्रातर्ग्राह्या । ३) P परं पि । CC_1 कथ्यं । कथिते च । P कथितां च । ४) L मद्वचो निष्पन्नी° । O निष्पलनी° । CC_1 om. तथेति प्रतिपद्य । LO तथा प्र° । CC_1 मोदक° । P स सुमति वनिक् नित्यं° । ५) P भार्यायै समर्पयति । CC_1 तद्दैवकं । P तद्दैविकं । CC_1 मोदक° । LO खंडामृतसंयुतं [O °घृत°] समादाय । ६) LO om. तद्भार्या । P °सहितमादाय निजकुम्बितृप्तीचकार । CC_1 °युक्तमादाय नित्यं च तद्भार्य्या गोत्रिणां गृहे लाहयामास । LO om. नित्यं च । तद्भार्या तान्मंडकान् गोत्रिणां वाहयामास [O लाहयामास] । P नित्यश्च तद्भार्य्या प्रियदर्शनसंकेतगृह वाहयामास तान्मण्डकान् गोपिनो गृहे वाहयामास । ७) LO तृप्तिपर्यंतान्नित्यं प्राहिणोति । P तृप्तिपर्य्यंतं नित्य पाहिनोत् । ८) LO om. सा । P अनेद्रा सा सखीं प्रपच्छे । C मोदका° । LOP मंडकागमननिदानं । CC_1 कथं कस्मादिति किं समाचष्टे, P कथं स्मादिति किं साचावष्टेत hinter जानाति ।

ततस्तस्याः पुरः सा सखी कपटाद्ब्रूते । सखि यदि त्वं मम पुरतो गुह्यं न कथयसि तत्कः स्नेहः ।

उक्तं च । ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयति चैव षड्विधं प्रीतिलक्षणम् ॥

५ ततः पद्मिन्याह । मदीयः पतिरिदं गुह्यं ममाग्रे कथमपि न ब्रूते मया शतशः पृष्टो ऽपि । तयोक्तम् । तर्हि त्वदीयं जीवितं रूपं यौवनं सर्वमपि निरर्थकमेव यदिदं नाज्ञायि । ततः पद्मिनी पतिं पृच्छति । कथं मण्डकप्राप्तिः । पतिराह । विधेः प्रसादात् ।

उक्तं च । द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशो ऽप्यन्तात् ।
१० आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥

किं च । क्षुत्क्षामस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा

---

एवंविधे गहने गता सा कलहप्रिया व्याघ्रं ददर्श । स च व्याघ्रस्तां सपुत्रां दृष्ट्वा पुच्छेन भूमिमाहत्य धावितः । ततः सा कथं भवतु । इति प्रश्नः । उत्तरम् । शुकः प्राह । सा व्याघ्रमागच्छमानं दृष्ट्वा धार्ष्ट्यात्पुत्रौ चपेटया हत्वा इति जगाद । कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः । अयमेकस्तावद्विभज्य भुज्यताम् । पश्चादन्यो द्वितीयः ५ कश्चिल्लक्ष्यते । इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः ।

निजबुद्ध्या विमुक्ता सा भयाद्व्याघ्रस्य भामिनि ।

Uebersetzung hinzu: चंदनं सप्तच्छदासन्नमांसलवरतुङ्गरसाहसकन्नं क्वचिदपि सहकारखर्ज्जूरिकं फलिशत्तमत्तालिविहङ्गमभंरितं । क्वचिदपि शेलुफलपूरितांतकं सरसवदरवङ्गतिंतिनीछत्तकं दालिमीफलविल्वफलसुगन्धिवाढं ॥ A महावनं बहुवृक्षमालालंकृतं । गजसिंहसरभव्याघ्रचित्रकादिबहुदुष्टसत्त्वाकीर्णं अनेकविहिगाकुलं । LOMM$_1$H om. चन्दण° ।

१) P एवंविधेन गहनेण । om. सा । ताकहप्रिया । LO तत्र व्याघ्रं ददर्श । P om. च । CC$_1$ स च व्याघ्रस्तां दृष्ट्वा सचुवा पु° भू° धावितो व्याघ्रः । LO om. स च — प्राह । ३) C om. प्रश्नः । P om. उत्तरं । LO सा च । °गच्छंतं । P °दृष्ट्वा द्वावपि पुत्रौ चपटया हत्वा जगाद । ४) LO om. धार्ष्ट्यात् । CC$_1$ कथमावामे° । LO कथं वत्सौ एकै° । P व्याघ्रौभक्ष° । ५) CC$_1$ कलत्रं । P कलहः कृतः । LO कुरुतः । om. अयमे° — इति श्रुत्वा । P अयमेव । भुज्यते । °द्विजोय कश्चित्प्राप्यते । ६) CC$_1$ काचिदिदं मत्वा । LO अहो व्याघ्रमारीस्ति [O °ति] काचिदियं [O om. इयं] मत्वा व्याघ्रो भयाकुलो° । P इति श्रुत्वा व्याघ्रो व्याघ्रस्य मालिका च इयंमिति मत्वा व्याघ्रो भयच्याकुल° । ७) C भयाकुलित° । ८) CC$_1$LO भामिनी ।

अन्यो ऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात् ॥

इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ द्विचत्वारिंशत्तमी कथा ॥ ४२ ॥

अन्येद्युः शुकमापृच्छति स्म कामिनी । शुकः प्राह ।

५ व्रज देवि न ते ऽयुक्तं व्रजनं गजगामिनि ।

व्याघ्रमारीव बुद्धिस्ते द्वितीयापि यदि स्थिरा ॥

प्रभावती पृच्छति । कथमेतत् ।

व्याघ्रमारीकृतां बुद्धिं द्वितीयां विवदाधुना ।

महत्कौतुकमत्रार्थे विद्यते मे प्रियंवद ॥

१० शुकः । तं दृष्ट्वा कानने व्याघ्रं नष्टं जातं भयाकुलम् ।

मृगधूर्तो हसन्नाह व्याघ्रो नष्टः कुतो भयात् ॥

---

१) P किमन्यो । CC_1LO बुद्धिमान् लोके । LO निश्चितं für महतो । AMM_1H om. निजबुद्ध्या॰ । २) L om. कथां । सा सुप्ता । O om. इति — सुप्ता । ३) L om. इति॰ । O इति कथा । P ॰संग्रहः । ४) LO om. अन्येद्युः — प्राह । CC_1 om. स्म und प्राह । ५) P न युक्तत्ते व्रजने । L वर्ज्जनं । ॰यामिनि । ६) L द्वितीया यदि निश्चला । P भवेत द्विपरिस्थिरा । MM_1H सयुक्तं ते गमनं राजगामिनि [MM_1 ॰नी] यथा प्रसंगते [MH ॰गंते] बुद्धिर्व्याघ्रमार्या यथास्ति चेत् ॥ A om. व्रज॰ । ७) LOP om. प्रभावती॰ । ९) P हि für मे । AMM_1H om. व्याघ्र॰ । १०) LO om. शुकः । C तद्दृष्ट्वा । P नच für नष्टं । L यांतं । O यातं । ११) LQP व्याघ्र । P कुत्राभयात् ।

व्याघ्रः । गच्छ गच्छ जम्बुक त्वमपि किंचिद्गूढप्रदेशम् । यतो व्याघ्रमा-
रीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो
नष्टः शीघ्रं तदग्रतः । मृगधूर्तः । व्याघ्र त्वया महत्कौतुकमावेदितं
यन्मांसपिण्डान्मानुषादपि बिभेषि । व्याघ्रः । प्रत्यक्षमेव मया सात्म-
पुत्रावेकैकशो मामन्तुं कलहायमानौ चपेटया घ्नन्ती दृष्टा । जम्बुकः । ५
स्वामिन्यत्रास्ते सा धूर्ता तत्र गम्यताम् । यदि व्याघ्र तव तत्र गतस्य
सा संमुखमपीक्षते तदा मम त्वदीया वेला स्मरणीया । व्याघ्रः ।
शृगाल यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् । जम्बुकः ।
यद्येवं तर्हि मां निजगले बद्ध्वा चल शीघ्रम् । स व्याघ्रस्तथा कृत्वा
काननं ययौ । व्याघ्रमार्यपि प्राप्ता पुत्रसहिता । तेन जम्बुककृतोत्सा- १०
हाद्व्याघ्रात्सा कथं मुच्यताम् । इति प्रश्नः । शुकः । तया व्याघ्रमार्या
तदा चिन्तितम् । यदयं मृगधूर्तेनानीतस्तस्मादमुमेव जम्बुकमाक्षि-
पन्त्यङ्गुल्या तर्जयन्त्युवाच ।

रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।
विश्वस्यादीकमानीय कथं यासि वदाधुना ॥ १५

---

१) P व्याघ्र आह । LO om. किंचिद् । P bricht hier ab mit त्वमपि कि । L मूढ° । LO °मारोक्ति । २) C गृहीतकरं । C_1 °करंजीवितो । CC_1 om. तदग्रतः । ३) LO व्याघ्रपते त्वया ममेह कौ° । ४) LO यतो für यन् । om. मया । CC_1 सा आत्म° । ५) CC_1 मां मत्वा für मामन्तुं । LO °पुत्रौ ए° । पेटयित्वा नि-घ्नती । ६) LO om. व्याघ्र तव । ७) CC_1 सामुखम् । स्म° वेला । LO om. स्म° । ८) LO जंबुक । L add यदि hinter मुक्त्वा । ९) CC_1 वला für चल । LO शीघ्रं चलसे । om. स । १०) LO पु° प्राप्ता । ११) L °त्स स्त्री कथं मुच्यते । LO om. इति प्रश्नः । °मारिकया । १२) CC_1 om. यदयं । LO जंबुकेनानीतस्तदा-मुमेव जंबुकमंगुल्या तर्जयंत्याक्षिप्यते । १५) CC_1O विश्वास्या° । L विश्वासा° । AMM_1H om. रे रे° ।

इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयंकरा ।
व्याघ्रो ऽपि सहसा नष्टो गलबद्धशृगालकः ॥
निजबुद्ध्या पुनर्मुक्ता व्याघ्रजाद्देवि सा भयात् ।
बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ॥

५ इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ त्रिचत्वारिंशत्तमी कथा ॥ ४३ ॥

अथान्येद्युर्दिनावसाने प्रभावती शुकं पृच्छति । शुकः ।
आत्मानं संकटाद्देवि याहि चेद्देत्सि रक्षितुम् ।
यथात्मा संकटात्तेन जम्बुकेनापि रक्षितः ॥

१० स च जम्बुको गलबद्धो निघृष्टपृष्ठचरणो गलद्रुधिरप्रवाहो मुमूर्षुरिव देशान्तरं गन्तुमिच्छता व्याघ्रमारीभयाद्व्याघ्रेण नीयते । ततो महतो ऽपायात् शृगालः कथं मुच्यते । इति प्रश्नः । उत्तरं प्राह शुकः । ततस्तं व्याघ्रं बहुनदीकाननविषमसमप्रदेशपर्वतानुल्लङ्घयन्तं सत्वरं दृष्ट्वा

२) O om. ऽपि । AMM$_1$H om. इत्युक्त्वा° । ३) L निजबुद्धिबलान्मुक्ता । ४) LO तावत्सर्वकार्येषु [°कार्यसु] सवदा । AMM$_1$H om. निजबुद्ध्या° । CC$_1$ add उक्तं च । एकं हन्यान्न वा हन्यादित्यादि । ५) L nur कथा । O इति कथ सा सुप्ता । ६) LO om. इति° । ७) LO om. अथा° — शुकः । CC$_1$ अथान्येद्युर्दिनकथां श्रुत्वा प्रभावती सुप्ता इति त्वं कृत्वा दिनावसाने प्रभावती° । ८/९) MM$_1$H गच्छ देवि न ते विघ्नं कर्तुं योग्योस्मि [M$_1$ °स्मि । H °स्ति] भामिनी । संकटे समनुप्राप्ते जंबुकस्येव चेन्मतिः ॥ A om. आत्मानं° । १०) LO गले बद्धो । CC$_1$O °पाणिचरणो । CC$_1$ om. इव । १२) LO जंबुकः । om. इति प्रश्नः । CC$_1$LO om. प्राह । १३) CC$_1$ वहन्नदा [C$_1$ वहुन्नदा] काननविषमपर्वतानुलंघयंन्तं । LO बहूनि काननानि नदीप्रदेशात् [O दीदेशात्] विषमसमपर्वतान् [O विषमपर्वतान्] । om. सत्वरं ।

आत्मानं मोचयितुकामः शृगालो भृशं जहास पीडितो ऽपि सन्। व्याघ्रेणोक्तम्। कथं हसितम्। स आह। देव सा मया व्याघ्रमारीति धूर्तिका ज्ञाता। त्वत्प्रसादाच्च दूरदेशमागतो ऽहं जीवितः। परं यदि सास्मद्रक्तस्रावसंलग्ना पापिनी पृष्ठतः समेति तदा कथं जीवितव्यम्। अतो ऽहं हसितः। व्याघ्रस्वामिन्स्थिरीभूय विचारय। ५ अथ तुष्टो व्याघ्रस्तेन वाक्येन तथेत्युक्त्वा जम्बुकं मुक्त्वा सहसा नष्टः। शृगालो ऽपि सुखं तस्थौ।

बुद्धिर्वरं वरारोहे धनमानसुखैषिणाम्।
बुद्धिहीनाः परं क्लेशं प्राप्नुवन्ति कृशोदरि॥
बलं प्रज्ञाविहीनस्य परकार्याय केवलम्। १०
गिरिकूटोपमाङ्गस्य कुञ्जरस्येव दृश्यते॥

इति कथां श्रुत्वा प्रभावती शुकवाक्यविस्मिता सुप्ता॥

इति शुकसप्ततौ चतुश्चत्वारिंशत्तमी कथा॥ ४४॥

अन्येद्युः सा कामिनी संध्यायां शुकं पप्रच्छ। गमिष्यामीति। शुकः प्राह। १५

---

१) LO आ° मो°। LO जंबुको। C कृताट्टहास। C_1 अट्टाट्टहास? LO om. पीडितो ऽपि सन्। २) C_1 हसितः। LO हससि। om. देव। CC_1 सा माया। L om. सा। O स। LO व्या° धू° मया ज्ञाता। ३) CC_1 °देशागतो। LO त्वत्प्रसादात् दूरदेशादागतो। ४) CC_1 सा अस्मिन्नक्तश्रावि। LO °संलग्न। om. पृष्ठतः। ५) L अहं। CC_1 विचारयथ। ६) CC_1LO om. अथ। LO वचनेन। L हसति für सहसा। ७) L सुखं। LO स्थितः। ८) CC_1 वलं। °सुखैषिणां। AMM_1H om. बुद्धिर्वरं°। १०) LO प्रजावलविहीनस्य। AMM_1HG om. बलं°। A यस्य बुधिर्वलं तस्य तस्य सर्वाश्च सिधयः। १२) LO om. इति कथां श्रुत्वा। CC_1 om. प्र° शुक°। १३) LO इति कथा°। १४) LO om. अन्येद्युः — प्राह।

समयो ऽयं प्रियं भोक्तुं तव भामिनि संप्रति ।
वञ्चिता वेत्सि चेत्कर्तुं किंचिद्विष्णुः पुरा यथा ॥

प्रभावत्याह । कथमेतत् । शुक आह । अस्ति विलासपुरं नाम नगरम् । तत्र अरिंदमो नाम राजा । तत्र च विष्णुनामा ब्राह्मणो
५ रतिलोलुपः कुटुम्बवर्जितो रतिकर्मणि सर्वनारीदुःसह इति नगरे प्रसिद्धो बभूव । वेश्याभिरपि न शक्यते जेतुं किं पुनः कुलाङ्गनाभिः । तत्र रतिप्रिया नाम गणिका । [यतो गणिकादीनां बहवो भेदाः परं पञ्च प्रसिद्धाः । तेषु संलीनाः सर्वे ऽपि भवन्ति । ते चेमे पञ्च गणिका विलासिनी रूपाजीवा अर्थवृत्तिका दारिका चेति । एतेषां
१० भेदानां सा सर्वोत्तमा गणिका ।] अथ सा षोडश द्रम्मान् गृहीत्वा तमाजुहाव । तमायान्तं दृष्ट्वा सा चाटूक्तिभिः परिचर्यां चकार । सो ऽपि चान्यकार्यनिवृत्तस्तस्मिन्नेव रतिकर्मणि दत्तमनास्तां रन्तुं जेतुमारेभे ।

---

१) C_1 सुखं भोक्तुं । LO संप्रति भामिनी । २) CC_1LO चेद्दत्तुं । LO किंचिद्दत्तुं [om. O] यथा पुरा । MM_1H सुखं भोक्तुं तव भा° सुंदरि । तथा त्वं वेत्सि चेत्कर्तुं विष्णुशर्मा द्विजो यथा ॥ A om. समयो° । ३) CC_1 om. प्रभावत्याह । LO om. प्रभावत्याह — अस्ति । CC_1 om. अस्ति । LO विलासपुरे [O पुर] पत्तने । MM_1H विशाल । ४) LOAH अरिमर्दनो । LO om. नाम । CC_1 om. तत्र च । LO om. च । विष्णुर्विप्रः । MM_1H विष्णुशर्मा । ५) LO रतलोलुपः । रतकर्मणि । ६) LO शक्यते नो विजेतं । ७) CC_1 तत्रश्च für तत्र । LO रतप्रिया । M_1 प्रिया । G *Πριά.* MH om. L गणिका अस्ति । O गणिकास्ति । CC_1 याता für यतो । LO गणिकानां । ८) CC_1 om. प्रसिद्धाः । O om. ऽपि । CC_1 इमे ते पञ्च । LO om. पञ्च । ९) LO °वित्तिका । CC_1 °वृत्तिः । C एषा । CC_1 add सर्वेषां । १०) CC_1 om. सा । LO सा वेत्ति मर्माणि । CC_1LO om. अथ सा । ११) CC_1 om. तम् । C_1 गृहीत्वा आ° । L मत्त्वा । O त्वा । L सदुक्तिभिः । O चाटूक्तीभीः । LO परिचयं । १२) LO रतकर्मणि । दत्तमानस° । जेतुं रंतुमा° ।

तया च स रतिलोलुपः द्रव्यार्थं वा पराजयार्थं वा प्रहरद्वयं याव-
त्सोढः । निशीथे चाधोभूमिकामागत्य कुट्टिन्याग्रतो निवेदितं यद्दुः-
सहो ऽयं द्विजः । पणबन्धं समर्पयित्वा तमुत्कालय । मयि जीवन्त्यां
प्रागेव बहुत्वं भविष्यति । कुट्टिन्याह । अस्मद्गृहे न को ऽपि कामुको
गणिकां जित्वा पणबन्धं जग्राह । ततो ऽहमेनं यावत्प्रपञ्चेन निःसा- ५
रयामि तावत्सोढव्य इति । यदा चाहं पिप्पलमारुह्य सूर्पद्वयेन पक्ष-
शब्दं कुर्वाणा कुक्कुटध्वनिं विदधामि तदा विभातमिति कृत्वा निः-
सारणीयः । इत्युक्त्वा प्रेषितोपरिभूमौ गणिका । यथोक्तं च कुट्टिन्या
तावत्कृतम् । तस्मिन्कृते विभातमिति कृत्वा निःसारितो द्विजः । या-
वद्गृहद्वारस्थो व्योममालोकयते तदोपरि निशीथो वर्तते । तदा स १०
विप्रः कुट्टिनीपराजितो जनमध्ये पराजयं कथं वहतु । इति प्रश्नः ।
शुकः । यदि विप्रः कुक्कुटध्वनिस्थानमवलोकयति तावत्सूर्पद्वययुतां
कुट्टिनीं ददर्श । तेन च सा लोष्टेनाहत्य भूमौ पातिता प्रमदाजनेषु

---

१) CC_1LO om. च । LO om. च स । सुरतलोलुपतया । द्रव्यार्थं परा° । CC_1 पराजनार्थं । LO प्रहरद्वयं वा । om. यावत् । २) L सोढं । LO om. च । समागत्य । कुट्टिन्याये । ३) CC_1 om. ऽयं । O om. द्विजः — बहुत्वं । CC_1 मुत्कालय । L तं विसर्जय । ४) L प्रागे मयि जीवत्यां बहुतरमपि द्रव्यं । ५) LO om. जित्वा । यावदेनं । L om. प्रपञ्चेन । LO निःकासयामि । ६) LO तावतासौ । L यावदाहं । LO om. च । CC_1 सूर्पहस्तेन । पक्षिशब्दं । ७) L कुंकुंशब्दं । O कुन्दं । L करोमि । O करोति । L निष्काशनीयः । O निस्कासनीद । ८) CC_1 om. च । ९) LO इति कृत्वा [O कृत्वे] निःकाषितो [O नित्सारीतो] द्विजो [O add पावद्] आकाशे दृशं [O दृशे] ददाति द्वारस्थितस्तदा निशीथो [O निशी] वर्त्तते । ११) LO कथं पराजयं । CC_1 कथयतु । LO प्रश्ने । O add उत्तरं । १२) LO यावद् । आलोकते । १३) O दर्शयामास । LO पतिता ।

धिक्कृता । स च ब्राह्मणो ग्रहणकं द्विगुणं गृहीत्वा पुरमध्ये गणिकां विडम्ब्य स्वगृहं ययौ । इति श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ पञ्चचत्वारिंशत्तमी कथा ॥ ४५ ॥

अथान्येद्युः प्रभावती शुकं पृच्छति । शुकः ।

५ याहि देवि गृहं मुक्त्वा यदि वेत्सि त्वमुत्तरम् ।
यथा करगरानाथः कृतवान्भूतनिग्रहे ॥

अस्ति देवि वत्सोमं नाम नगरम् । तत्र विद्वान्दरिद्रो ब्राह्मणः । तस्य प्रिया च करगराभिधाना यथार्थनाम्नी सर्वजन्तूद्वेगकारिणी यत्तद्वारदेशवृक्षस्थितो भूतस्तस्याः करगराया भयात्पलाय्याटव्यां गतः ।
१० ब्राह्मणो ऽपि तस्या उद्वेगाद्देशान्तराभिमुखो ऽभूत् । सो ऽपि च तेन

---

१) C (C_1 ?) विस्मितं für धिक्कृता । L om. च । LO द्विगुणं द्रव्यं । २) CC_1 om. स्व । O om. ययौ । LO om. इति — सुप्ता । ३) L इति कथानकं । O इति कथा । ४) CC_1 शुकं पृच्छति प्रभावती । LO om. अथान्येद्युः — शुकः । ६) C_1LO यथ । MM_1H यथेच्छं व्रज भद्रे वै यदि° । यथा कारागरानाथः° । A om. याहि° । ७) LO om. देवि । L वत्सनगरे । O वसे° । CC_1A वत्स्योमं । M वत्सनगर । M_1 वच्छोनगर । H वनका-नगर । G *Βατσομάν.* L दुर्गतो नाम ब्राह्मणः । O दूर्गतो ना वाडवः । om. CC_1A. MM_1(H) शांतधर्म दरिद्री ब्राह्मण । G *Κεσ-σάβας.* ८) LO तस्य भार्या करगराख्या यथार्था । सर्वजनोद्वेग° । om. यत् । CC_1 °कारिणी सा नित्यं भर्त्तारं सप्रेरपानहान् मारयति । ब्राह्मणस्तस्या उद्वेगाद्देशान्तराभिमुखो ऽभूत् । तथा पृष्टो ऽहं उपानहान् कस्य मारयामि तेनोक्तं द्वारस्थस्य वृक्षस्य मारयेत्युक्त्वा गतः । सापि तं वृक्षं प्रत्यहं मारयति । तद्वृक्षस्थो भूतः तस्माद्वृक्षाद्देशान्तरं [C_1 °न्तर] गतः । गतः सन् चिन्तयन् तत्राहं गमिष्यामि यत्रास्या भर्त्ता वर्त्तते । तमहमानयामि तमेवेयं मारयिष्यति । स्वस्थो ऽहं स्वस्थाने तिष्ठामि । इति निश्चित्य गतो भूतः । सो ऽपि च° । १०) LO तदुद्विग्नः सन्देशान्तराभिमुखो बभूव ।

भूतेन दृष्टो जल्पितश्च । मार्गश्रान्तस्त्वम् । तेन त्वयाद्य ममातिथिना भाव्यम् । विप्रेण भीरुणोक्तम् । यदातिथ्यं करोषि तद्विधेहि शीघ्रम् । भूतेनोक्तम् । न त्वया भेतव्यम् । त्वं मम स्वामी । यतो ऽहं त्वद्गृहद्वारवृक्षस्थो भूतः करगराभयेनेहागतः । ततस्तव निजस्वामिनो गुणवदुपकर्तव्यमेव । तस्मात्त्वं द्विज मृगावतीं राजधानीं मदनभूपतिसनाथां ५ गच्छ । तत्र चाहं तत्पुत्रीं मृगलोचनां ग्रहीष्ये । सा चास्मैर्मान्त्रिकैर्नीरुजा न भविष्यति । तत्त्वयि समागते तव दर्शनादेवाहं त्यक्ष्यामि । ततः परं तु मन्त्रवादो न विधेयः । इति भणित्वा सो ऽपि भूतो गत्वा तां राजपुत्रीं जग्राह । विप्रो ऽपि तत्र ययौ । तेन च डिण्डिमः स्पृष्टः । ततो राजकुलं गतो विप्र आचार्यविस्तरं विदधे । भूत १० आचार्यविस्तरे यावन्न मुञ्चति तावत्किं करोत्विति प्रश्नः । शुकः । भूतग्रहे ऽनिवर्तिते विप्रेणोक्तम् ।

---

१) LO दृष्ट्वा उपलक्षितः पृष्टश्च [O °त दृष्टश्च] । om. मार्ग° । om. तेन । यत्त्वया । om. अद्य । CC₁ ममातिना भव्यं । ३) LO त्वया न । CC₁ om. त्वं मम स्वामी । LO om. यतो ऽहं । त्वद्गृहवृक्षवासी अहं करगराभयान्नष्ट इहागतः । ४) LO om. निज । C गणव° । L गुणवत उप° । O गुणवत् उप° । ५) LO om. एव । पुरीं । CC₁ मृगावती । CC₁LO °सनाथं । ६) LO स । ७) LO om. तत् । तत्क्षणादेव मोक्ष्यामि für तव° । add त्वया [om. O] सुवर्णपंचशती [O °ति] ग्राह्या । ८) CC₁ om. ततः — विधेयः । LO om. तु । CC₁ इति भणित्वा तां राजपुरीं सो° । LO इति भणित्वा स भूतस्तां राजपत्नीं जग्राह [O भूतषां राजपुत्रीं] । ९) C₁ om. ऽपि । पापी । CC₁ om. च । LO तावता डिंडिमो [O डिंडीमो] वाद्यमानो तेन स्पृष्टः [CC₁O पृष्टः] । १०) LO om. ततो । गतो राजकुलं आचार्यविस्तरो विदधे । CC₁ भूतः ।

करगरणाहउ आइअउ भूअ एउ वीससिउ ठिउ धुत्त ।
आपणि बोलिउ संभरि रे कूडउं किं मइँ देव जुत्त ॥

उक्तं च । मनुष्याः सुकुलोत्पन्ना अपि च ब्रह्मचारिणः ।
न भवन्ति मृषावाचः किं पुनर्देवयोनयः ॥

५ ततो भूतः त्यक्त्वा जगाम । इयं मुक्तेत्युक्त्वा ब्राह्मणाय राज्ञा सुता राज्यार्धं च प्रदत्तम् । विप्रो ऽपि पूर्णमनोरथो जगाम । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ षट्चत्वारिंशत्तमी कथा ॥ ४६ ॥

---

१) CC_1 करगरनाटउ आयउ भूत यइ [C_1 पइ] वसासि उआय-उधूत [C_1 °घडकता] आपुणु [C_1 आपु] बोलिउ सांभरि रे कूठउ बो-लिउ कि मइ किमन देव ॥ A करगरनाठउ । आई भूतउ । एउ वि-सासी घाठउ धूत्तउ । आपणि बोली सांभरि हेठ । जूठउं किं मइ नहीं देव । LOMM$_1$H om. कर° । ३) CC_1 मनुष्या कुलुप्पन्ना अपि सद्ब्रह्मचारिणः [C_1 सद्दरचारिणः] । O सकुलो । L अपि स । O अपि च स ब्रा° । A मनुष्याः सकुलो° अपि सघृतचारिणा । ४) O om. न । मष्टावाचः । A किंमु न देवयोनयः । LO hinter °विस्तरं विदधे — भूतस्ता गतः । सा राजपत्नी [O पुत्री] नीरुजा जाता [O निरूजाता] विप्रस्य राज्ञा प्रसादो विदधे । मनुष्याः° । अथापरस्मिद्दिने [O °न्दि] व्यवहारिपुत्रस्य स [O om.] भूतो विलग्नः । तत्रापि स द्विज आहूतः । तं दृष्ट्वा भृकुटी [O °टि] भीषणो बभूव [O बभू] तं भूतं विकरालरूपं विलोक्य विप्रेण कर्णे लगित्वा एव-मुक्तं । यस्याः करगरायाः [O करगरा] भयान्नष्टस्त्वं [O भयन्नष्ट त्वं] चाहं चात्रागतावः स [O सा] करगरा अत्रागता [O करगरात्रा-गता] आस्ते [om. O] अहं [O आहं] यास्यामि । स [O ष] भूतस्तं देशमपि विहाय नष्टः । विप्रः सन्मानितः । एवं विप्रबुद्ध्या देशे सौख्यं जातं [O देशोख्यं संपन्न] इति श्रुत्वा सा प्रभावती [O °ति] सुप्ता । इति [om. O] कथा ॥ ५) C जगाममया । C_1 नगम-मया । ब्राह्मण । ६) C_1 जयाह ।

दिनमतिवाह्य प्रभावती शुकं पृच्छति । शुकः ।

गच्छ देवि गता वेत्सि यदि कर्तुं त्वमुत्तरम् ।
यथा करगरानाथः कृतवान्भूतसंकटे ॥

स करगरापतिः राजकन्यया सह राजलक्ष्मीं भुङ्क्ते । अत्रान्तरे स भूतः कर्णावतीं गत्वा राज्ञो भार्यां सुलोचनां जग्राह । सा मदनस्य पितृष्वसा । सा चात्यर्थं पीडिता जीवितशेषाभूत् । सापि शत्रुघ्नरपतेर्भार्या मातृराज्ञे केशवमान्त्रिकमाकारयामास । स च निजदूतान्प्रेषयित्वा केशवो ऽपि राज्ञा प्रियवाक्यैः प्रहितो ऽप्यगन्तुकामुकः । तदा स करगरापतिर्भार्यानुरोधतो जगाम । तत्र गतः सन्मानितो महीभुजा शत्रुघ्नेन गतः सुलोचनावेश्मनि । स च भूतस्समायान्तं दृष्ट्वा पक्षैर्वाक्यैस्तर्जयन्नित्याह । मया प्रतिपन्नमेकदेशे कृतम् । अधुना तु विप्र त्वया आत्मा रक्षणीयः । स च द्विजो न मन्त्रं न तन्त्रं विजानाति । कथं भवत्विति प्रश्नः । शुकः । तदा तं भूतं ज्ञात्वा कालवेदी कृताञ्जलिर्भूत्वा तत्कर्णमाश्रित्येति जगाद द्विजः ।

प्राप्ता करगरा भूत पृष्ठलग्नात्र मे ऽधुना ।
यद्भर्ता चात्र संप्राप्तस्तद्याख्यातुमिहागतः ॥
श्रुत्वैतद्वचनं भीतो भूतो विस्मितमानसः ।
यामीति ब्राह्मणं प्रोक्त्वा (!) पात्रं त्यक्त्वा जगाम तत् ॥

---

२) MM$_1$H गच्छ देवि परं वेत्सि° । ३) MM$_1$H कारागरानाथः । A om. गच्छ° । ४) CC$_1$ om. सा । मदनस्य कुबेरस्य । C$_1$ add च । ६) CC$_1$ पीडिता सा° । ७) C मांतृ° । CC$_1$ om. च । ८) CC$_1$ ऽप्यगामुकः । ९) C$_1$ °निरोधतो । १०) CC$_1$ om. च । ११) CC$_1$ मया प्रतिपन्नं एकदोषे । om. तु । १३) C om. शुकः । १४) CC$_1$ तत्तत्कर्ण° । १५) A om. प्राप्ता° । १७) A om. श्रुत्वैतद्वचनं° । १८) CC$_1$ याहीति । प्रोक्ता ।

तदा पात्रे स्वस्थीभूते शत्रुघ्नराज्ञा सत्कृतो ब्राह्मणो मृगावतीनगरं ययौ । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ सप्तचत्वारिंशत्तमी कथा ॥ ४७ ॥

अथान्येद्युः प्रभावती शुकं पृच्छति । गच्छामि नरान्तरमिति । शुकः ।

५ संभोगसुखमेवात्र परमं व्रज सुन्दरि ।
विषमे निर्णयं कर्तुं वेत्सि चेच्छकटालवत् ॥

पाटलीपुरपट्टने सार्वभौमो नन्दो नाम राजाभूत् । शकटालस्तस्य नृपतेः सचिवाग्रणीरभूत् । तद्बुद्धिविभवाक्रान्ताश्च भूपालाः सर्वे ऽपि करदा अभवन् ।

१० उक्तं च । अप्राज्ञेन च कातरेण च गुणः स्यात्सानुरागेण कः
प्रज्ञाविक्रमशालिनो ऽपि हि भवेत्किं भक्तिहीनात्फलम् ।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये
ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥

किं च । प्रज्ञागुप्तशरीरस्य किं करिष्यन्ति संहताः ।
१५ हस्तोपधृतच्छत्रस्य वारिधारा इवारयः ॥

---

४) LO om. अथा° — शुकः । ५) L कामिनि । O कामीनी । ६) L चेच्छकतालिवत् । O चेत्सीकता । MM_1H संभोगमाप्नुहि सुखं जारेण सह भामिनी [H °नि] °संकटारिवत् ॥ A om. संभोग° । ७) CC_1AMM_1H om. पाटली° । O पाटलीपुरे । LH नंदनो । LO om. नाम राजा । तस्य नृपतेः शकुटालिः [O सकटालो] सचिवाग्रणीः । MM_1H संकटारि । G Σαν-ταλής. ८) LO तद्बुद्धिराक्रांताः सर्वे भूपालाः कदाभूवत् [O भूपाला अभूवन्] । १०) C_1 अप्रज्ञानेन । A अच° । L न गुणः । om O. C_1 गुणाः । CC_1 स्वानुरागेण । O सुनुरागेण । १२) LO °विक्रमलक्ष्मयः [O °विक्रल°] । CC_1 भूतले । १३) CC_1 कलत्रमपरे । A चापत्स्वपि । MM_1HG om. अप्राज्ञेन° । १४) CC_1 प्रज्ञायुक्त° । LA करिष्यति । MM_1H om. प्रज्ञा° ।

स च राजा धर्मनाशकं कुर्वन्निर्द्रव्यां च मेदिनीं विदधानो निषिद्धो मन्त्रिणा । ततस्तेनापि मूर्खेण राज्ञा सचिवो ऽवटे निक्षिप्तः । स च सपुत्रस्तत्र चिरं तस्थौ । ततः शकटाले महामात्ये तत्रस्थे सर्वत्र मृतो मृत इति वार्त्ताभूत् । ततो वङ्गालनाथेन तत्परीक्षार्थं आत्मीयपुरुषा घोटिकाद्वयं समर्प्य नन्दपार्श्वे प्रेषिताः । यदेतयोर्मध्यात्का ५ माता का च पुत्री इति ज्ञात्वा समागन्तव्यम् । सर्वलक्षणसंपूर्णे सदृशे घोटिके तानि च लक्षणानि शालिहोत्रज्ञातव्यानि । यदा च को ऽपि नन्दराज्ये घोटिकानिर्णयं कर्तुं न क्षमस्तदा नन्दराजा व्यचिन्तयत् । शकटालं विनाहं परिभवास्पदं जातः ।

उक्तं च। भूमेश्च देशस्य गुणान्वितस्य भृत्यस्य वा बुद्धिमतः प्रणाशे । १०

भृत्यप्रणाशे मरणं नृपाणां नष्टापि भूमिः सुलभा न भृत्याः ॥

विचिन्त्यैवं दण्डपाशिकमब्रवीत् । यच्छकटालकुले कश्चित्कूपगतो विद्यते न वा । तेनोक्तम् । कश्चिदस्ति परं व्यक्तितो न ज्ञायते । यतः

---

१) LO om. च । CL °नाशकं [L चर्म°] । O चर्मनारायणकं । LO om. च । चकार für विदधानो । ततो मंत्रिणा निवारितः । २) C मंत्रिणं । LO ततश्च तेन राज्ञा मू° सपुत्रः सचिवोवटे क्षिप्तः चिरं तस्थौ । ततो महामात्येन [O °त्ये] तत्र तस्थे । ३) LO सर्वतोपि । ४) LO बभूव । बंगालदेशाधिपेन । सर्वलक्षणसंयुक्ते [O °संपूर्णे] सदृशे द्वे घोटिके प्रहिते [O घोटिद्वायं । Von hier bis L घोटिका om.] für आत्मीय° — प्रेषिताः । ५) L मध्ये । ६) L om. च । पुत्रीति । L[O] तत्रागतास्ते द्वे घोटिका दर्शयंति [O सर्वयंति] für सर्व° — ज्ञातव्यानि । ७) CC_1LO om. च । ८) CC_1 om. नन्दराज्ये । LO अक्षमस्तदा । नंदो राजा । CC_1 नन्दराजो । ९) LO शकटालिमंत्रिणं । परा [O य] भवास्पदं जातोहं । १०) C भूमेः स्वदेशस्य । O om. वा । बुद्धिमतः राज्यं तेषां मरणं° । L प्रणाशः । ११) L °प्रणाशो । AMM_1H om. भूमेश्च° । १२) LO इति विचिंत्य । दंडिमंत्रिण° [O दंड°] यदा शकटालि° कोपि कूपगतो [O कूपे] विद्यते कश्चिन्न वेति पृष्टे । १३) LO सम्यग्ज्ञायते ।

पूर्वोद्दिष्टं भक्तं कश्चित्कूपगतो गृह्णाति । तं च कूपादाकृष्य संमान्य च एवमुक्तवान् ।

मान्यस्त्वं मम मित्रं च गुरुः स्वामी नियोगकः ।
आश्रयस्य सदा दाता किं किं न त्वं सदानघ ॥

५ उक्तं च। स्वामी दुर्णयवारणव्यतिकरे शास्त्रोपदेशे गुरु-
विश्रम्भे हृदयं नियोगसमये दासो भये चाश्रयः ।
दाता सप्तसमुद्रसीमरसनादानान्तिकायाः क्षितेः
सर्वाकारमभूत्स्वयं वरसुहृत्को वा न कर्णो मम ॥

मन्त्रिणोक्तम् । स्वामिन्किं विधेयम् । तदादिश । राज्ञोक्तम् । अस्य १० वडवायुगलस्य मध्ये का माता का च पुत्री । इति संदेहममीषां क्षमात्मनां दूतानां शीघ्रं छिन्धि । स कथं छिनत्तु तत्संदेहमिति प्रश्नः। शुकः । ततो मन्त्रिणा तद्वडवायुगं सपर्याणं कारयित्वा वाह्याल्यामतिवाह्य पर्याणरहितं विधाय श्रान्तं संमोचितम् । तदनु तद्युगलं च मातृसुताविचेष्टितं चकार । माता जिह्वया सुतां लिलेह सुता च तां

१) LO पूर्वादिष्टं । om. कश्चित् । L सन्मान्यमेव एवमुक्तवान् । O सन्मान्यमेव मान्यमेव । ३) L नियोगिकः । O नियोगीकः । ४) CC_1 अथाश्रयः सदा । LO आश्रयस्य च दाता च । L किं न लभ्यं सदानघ । O किं क न त्वं° । AMM_1H om. मान्यस्त्वं° । A नीतिमार्गप्रवीणस्त्वं वेत्सि धर्मानशेषतः । सर्वशास्त्राणि तत्वज्ञो राजविद्यापि चक्षणः ॥ ६) O om. दासो भये । LO वाश्रये । ८) LO add तथा मे त्वं hinter मम । AMM_1HG om. स्वामी° । ९) CC_1 विधेयमित्यादि । १०) L °युगस्य । O यस्य वसवोपुग्रस्य । CC_1 om. मध्ये । LO om. च । ११) C om. दूतानां । om. स । LO संशयं छिनत्तु [O छीन्न] । om. इति प्रश्नः । १२) LO उत्तरं शुकः । om. तद् । L वाह्यामति° । O वाह्याह्यामति° । १३) CC_1 om. तदनु । LO om. च । १४) CC_1LO सुतामातृ° । L सुतां प्रति । O सुता तु तां ।

प्रति अतिवत्सलाभूत् । ततः सुमन्त्रिणा मातृसुताविशेषो राज्ञो ऽग्रे निवेदितः । ततश्च शकटालः परां लक्ष्मीं प्रसिद्धिं च लेभे । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ अष्टचत्वारिंशत्तमी कथा ॥ ४८ ॥

अथापरेद्युः दिनकृत्यं सा विधाय शुकमापृच्छते । शुकः । ५

संभोगसुखमेवाद्य भोक्तुं ते देवि युज्यते ।
विषमे ऽपि प्रवीणासि पुनश्चेच्छकटालवत् ॥

यथा पूर्वं तथैव वङ्गालनाथो यष्टिकां सुवृत्तां ध्वजाच्छिद्रिणीमयीं जीवच्छकटालपरीक्षार्थितैरेव पुंभिः प्रेषयामास । यथा युष्माभिर्नन्द-राज्ये गत्वा अस्या यष्टिकाया रत्नसुवर्णवज्रैरवचिताया आदिमन्तं १० ज्ञात्वा समागन्तव्यमित्यादेशात्ते पुमांसो नन्दपार्श्वमागत्य यष्टिकां तत्पु-रतो मुक्त्वा आदिमन्तं च पप्रच्छुः । तच्छ्रुत्वा प्रधानैः कलाभिज्ञैर्व-

---

१) LO om. अति । C_1 प्रति प्रतिवत्सला । CC_1 लुलत् für भूत् । LO om. सुमन्त्रिणा । °निर्णयो । L राज्ञे । O राज्ञो । २) LO om. च । शकटालिः । समृद्धिं für लक्ष्मीं । om. इति — सुप्ता । ४) L इति कथानकं । O इति कथा । ५) LO om. अथा° — शुकः । ६) L °सुखमेवात्र । ७) LO °लिवत् । MM_1H कर्तुं संभोगमेणाचि [M_1 °ची] व्रज ते यत्र रोचते । विषमे त्वं° संकटारिवत् ॥ A om. संभोग° । ८) LO om. पूर्वं । तथैवांगनाथो [MM_1H मंगळपुरचे राजानें] सुवृत्तां चिंचिणीमयां [O चीचिमायां] यष्टिकां [O om. यष्टिकां — अस्या] । C ध्वजा-च्छिद्रिमयीं । C_1 ध्वताच्छिद्रिणीमयीं । ९) L °शकटालिः परीक्षार्थं तैरेव । १०) LO रत्नखचितायाः । आद्यंतं । ११) LO om. इति । L राज्ञादेशात्ते । O राजादेशांति । LO पुमांसः प्रचलिता नंद-राज्ये समागताः । CC_1 om. तत् । LO अग्रे । १२) LO आद्यं-तविभागं [O आंद्यंवि°] । om. च । ततः für तच्छ्रुत्वा ।

शिम्बरैस्तोलिता अन्यैश्च कोविदैरवलोकिता परं केनापि आद्यन्तवि-
भागो न ज्ञातः । ततो राजा शकटालमादिशत् । यत्त्वां विना
आद्यन्तविभागं न को ऽपि जानाति । ततस्त्वया निर्णयो विधेय एव ।
ततो मन्त्री वदति । स्वामिन्युष्मत्कृता संभावनापि न निष्फला ।
५ उक्तं च । सुवंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् ।
छक्केषु व्यर्थया यत्र भूपतेर्भर्तुराज्ञया ॥ (?)
ततश्च स मन्त्री संभावितो ऽपि कथं ज्ञास्यतीति प्रश्नः । उत्तरम् ।
शुकः प्राह । ततो ऽसौ बुद्धिमान्मन्त्री यष्टिकां जले चिक्षेप । ज्ञातं
च । यतो यन्मूलं तदीषज्जले मग्नम् । तच्च नृपतेर्निवेदितम् । तेन
१० च तेषां दूतानामपि कथितम् । ततस्ते श्रुत्वा स्वराज्ञे न्यवेदयन् ।
ततश्च ते राजानो नन्दाधिराजस्य पूर्वजल्पितं करं ददुः । इति कथां
श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ एकोनपञ्चाशत्तमी कथा ॥ ४९ ॥

---

१) CC_1 °रैस्तोकं नन्दपार्श्वमालिता । कोविदैः किंचचैरवलो-
किता । २) CC_1 om. न । LO परं न कोपि निर्णयं कृतवान् । शक-
टालिमा° । CC_1 om. यत्त्वां — एव । ३) O om. ततस् । ४) O
om. मन्त्री । CC_1 om. वदति । L om. अपि । LO निष्फला
नैव । CC_1 निष्पन्ना । ५) LO सुवृत्तस्या° [O om. वदातस्य]
शशंकस्य च । ६) CC_1 क्क खेयुर्व्यर्थया । CC_1 भूयतेभर्तु° ।
AMM_1HG om. सुवंशस्या° । ७) LO om. स । CC_1 कथं च ।
LO शुकः उत्तरं वदति । ८) CC_1 जले निक्षिप्य यष्टिकां ज्ञा-
त्वा । ९) LO om. यतो । CC_1 om. यन् und तद् । L तदी-
षज्जले यन्मूलं लग्नं । LO om. तच्च । सारतस्तन्नृपते° । om. तेन च
तेषां । १०) CC_1 om. च । om. ततस्ते । LO गत्वा [O स्व-
गत्वा] für श्रुत्वा । ११) LO om. च । नंदस्य पूर्वोक्तं । L इति
कथां श्रुत्वा सा सुप्ता । O om. इति° । १३) L om. इति° ।
O इति कथा । C om. शुक° ।

अन्यदा प्रदोषे प्रभावती चलिता शुकं पप्रच्छ । शुकः ।

गच्छ देवि न ते दोषो गमने को ऽपि दृश्यते ।

विषमे यदि वेत्सि त्वं धर्मबुद्धिरिवेहितम् ॥

कथमेतत् । शुकः । अस्ति देवि धरापृष्ठे जाङ्गलाभिधो ग्रामः । तत्र मित्रद्वयं वर्तते धर्मबुद्धिर्दुष्टबुद्धिश्चेति । अन्यदा तौ द्वावपि धनाशया ५ देशान्तरं गतौ । कियद्भिर्दिनैः प्रचुरं धनमर्जयित्वा स्वग्राममागतौ परस्परं मन्त्रं चक्राते । यत्पिप्पलाधो धनं किंचित्क्षिप्त्वान्यद्गृहे नीयते । पश्चात्क्रमेण विभज्यते त्वयम् । इति कृत्वा तौ निजगृहं जग्मतुर्हृष्टतुष्टौ सुखास्वादतत्परौ स्थितौ । अत्रान्तरे यत्कृतं दुष्टबुद्धिना तन्निशम्यताम् । न च युज्यते वक्तुम् । १०

यतः । न वक्तव्यं ध्रुवं देवि पापं दृष्टं श्रुतं मया ।

कथापि खलु पापानामलमश्रेयसे यतः ॥

तेन च दुष्टबुद्धिना तद्द्रव्यमुत्पाट्य गृहीत्वा निजगृहमानीतम् । काल-

---

१) LO om. अन्यदा — शुकः । C_1 प्रदोषे स । २) O om. दोषो । MM_1H वर्तते । ३) MM_1H °रिवेप्सितं । A om. गच्छ° । ४) LO om. कथ° शुकः । CC_1 अस्ति देवि धरापृष्ठे ग्रामो वै लाङ्गलाभिधः । तत्र मित्रद्वयं धर्म्मदुःखधीरिति विश्रुतं ॥ LO om. देवि धरापृष्ठे । M मलगग्राम । M_1 मंगळ° । H मंगलपूर । G *Βαίλαγκάλα.* LO धनर्द्धिवान् तत्र । ५) LO धर्मधीः दुष्टधीश्चेति । CC_1 om. अन्यदा । तौ तु देशान्तरं गतौ धनाशया अर्जयित्वा धनं प्रभूतं स्व° । LO धनाय । ६) O देशांतरे । प्रचूरं । LO निजावासमागतौ । ७) LO परस्परमिति [O °मीति] कुरुतः [L कुरुत] । CC_1 गन्तव्यं für नीयते । LO यत्कियद्धनं पिप्पलस्याधो निक्षिप्या° । ८) CC_1 पश्चा° । L निजनिज° । O नीजं निजं° । CC_1 जगमतुः हृष्टपुष्टौ [C_1 °पृष्टौ] । LO गतौ । ९) O दृष्ट° । L °स्वादे तत्पुरौ । O °स्वादौ तत्परौ । ११) CC_1 उक्तं च für यतः । O देवी । L पाप । AMM_1H om. न वक्तव्यं° । १३) L तद्धनं । O दुष्टबुद्धनं । LO om. उत्पाट्य गृहीत्वा । CC_1 om. निज ।

क्रमेण च संमीलितौ पिप्पलाधःस्थितं द्रव्यं गृहीतुं गतौ यावदालो-
कयतः तावद्रव्यं नास्ति । धर्मबुद्धिस्ततो गत्वा मन्त्रिणो ऽग्रे आचख्यौ
धनवृत्तान्तं हृतं चापि कुबुद्धिना । कुबुद्धिनाहूतेन उत्तरं कृतम् ।
सहस्रस्य पणो मुक्तः । एतदर्थे शपथं दापयिष्यामि । मन्त्रिणोक्तमेव-
५ मेवास्तु । द्वितीयेनापि प्रतिपन्नं यदा तदा मन्त्रिणा प्रतिभुवौ गृही-
त्वा मुक्तौ गतौ गेहं पृथक्पृथक् । ततो दुष्टबुद्धिर्निजं पितरं विदि-
तार्थं कृत्वा वृक्षकोटरे चिक्षेप । प्रभाते सचिवस्तौ च वादिनौ कौ-
तुकी लोकश्च तं पिप्पलं ययुः । दुष्टबुद्धिः स्नातः कृताञ्जलिः सत्यं
कृत्वा जगाद । इदं सत्यं ब्रूहि नगोत्तम । यदि मया द्रव्यमपहृतं
१० तदानेन हृतमिति वाच्यम् । यदि न हृतं तदानेन न हृतमिति
वाच्यम् । इति श्रुत्वा तत्पिता नहीति जल्पितं सर्वलोकप्रत्यक्षम् ।

---

१) CC_1LO om. च । CC_1 om. संमीलितौ । LO पिप्पलस्याधः चिप्तं । CC_1 om. गृहीतुं und याव° । LO अवलो° । २) LO मंत्रिणोंतिकं । L आचचे । O आचख्ये । ३) O धनवृत्तां । CC_1 om. कुबुद्धिना । O om. कुबुद्धिना — द्वितीयेनापि । CC_1 सम्प्रति कुबुद्धिनाहूतेन । L om. आहूतेन । उक्तं । ४) CC_1 सहस्रस्य च । C पणे । CC_1 add इत्यर्थेहं न गन्तव्यं hinter मुक्तः । om. एतदर्थे शपथं । LO om. एत° — दाप° । CC_1 add यतः दुष्टबुद्धि-ना द्रव्यं हृतं hinter दापयिष्यामि । LO मंत्रिणा उक्तं । ५) CC_1 om. एव । CC_1LO om. मन्त्रिणा । ६) LO गेहं गतौ । O पृ-थक् । दुष्टबुद्दी । ७) LO °कोटरं । om. च । O om. वा-दिनौ । ८) CC_1 ययौ । दुष्टबुद्धिना कृकः कृताञ्जलिः सत्यं कृत्वा जगाद । ९) O कृत्य गाज । इति für इदं । CC_1 ब्रूहि सत्यं । L वृक्षोत्तम । O नागोत्तम । भव्यमहृतं । १०) LO तदा न कि-मपि वाच्यं । CC_1 तदनेन हृत° । ११) LO तदा वाक्यं । CC_1 om. इति श्रुत्वा । LO तत्पिता जल्पितं नहि ते च सर्वलोकसमक्षं [O नहीति । om. च] ।

ततो धर्मबुद्धिः कथं भवतु । इति प्रश्नः । तत्संदिष्टः शुकः प्राह ।
धर्मबुद्धिस्तं शब्दं तत्पितुर्ज्ञात्वा कोटरे वह्निं जज्वाल । तं पितरं को-
टरात्पूत्कुर्वन्तमर्धज्वलितं च पतितं दृष्ट्वा दुष्टबुद्धेर्निग्रहं विधाय मन्त्री
धर्मबुद्धिमानन्दयामास । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ पञ्चाशत्तमी कथा ॥ ५० ॥ ५

अन्यदा सा बाला शुकं पप्रच्छ । शुकः ।

याहि देवि रतास्वादलुब्धे कामिनि तं नरम् ।
गाङ्गिलवद्विजानासि विषमे यदि भाषितुम् ॥

प्रभावती ब्रूते । नाहं वेद्मि । तत्कथय । शुकः । अस्ति चमत्कारपुरं
नाम नगरम् । तच्च चतुर्वेदचतुर्वर्णचतुराश्रमसमाकुलम् । ततः कदा- १०
चित्तत्रस्था ब्राह्मणा वल्लभीनाथयात्रायां चलिताः गन्त्रीभिरश्ववाहनैः
सकौतुका वृद्धिमन्तः पूर्णपाथेयादिसामग्रीकाः सारनेपथ्याः सपुत्रक-

---

१) CC_1 कथं शुभमिति । LO om. इति — प्राह । उत्तरं शुकः । A bricht hier ab mit धर्मबुद्धिस्तु पितु शब्दः परिज्ञाय । २) CC_1 वह्निं कोटरे । तं दृष्ट्वा कोटरात्पतितं दुष्ट° । ३) O °र्ध-ज्वानं । LO om. च पतितं । कुबुद्धे° । CC_1 om. मन्त्री । ४) CC_1 धर्म्मबुद्धिरनन्दयत् । L om. कथां । O om. इति — सुप्ता । ५) L om. इति° । O इति कथा । ६) CC_1 प्रातः für अन्यदा । LO om. अन्यदा — शुकः । ७) L °स्वादि लुब्धा । O रतास्वा लुब्धा कामी । om. तं — भाषितुम् । MM_1H सत्वरं für तं नरं । ८) C गाङ्गिला° । L गांगिलेव । M गागलीव । M_1H लांगलीव । ९) LO om. प्रभावती — शुकः । MM_1H चक्राकरनगरी । १०) LO om. नाम — तच्च । C om. नाम नगरम् । C_1 om. नाम । LO °संकुलं । ततः एकदा तत्रत्याः [O om. तत्रत्याः] ११) CC_1 वल्लभा° । L °वाहैः । १२) L कौतुकादृ° । O कौतुका वृ° । CC_1 वुद्धिमन्तं पूर्व° । LO om. सार° ।

न्वाः । मार्गे चौरैर्गृहीतुमारब्धाः । ते ऽपि सर्वे भयाकुला नष्टाः । गाङ्गिलनामा विप्रस्तैर्विप्रैः सह गन्तुमशक्तः खञ्जः सन्समन्ततो गत्वारूढो धृतः । ततः स कथं भवत्विति प्रश्नः । शुकः । ततः सर्वेषु द्विजेषु नष्टेषु स शकटस्थः उद्भ्रान्तं भ्रातरं साहसिक इव जगाद । भ्रातः
५ कियन्तो गजाः कियन्तश्च वाजिनः सन्ति । इति कथय सतूणं च त्वं धनुरर्पय यथैतान्दिव्यास्त्रेण युगपन्मारयामि । इति वचः श्रुत्वा ते तस्कराः सर्वे ऽपि नष्टाः ।

तस्माद्यो भाषितुं वेत्ति धर्मे चार्थे स्मरे तथा ।
कस्तं धर्षयितुं शक्तो नरेषु कमलानने ॥

१० इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्तती एकपञ्चाशत्तमी कथा ॥ ५१ ॥

अतिक्रम्य दिवं प्रभावती त्रियामासमये द्विजं प्राह । व्रजामीति । शुकः ।

व्रजाभीष्टं नरं देवि यदि कार्यं निजं गता ।
जयश्रीरिव जानासि कार्यं कर्तुं निजं हितम् ॥

---

१) L तेन सर्वे भयाकुलाः नष्टाः । O ते सर्वे कुले नष्टाः । २) C सं गांगिल० । C_1 स गांगिल० । L गांगिलो नाम । O गांगी नाम । CC_1 om. विप्रस् । O om. तैर्विप्रैः । CC_1LO om. सन् । ३) L वेष्टितः, O घेढितः für धृतः । L प्रश्ने । O मस्ते । ४) LO add सत्सु । om. स । L शकटमुद्भ्रांतभ्रातरं । O शकटमद्भ्रांत० । C_1 सहसिक । O सहसीक । CC_1 इति für इव । ५) LO कियंतः [O ०तो] चौराः संति इति कथय । CC_1 शत्रूणां त्वं धनु० । LO om. च । om. त्वं । ६) L दैविकास्त्रेण । O देवींका० । LO om. युगपन् । CC_1 om. वचः । ७) LO om. सर्वे ऽपि । ८) MM_1H om. तस्माद्यो० । १०) LO om. इति — सुप्ता । C om. कथां । ११) LO इति कथा । C om. शुक० । १२) LO om. अतिक्रम्य — शुकः । CC_1 om. प्रभावती । १३) L नरं गता । १४) MM_1H ०कर्तुं परमसंकटे ।

32016

कथमेतत् । शुकः । शृणु देवि । अस्ति धरापृष्ठे प्रतिष्ठानं नाम पत्तनम् । तत्र सत्त्वशीलो राजा । तत्पुत्रो दुर्दमनो नाम । तेन इति चिन्तितं यन्मया स्वभुजोपार्जितमेव भोक्तव्यं न तु पैतृकमिति संचिन्त्य निजनगरं त्यक्त्वा समशीलैर्मित्रैः ब्राह्मणकाष्ठतक्षवणिक्पुत्रैः समं निर्ययौ देशान्तरोपरि । ततश्च तैर्मिलितैश्चिन्तितं यदस्माकं रत्नभूमिर्महोदधिः ५ सेवितुं युज्यते ।

उक्तं यतः। विद्यावतां कुलीनानां शौर्यसंपत्तिशालिनाम् ।
स्थानं नरेशभवनमथवा यत्ततो ऽधिकम् ॥

उक्तं च। सन्त एव सतां नित्यमापत्तरणहेतवः ।
गजानां पङ्कमग्नानां गजा एव धुरंधराः ॥ १०

विचार्यैवं सेवितः पयसां पतिः त्रिःसप्तकल्य उपोषितैस्तैः । ततस्तुष्टो ऽम्भोनिधिः तेभ्यश्चतुर्भ्यश्चत्वारि चिन्तामणिगुणानि रत्नानि ददौ ।

---

१) CC_1LO om. कथमेतत् । LO om. शुकः — देवि । CC_1LO om. अस्ति । LO om. धरापृष्ठे । H प्रतिष्ठा । २) LO om. तत्र । MM_1 सप्तशाल । H सप्तसाल । G *Σαττισσήλας*. L दुर्दुरो । O दुर्जनो und दुदुनो । MM_1H चातुर्य । G *Δουρδάμας*. LO स च मया° । ३) CC_1 om. तु । LO add स्वं hinter पैतृकं । ४) LO निजपुरं । °शीलिभिर् । CC_1 °काष्ठत्वष्ट्° । LO °तट्° । ५) CC_1 तत्र für ततश्च । O om. च । CC_1 मिलितं । रत्न° । LO °भूमिमहोदधिं । ७) LO om. उक्तं । O om. शौर्य° । ८) CC_1 वस्तुतोदधिः । LO यस्ततोधिकः । MM_1H om. विद्यावतां° । ९) CC_1 आपन्नरण° । $LOMM_1H$ om. सन्त° । MM_1H मेदिनी वसनी [M वसती] भूति बध्नानीव [H बद्धा°] पयोनिधी । रत्नान्यर्पयितुं [M रत्नाद्य°] तानि पुरः स कुरुते भुजान् [M भुजात्] ॥ ११) O विचार्यैव । CC_1 °छता उपोषितास्तैः । L पाथसांपतिं त्रिःसप्तल उपोषितैराराधितः । O यादसां पतिः चीसमप्तल° । १२) LO om. चतुर्भ्यश् । L प्रत्येकं प्रत्येकं चत्वारि चत्वारि° । O प्रत्येकं चत्वारि । CC_1 रत्नानि ददौ चिन्तामणिगुण [C_1 om. गुण] ।

निवृत्ताः कृतकृत्यास्ते लब्ध्वा रत्नचतुष्टयम् ।
विश्वस्ता वणिजः पार्श्वे सर्व एव समर्पयन् ॥

ततो दुष्टेन तेन लोभाभिभूतेन तद्रत्नचतुष्टयं जङ्घान्तरे क्षिप्त्वा सी-
वितम् । एकदा अन्यदा च मार्गे पूत्कृतं पश्चाद्दूरस्थितेन वणिजा
५ मुषितो ऽस्मीति वद्नैः । तैरुक्तम् । केन हेतुना । स आह । मम
मूत्रोत्सर्गार्थं पश्चात्स्थितस्य चौरैर् मात्रापहृता विद्यापि । एवं च
निवेदिते तैर्ज्ञातं पश्य धूर्तो ऽयम् । नूनमनेन वणिजा किमपि कूटं
कृतं भविष्यतीति मन्यमाना विवदन्तः ऐरावतीं पुरीं ययुः । तत्र च
नीतिसार इत्याख्यातो भूपतिः । तस्य च मन्त्री बुद्धिसारो नाम
१० जगद्विख्यातः । तस्यैवं प्रसिद्धिर्देशे देशान्तरे च यद्विवादिनां वचनमुक्त-
मात्रं जानाति । ततस्ते राजपुत्राद्यास्तस्मै मन्त्रिणे आचख्युः निजं रत्न-

---

१) LO °लब्धरत्नचतुष्टयाः । २) LO परस्परं विश्वस्ताः सर्वेऽपि वणिजः पार्श्वे एव तानि समर्पयन् । MM_1H om. निवृत्ताः° । ३) LO om. तेन । CC_1 om. लोभा° । LO तानि रत्नानि । जं-घामध्ये । CC_1 सीविता । ४) CC_1 कदा । च hinter °कृतं । L पश्चाद्वणिजा दूरस्थेन । O पश्चाद्दूरस्थेन वणिजा । ५) CC_1 वदन् । L वदानैर् । O वदतातैर् । LO om. तैर् । L हेतुना केन । CC_1 om. स आह । ६) LO मू° पश्चात्स्थितस्य मम रात्रौ चौरैर-पहृता [O मात्रा für रात्रौ] । om. विद्यापि । C मात्रापहृरता विद्यापि । ७) CC_1 om. ऽयम् । C_1 यदयं für पश्य । LO °निवेदि-तैर्ज्ञातं यदयं धूर्त्तः । om. नूनम् । ८) LO कृतमिति मन्य° । CC_1 इति इति । om. विवदन्तः । LO om. पुरीं । ९) LO नी-तिसारो भूपतिः । CC_1 om. च । om. नाम । MM_1H नि-त्यशालि [H °शाली] बुद्धिसागर । G Ἰραβατή. *Νητισάρας. Βουδδισάρας.* १०) CC_1 वा für च । पश्चादीनां वचनमुक्तमात्रं । LO nur देशान्तरे । विवादिना प्रोक्तमात्रं । ११) O om. ते । CC_1 तस्मै आचचुः मन्त्रिणे । L निज ।

गमनवृत्तान्तं यथा जातम् । तथैव निरीक्षास्माकं मध्ये रत्नजातं वध-
बन्धं विना पृथक्पृथक् एकैकं समर्पय । यदि च नार्पयसि तानि
ज्ञात्वा तदा प्रसिद्धिर्भुवि ते व्यर्थतां याति । बुद्धिसार इति श्रुत्वा
चिन्तावष्टब्धः स्थितः । स च राजा नीतिसारः कथं स्यादिति प्रश्नः ।
शुकः प्राह । यदा स मन्त्री रत्नचतुष्टयं तन्मध्ये स्थितं न जानाति ५
तदा विषण्णो गृहमाययौ । अत्रान्तरे मन्त्रिपुत्री प्राप्तनवयौवना पार्वतीं
नत्वा पितुर्नमस्करणाय गता जयश्रीनामधेया । पितरं तादृशं सचिन्तं
दृष्ट्वा विषादकारणं पृच्छति स्म । ततो मन्त्री यथास्थितमाचष्टे ।
सुता प्राह । तात मा विषीद । तेषां निर्णयमहं करिष्ये । ते वि-
वादिनः पुमांसो यदा कारणायागच्छन्ति तदा गृहे प्रेषणीयाः यथाहं १०
तन्मध्याद्रत्नजातहर्तारं समर्पयामि । स आह । पुत्रि यन्मया न ज्ञातं
तत्त्वं कथं ज्ञास्यसि । सा आह ।

न चैतत्तात वक्तव्यं भिन्ना बुद्धिर्हि देहिषु ।

---

१) CC_1 तथा निरीक्ष्य अस्माकं । LO तथैव च निरीक्ष्य ।
२) L एकैकं रत्नं । CC_1 यदि नार्पयसे तानि ज्ञात्वा तन्मध्यतोऽपि
तदा । LO यदि च मंत्री ज्ञात्वा नार्पयति तदा भुवि प्रसिद्धिर्य-
थार्थतां न [O om. न] याति । ३) LO om. श्रुत्वा । ४) CC_1 om.
चिन्ता° । L चिंतावष्टब्ध स्थितः । O चिंतावृषद्धः स्थितः । L रा-
जा नीतिसारोपि किमुत्तरं करोतु प्रश्नोत्तरे स्वयं शुकः । O om.
स च राजा — स्थितं । ५) L च für स । तन्मध्यस्थं । ६) CC_1
ततो । LO प्राप्तयौवना । CC_1 °यौवना पितरं दृष्ट्वा विषादका-
रणं पृच्छति । स यथा स्थितमाचष्टे नत्वा पितुर्नमस्करणाय समा-
गता जयश्रीरिनामधेया दीनं तादृशं पितरं सुता आह मा° ।
७) LO जयश्रीनामा । ९) CC_1 om. तेषां । करिष्ये इति वादिनी ।
१०) CC_1 कारणमायान्ति । LO कारणाय गच्छंति । CC_1 om. अहं ।
११) CC_1 रत्नजानं । स चाह । LO यत् मया । १२) O om. कथं
und सा । LO प्राह । १३) LO तत्र für तात । L येषु सर्वेषु
देहिषु । O om. भिन्ना बुद्धिर्हि । MM_1H om. न चैतत्तात° ।

को ऽपि किंचिद्विजानाति जगत्यत्र कलापरः ॥

किं च । मुण्डे मुण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः ।
तुण्डे तुण्डे नवा वाणी गेहे गेहे पतिव्रता ॥
प्रज्ञाविस्फारिताचाणां विद्रवन्ति विपत्तयः ।
५ हस्तोद्यतप्रदीपानामन्धकार इवायतः ॥

तस्मात्तात नात्र कापि चिन्ता कार्या । प्रस्थाप्यास्ते ऽन्यदेशिनः यथा तान्प्रबोधयामि । प्रस्थापितास्ते मन्त्रिणा तथापि स्नापिता भोजिताश्च पृथक्पृथक् शायिताः । ततः सा शृङ्गारं विधाय प्रधानं राजपुत्रं प्राह । अहं रत्यर्थिनी तव पार्श्वे समागता । त्वं च मह्यं काञ्चनशतं
१० दत्त्वा मां भुङ्क्ष्व । तेनोक्तम् । अहं तव द्रव्यं राज्यं चोपार्ज्य दास्यामि । परमधुना न किंचन विद्यते । इति तं निर्द्रव्यं ज्ञात्वा ब्राह्मणं गता । ब्राह्मणमपि पूर्वोक्तमेवोक्तवती । ब्राह्मणो जगाद । यदस्मत्पितुः पार्श्वे द्रव्यं शासनबद्धा भूमिरपि तत्सर्वं तुभ्यं दास्ये । तमपि निर्धनं ज्ञात्वा परित्यज्य सूत्रधारं ययौ । आह च सः । सांप्रतं मम पार्श्वे
१५ किंचिन्न विद्यते परं पश्चाल्लाचं दास्यामि । तमपि निर्द्रव्यं परित्यज्य

---

१) O कापि । L क्षते परः । २) L मुंदे । कुंदे । तुंदे । वयः । CC_1MM_1HG om. मुण्डे° । ३) O om. तुण्डे — विपत्तयः । ४) CC_1 प्राज्ञाविस्तरिताचानां । ५) LO °कारमिवायतः । MM_1H om. प्रज्ञा° । ६) LO om. तस्मात् । कर्तव्या तात नात्र चिंता । CC_1 प्रस्थाप्या ते । LO om. प्रस्थाप्यास्ते — शायिताः । ७) CC_1 प्रस्थापिता ते । ८) LO om. सा । ९) LO रतार्थिनी । O पार्श्वे । LO मां für मह्यं । १०) LO दत्त्वा भुङ्क्ष्व । om. अहं तव । राज्यं द्रव्यं । ११) CC_1 om. न । LO न किंचिदस्ति । O om. इति । CC_1 ब्राह्मण गता । १२) LO ययौ । तथैव गदितवती । L स प्राह द्विजः । O विप्रो तं जगाद । CC_1 यथा मत्पितुः । १३) CC_1 om. द्रव्यं । °बद्धां भूमिं । om. अपि । L om. तत्सर्वं । CC_1 om. तुभ्यं । १४) LO om. परित्यज्य — परित्यज्य । १५) CC_1 °लाचं ।

वणिक्सुतं ययौ । तथैव गदितवती । स आह । स्वामिनि रत्नचतुष्टयं गृहीत्वा मां भुङ्क्ष्व । ततो जङ्घायाः समाकृष्य रत्नजातं समर्पयामास । ततः सा सव्याजमुत्थाय शीलरक्षां कुर्वाणा जयश्रीर्गृहमाययौ । रत्नचतुष्टयं पितुरर्पयामास । मन्त्र्यपि तानाकार्य निजं निजं रत्नं समर्पयामास । ते ऽपि स्वरत्नलाभात्कृतकृत्या निजं निजं गृहं ययुः । इति कथां श्रुत्वा प्रभावती सुप्ता ॥ ५

इति शुकसप्ततौ द्विपञ्चाशत्तमी कथा ॥ ५२ ॥

अथापरेद्युः प्रभावती गमनाय शुकं पृच्छति । शुकः प्रोवाच ।

व्रज रम्भोरु युक्तं ते गमनं विषमे सति ।

चेत्कर्तुमुत्तरं वेत्सि चर्मकारकलत्रवत् ॥ १०

प्रभावती पृच्छति । कथमेतत् । शुकः । चर्मण्वतीनदीतीरे चर्मकूट इति ग्रामः । तत्र च दोहडो नाम चर्मकारः । तस्य देविका नाम भार्या परंपरपुरुषलम्पटा । ततः स चर्मकारश्चर्मणां क्रयणाय यदा

---

१) CC_1 om. तथैव गदितवती । LO प्राह । २) CC_1 गृहाण त्वाहं भुङ्क्ष्व । LO जंघामाकृष्य रत्नचतुष्टयमर्पयामास । ३) CC_1 om. ततः — पितुरर्पयामास । ४) CC_1 ततः [C_1 ततो] कार्यात्मामीयं रत्नं । LO रत्नं समर्पयति । ५) CC_1 °कृत्या गृहं ययौ । LO रत्नलाभान्निजं निजं गृहं ययुः कृतकृत्याः । ६) LO om. इति — सुप्ता । ७) LO इति कथा । ८) LO om. अथा° — प्रोवाच । १०) LO कर्त्तुं त्वमुत्तरं वेत्सि° । MM_1H उत्तरं वेत्सि कर्तुं चेच्चर्म° । [M_1H चेत्कम° । H कर्मकाल° ।] ११) LO om. प्रभावती — शुकः । CC_1 चर्मन्वती° । O चर्मवतिनदितीरे । LO चर्मकूटो [O °कुटो] ग्रामः । MM_1 चर्मकटग्राम । H चर्मण्वतीनगरीमें । १२) LO om. च । L द्रुहडो । O द्रूमोड । MM_1H होहा । LO चर्मकृत् । L देदिका । O देहीका । LO om. नाम । १३) LO om. परं । ततश्च । CC_1 om. चर्मकारश्च । C_1O चर्माणां । CC_1 विक्रयणाय ।

बहिर्निर्गतः तदा तया उपपतिः समानीतः । तयोश्चान्तः सुरतसेविनोः पतिश्चर्मसमायुक्तो बहिरागतः । ततः स उपपतिः सा च कथं भवेताम् । इति प्रश्नः । तत्पृष्टः शुकः प्राह । यदा च तया पतिर्ज्ञातः समागच्छंस्तदा इति वाक्यं वदति त्वरितं निःसृता ।

५ *

*

ततस्तद्वाक्यं श्रुत्वा भीतो मान्त्रिकमाकारणाय स मूर्खो भ्रमितुं गतो ग्रामे यावत्तावत्तया च निःसारितो जारः स्ववेश्म गतः । ततस्त्वमप्युत्तरं विषमे यदि वेत्सि तदा गच्छ । अन्यथा शयनं कुरु । इति
१० कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्तती त्रिपञ्चाशत्तमी कथा ॥ ५३ ॥

---

१) LO गतः । CC_1 तया च तदा उप° । LO आनीतः । CC_1 तयोश्चांतं । २) LO °युक्तो । CC_1 ततः स कथं उपपतिः सा च कथं भवत्विति । O तदातो für स । LO om. च । ३) O भवतां । LO om. इति — प्राह । nur शुकः । यदा पतिस्तया ज्ञातः । ४) C वदती? LO वदंती । L om. त्वरितं । LO वहिर्निर्गता । ५/६) CC_1 रूहं चूचुङ्कंचूकरऊंङ्गंआअउचलिहंनावहंमद्दं [C_1 मइं] उवाइपा [C_1 या] उ चलियउफिरियाखंलिगावह ॥ LO रूऋ [O रूह्र] चूचुक्र [O °ह्र] चूकर । तुतुहआइउवलि [O °ली] हउंनाचह । मयिआइउवोलिउंफिरियाखलिंगावह ॥ O om. नाचह — L गतो ग्राम । ७) CC_1 ततस्तद्वावयं । L इति तद्वाक्यात्मूर्खो भ्रमितुं गतो ग्रामपार्श्वे । C गतः । ८) LO om. यावत् । तदा च तया । O निःसारितः । LO स्ववेश्मतः । om. ततस् । यदि त्वमपि विषमे उत्तरं वेत्सि [O उत्तरं विषमे] । १०) LO om. कथां । सा सुप्ता । ११) L om. इति° । O nur कथा ।

अथातिवाह्य दिनं प्रभावती गमनोत्सुका पुनः शुकं पृच्छति । स प्राह ।

को दोषो गम्यतां देवि यदि त्वं वेत्सि भाषितुम् ।
दूतेन भाषितं यद्वद्विषमे नृपतेः पुरः ॥

प्रभावत्याह । कथमेतत् । शुकः । अस्ति शक्रावती नाम पुरी । तस्यां धर्मदत्तो नाम राजा धर्मादिगुणोपेतः । तस्यामात्यः सुशीलो ५ नाम । तस्य च सुतो विष्णुनामा संधिविग्रहिकः पूर्वमासीत् । तस्मात्पदाद्यदा भ्रष्टो द्रव्यहीनः कुलामात्यो ऽहमित्यहंकृतः कर्कशश्च । ततो राजा न किंचिद्ददाति । मन्त्री च कदाचिन्नृपमाह । देवास्य विष्णोरुपरि किमिति को ऽपि प्रसादो न विधीयते । राजा च तस्योपरि विमुखस्ततो न किंचिद्ददाति । पुनरप्युक्तं मन्त्रिणा । स्वामिन्नयं विष्णु- १० र्भक्तो रक्तः प्रवीणो दूतकर्मणि । तद्देवपादैः क्वापि प्रेषयित्वा

---

१) LO om. अथा° — प्राह । २) MM$_1$H गमने । ३) MM$_1$H विषमे विष्णुनामेव [H °न] राजदत्ते हि वेश्मनि [M$_1$H भस्मनि] । ४) LO om. प्रभा° — शुकः CC$_1$ अस्ति शक्रपुरीसमाना इलावती नाम पुरी । LO om. नाम । MM$_1$ शक्रवती । H शक्रवतीनहीकेतीर सुशील नाम राजा राज्य कर्ताथा तिस्के प्रधानता पुत्र विष्णु । G ἐν πόλει Σανεραβατῇ. ५) CC$_1$ तस्यां इलो नाम राजा । O तस्यां पुर्यां । दूलो । MM$_1$H सुशील । G Σομίλας. LO om. नाम । धर्मिकादिगुणोपेतः । MM$_1$H सुशील । G Σουσήλας. ६) LO om. च । विष्णुर्नाम [L °र्नामं] संधिविग्रहकरः [O संधीवी°] । CC$_1$ तस्माद्यदा भ्रस्तो । LO तस्मात्पदभ्रष्टो [O °भ्रयो] द्रव्यहीनो । ७) C कुलमानाभ्यामहङ्कृतः । C$_1$ कुलमानात्यामहंकृतः? कुलमानत्वोम°? LO कर्मशश्च । ८) LO न किमपि प्रादात् । तन्मंत्री । O व für च । om. कदाचिन् । LO नृपतिम् । ९) CC$_1$ किमपि प्रसादं । LO om. च । १०) L विमुखो भूतो । O विमुखभूतो । LO om. ततो । CC$_1$ न किञ्चिद्दितते । O वदतीति । LO add यतः आपद्यपेश [O °च] नालापो [O °लो] मानहारिरदर्शनं [O °हारीनीरदर्शनं] दोषोक्तिरप्रधानं [O °दानं] च विरक्तप्रभुलक्षणं ॥ ११) O om. रक्तः । CC$_1$ तद्देव । LO ततो देव ।

परीक्षणीयः । ततो राजा तद्वाक्यं श्रुत्वा तत्प्रतिकूलः सन्भस्मप्राभृतं
मुद्रया मुद्रितं समर्प्य शत्रुदमननृपपार्श्वे विदिशायां नगर्यां तं प्रेष-
यामास । सो ऽपि च तत्र गतस्तत्प्राभृतं भस्ममयमजानन्मुद्रितं राज्ञः
पुरो मुक्तवान् । तस्मिंश्चामङ्गलकारिणि प्राभृते राज्ञो ऽग्रे मुक्ते राजा
५ कोपाटोपसहितो बभूव । ततः स दूतस्तस्मिन्प्राभृते समानीते कथं
क्षेममवाप्नोतु । इति प्रश्नः । शुक उत्तरं प्राह । स विष्णुस्तं क्रुद्धं
दृष्ट्वा बुद्धिमानिदमुवाच । स्वामिंस्त्वदीयेन नाथेनाश्वमेधो यज्ञः कृतः ।
तस्य कुण्डस्य त्रेताग्निसंभवं पवित्रं श्रेयस्करमघापहं भस्म वन्दनाय
समर्पितवान् ।

१० यतः ।   गजाः सन्ति हयाः सन्ति विचित्राः सन्ति संपदः ।

---

१) CC_1 निरीक्षणीयः । L तं प्रति प्रतिकूलः । O तं प्रति-कूल । CC_1 °प्रावृतं । २) LO शत्रुंदम° । L om. नृप । CC_1 om. नगर्यां । CC_1O om. तं । MM_1H प्रतापशंकर । G „*ἐγχείρισον τοῦτο τὸ δῶρον τῷ Βασιλεῖ τῆς χώρας Ἄγκας*". ३) CC_1 om. भस्ममयम् । तस्मै अज्ञानान्मुद्रितं मुक्तवान् । P beginnt hier wieder mit °भस्मप्रावृतं मुद्रतमुक्तवान् तस्मींन्निवं मंगलकारिणिं प्रभातराज्ञो° । ४) CC_1 प्राभ्या für प्राभृते । ५) C °हसितो für °सहितो । P कोपात्सहितो । LO ततश्च । P om. स दूतस् । LO तस्मिन्प्राप्तश्च भस्मनि समानीते । CC_1 प्रभृते । समासीने । ६) P क्षम° । CC_1 °प्नोति । L आप्नोति । O आप्नोतु । L om. इति प्रश्नः । O om. इति । LO उत्तरं शुकः । P शुकः प्राह । om. उत्तरं । om. तं । LO add नृपं । सकोपं । P सक्रुद्धं । ७) P इदमित्याहः । L इदमाह । O इद प्राह । LO मम नाथेना° । P °नाथेन अश्वमेधयज्ञ कृतः । ८) L यत्तस्य । कुंडस्याग्नीध्राग्निसंभवं । O कुंडस्याचाग्निसंभवं । P चैयाग्नसंभवं । O सयपरित्रं । CC_1P पवित्र । P अवापहं । LO व्यथापहं [O om. प] । P वन्दायनाय समर्थितवान् । ९) LO प्रहितं । १०) CC_1 नृप für यतः । P om. यतः ।

त्वदीये च मदीये च दुर्लभं भस्म यज्ञिकम् ॥

इत्युक्त्वा सहसोत्थाय करे भस्म कृत्वा राज्ञे समर्पयामास । स च तेन वचसा तुष्टिपरो ववन्दे । तेनापि तुष्टेन प्रतिप्राभृतं महत्प्रेषितम् । स च विष्णुः संमान्य विसर्जितः । ततस्त्वमपि भामिनि विषमे उत्तरं जानासि यदि तदा गम्यतामन्यथा तिष्ठ । इति कथां श्रुत्वा प्रभा- ५ वती सुप्ता ॥

इति शुकसप्तती चतुःपञ्चाशत्तमी कथा ॥ ५४ ॥

अन्यदा यामिनीसमये प्रभावती गमनाय शुकमापृच्छति । कीर उवाच ।

गच्छ रम्भोरु गमनं युज्यते गजगामिनि । १०
यदि वेत्स्युत्तरं कर्तुं श्रीधरो ब्राह्मणो यथा ॥

---

१) P त्वदीयराज्यसंभारे दुर्लभं भस्म यज्ञजं । MM_1H सद्यः पापहरं राजन्दुर्लभं भस्म यज्ञजं । G om. गजाः° । २) LO इत्युक्ते [O °क्तः] स दूतः । P इत्युक्ता । CC_1P om. राज्ञे । LO स च राजा । ३) CC_1P om. तेन वचसा । L वंदे । O ववंदे.। P तुष्टायरो च नं एतेनापि° । C प्राभृत्यं । C_1 प्रभृत्यं । O प्रतिभृतं । P मृतं जहत्समर्थ प्रेषितं । ४) P सम्मान्ये विवर्जितः । LO om. च । सम्मानितो [O °नीतोपि] विसर्ज्जितश्च । ततः स [O om. स] स्वस्थानमायातः [O स्वनाथ°] तत्रापि सम्मानितः । यतो यदि मानिनि [O भामीनि] त्वमपि° । ५) CC_1P om. यदि । CC_1O तथा für तदा । L add त्वमपि । LO गच्छ नान्यथेति । L om. इति — सुप्ता । ७) L इति कथानकं । O om. इति° । P °संग्रहः । ८) LO om. अन्यदा — उवाच । P om. यामिनीसमये । CC_1 om. गमनाय । P प्रपच्छ । शुकः प्राह । १०) CC_1 युक्तं ते für गमनं । LO रंतुं त्वं । P गमने । LO गच्छगामिनि । ११) P यदि चेदुत्तरं । M गच्छ देवि न ते दोषो गमनं गजगामिनी° । M_1H गच्छ रंभोरु युक्तं ते° ।

प्रभावत्वाह । कथमेतत् । शुको ब्रूते । चर्मकूटे ग्रामे द्विजः श्रीधरो
नाम । तत्रैव चन्द्नाख्यश्चर्मकारः । तत्पार्श्वात् श्रीधरेणोपानद्युगलं
कारितम् । चर्मकारो ऽपि नित्यमेव द्रव्यं याचते । विप्रो ऽपि वद-
ति । त्वां हृष्टचित्तं करिष्ये । एवं सुमहान्कालो ययौ । स विप्रो
५ ऽन्यदा चर्मकारेण विधृतः । धनं विना स विप्रः कथं मुच्यते । तत्क-
थयेति प्रश्नः । उत्तरम् । शुकः प्राह । एतस्मिन्नन्तरे ग्रामपालस्य गृहे
सुतो जातः । ततो द्विजः प्राह छलान्वेषी सन् । चर्मकृन्मया पूर्व-
मुक्तम् । त्वां हृष्टचित्तं करिष्यामि । तदस्मिन्सुते जाते त्वं हृष्टचित्तो
न वेति । यदि स ब्रूते नाहं हृष्टचित्त इति तदा राज्ञा ग्राह्यः
१० स्यात् । अन्यथा च द्रव्यं याति । ततस्तेनोक्तम् । हृष्टचित्तो ऽहं जातः ।

---

१) LOP om. प्रभा° — ब्रूते । P चर्म्मकूटग्रामे । G *ἔν τινι κώμῃ*. LOP श्रीधराख्यः [P °ख्ये] । २) LOP om. एव । LO °भि-धश्चर्म° । P चन्द्नाख्यश्चर्म्मकारः । तत्पार्श्वे । O तस्पार्श्वात् । L om. श्रीधरेण । LO उपानद्युगं [O °कं] । P °पानयद्युगलं । ३) LO om. ऽपि । P वनिक् für नित्यमेव । LO om. एव । LOP om. ऽपि । ४) CC_1 रलिकावित्तं für हृष्टचित्तं । P महाकालो । LO अन्यदा स विप्रश्चर्म° । P द्रव्यं याचते कथं ववदिति प्रश्न द्रव्यं विना एतस्मिन्नन्तरे ग्रामपालस्य सुत संजातः प्राह छलान्वेषी für स विप्रो° । ५) CC_1 धनं विना यथा स विप्रो मुच्यते । LO om. तत्क° प्रश्नः । ६) LO om. प्राह । add द्विजेनोक्तं । एतस्मिन्नरे । om. गृहे । ७) LO संजातः । om. ततो — सन् । CC_1LO चर्म-कृत्मया [O धर्म°] । LO पूर्वमित्युक्तमासीत् । P om. पूर्वं । ८) P प्रोक्तं । CC_1 om. त्वां । रलिकावित्तं । O दृष्टचित्तं । P हृष्ट-चित्त त्वां करिष्य त्वमिदानीं हृष्टचित्तोसि नेति । LO करिष्ये । संजाते । CC_1 om. त्वं । रलिकावित्तो न बभूव । L हृष्टो । O दृष्ट्वा । ९) LO न वा । स यदि नैव [O नैवेति] ब्रूते । राजनिग्रहः । P स वदति चेन्नाचाहं हृष्टचित्तस्तदा राजपुरुषैर्बध्येते । CC_1 रलिकावित्त । १०) CC_1P om. च । P याचति für याति । CC_1 रलिकाचित्तो । L अधिकहृष्टचित्तो । O अधीकाचीत्तो । LO संजातः । P om. ऽहं । स्मि ।

ततो द्विजस्कन्धेनात्मानं विमुच्य गतः । ततो भामिनि यद्येवमुत्तरं जानासि तदा गच्छ । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ पञ्चपञ्चाशत्तमी कथा ॥ ५५ ॥

अथापरेद्युः प्रभावती गमनाय शुकं पृच्छति । शुकः ।

याहि देवि गता वेत्सि यदि कर्तुं त्वमुत्तरम् । ५
विषमे सान्तको यद्वद्वणिक्पुत्रः पुराकरोत् ॥

अस्त्यत्र विपथो नाम ग्रामः । तत्र सान्तको नाम वणिक् महाधनी कृपणो दुष्टशीलो ग्रामान्तरप्रियश्च । ततश्च ग्रामान्तरादुद्ग्राहणिकां कृत्वा आगच्छन्पथि चौरैर्धृतः स भामिनि कथं चौरभयान्मुच्यते । इति प्रश्नः । उत्तरम् । शुकः । स वणिक्पुत्र आत्मानं चौरैर्धृतं ज्ञा- १०

---

१) CC_1P om. ततो — गतः । LO om. ततो — सुप्ता । P यदेवं॰ । २) P गम्यतां । om. कथां । ३) LO इति कथा । P ॰संग्रहः । ४) LO om. अथा॰ — शुकः । P अथ प्रभावते प्रभावती॰ । प्रयच्छ । शुकः प्राहः । ५) P वत्सि । तमुत्तरं । MM_1H कर्तुं प्रभावति [M_1 ॰ती] । ६) L संतुको । O षंतुके । P शान्तिकायन्द्वनिक्पुत्र पराकरोत् । MM_1H ॰शांतिको नाम वणिक्पुत्रो यथाकरोत् । ७) CC_1LO om. अस्त्यत्र । LO विपथे ग्रामे । P त्रिपथा । MM_1H आनंदग्राम । C सान्त्वको । LO संतुको । P शान्तिको । MM_1H शांतिक । G Σαντιχας. LO धनी । P सधनी । ८) L om. कृपणो । LOP दुःशीलो । O ग्रामान्ते उत्तरं शुकः वणीक्सुतः आत्मानं für ग्रामान् । P om. च । L ततः स । O om. स । द्राहणीकां । P ग्रामान्तरा धनं गृहीत्वा । ९) LO कुर्वन् । P गच्छन् । O अगच्छन् । चौरो । P om. पथि । चौरैद्धृतः । हे वातिनि चौरिभयात्कः मुच्यतामिति प्रष्णः । LO स कथं मुच्यतां । १०) LO प्रश्ने । P शुकः प्राह । वनिक् । O वणिक्सुतः । चौरे । P चौरैद्धृतं ।

त्वा गलग्रहनाम्नो यचस्य समीपवर्तिनो ऽन्तिकं ययौ । तस्याग्रतश्च द्रव्यं मुक्त्वा हस्ते च खटिकामादाय यचाधीशमिदमब्रवीत् ।

धनोद्ग्राहणिका देव कृतेयं तव सर्वतः ।
इदं द्रव्यं मया लब्धं तिष्ठत्यन्यच्च वृद्धिमत् ॥

५ तं लेखकं च दृष्ट्वा यचधनमिति ज्ञात्वा तं प्रणम्य ते गताश्चौराः । स च द्रव्यं गृहीत्वा क्षेमेण गृहं ययौ । इति कथां श्रुत्वा प्रभावती सुप्ता ॥

इति शुकसप्ततौ षट्पञ्चाशत्तमी कथा ॥ ५६ ॥

प्रदोषे ऽन्यत्र सा बाला पुनः प्राह विहङ्गमम् ।
१० सुखं भोक्तुं व्रजाम्यद्य नरान्तररतोत्सवम् ॥
शुकः । याहि देवि यदा ज्ञाता भर्त्रा त्वं वेत्सि भाषितुम् ।

---

१) L धनग्रह° । O गलगृह° । P समीपस्थस्य यचस्य समीपे द्रव्यं मुक्त्वा । LO यचस्य समीपवर्त्तिकं यचाग्रतो द्रव्यं । CC_1 यस्याग्रतश्च । २) LO विमुच्य । om. च । C षटिकामादाय । C_1 घटिकामादाय । O षटिकामादाय । P om. हस्ते च । घटिका° । ३) L °ग्राहिणिका । O धनोग्राहीका । om. देव । देव für तव । P धनग्राहका दे तावल्लब्द्रमिति पठेतं लेखकं° । ४) LO ममालब्धं । O वृद्धीमत् । ५) C इमं तं । C_1 इदं तं । P om. च । दृष्ट्वा ज्ञात्वा लेखधनं च तत्प्रणम्य । om. ते । C_1 तत्प्रणम्य । LO तदद्य [O इदं ततो] लेख्यकं दृष्ट्वा ज्ञापय स्वधनं [O च°] क्क [O च] तत्प्रणम्य ते गताश्चौराः स क्षेमेण गृहं ययौ । ६) CC_1P om. च । P चमेण । गतः । LO om. इति — सुप्ता । ८) L इति कथानकं । O इति कथा । P °संग्रहः । ९) LO om. प्रदोषे — शुकः । १०) P भोक्तुं । °रतोत्सवः । ११) P शुकः प्राहः । CC_1 ज्ञात भर्त्तारं । C_1 भाषित । O भर्त्रें । P याहि याहि यदा ज्ञाता भर्त्तारं तेत्सि° ।

यथा ज्ञातः पुरा राज्ञावदद्विद्वान् शुभंकरः ॥

अवन्तीपुर्यां विक्रमार्को नृपः । तस्य चन्द्रलेखानाम्नी राज्ञी । सा राजपण्डितं शुभंकरनामानं कामार्ता इयेष रमते च दूतीदासीविपर्ययात् । नित्यं तद्गृहं गत्वा यदृच्छया क्रीडते । एवं च विलसतोस्तयोः पण्डितराज्ञ्योः प्रावृट्कालः समाययौ । यत्र च ५

तडिन्निर्घोषपटहो घनगर्जितगीतकः ।
शिखिस्वरजयध्वजः प्रावृट्कालनृपो ययौ ॥

---

apaśubandhayājin- (44. 14), "one, who does not perform the paśubandha-sacrifice".

ayujakāram (41. 11), gerund to *ayujaṃ karoti*: "in an odd number of times". Gopāla: *tribhiḥ pañcabhiḥ saptabhir ity evam ayugmaparyāyavṛttyā.*

avibhava- (56. 4, 9) in *iṣṭyavibhava, paśvavibhava-.*

ājyakumbha- (42. 5), one of the sacrificial utensils.

iḍapātra- (39. 1), one of the sacrificial utensils.

upasaṃveśana- (54. 7), "the act of praying (the wife of the deceased) to lie down by the side (of the corpse)".

upasādanīya- and *upāvaharaṇīya-* (39. 1; 38. 15), the names of the two kurcas, used at the agnihotra.

upoṣaṇa- (12. 19; 54. 9), "cremation" (the act of bringing the fires into contact with the corpse).

ekakapāla- (10. 12; 38. 12), compare C. 196.

ekabhukta- (40. 12), subst. neutr., "the act of eating once (a day)".

oyi (47. 7), interjection, compare C. 513.

kaṇṭūka- (45. 10), name of a plant.

karakūpa- (51. 8; 53. 2), signifies?

kumbhānta- (44. 12), "concluding with the (ceremonial of interring) the urn".

kṛṣṇakhura- (37. 7), "having black hoofs".

kṛṣṇasūtra- (51. 14), "a black thread".

kṛṣṇākṣi- (37. 7), adj. fem.: "having black eyes".

kṛṣṇagava- (35. 6), "drawn by black oxen".

grāmamaryādā (58. 12), "the boundary of the village".

cayanānta- (44. 13), "concluding with (the erection of) a śmaśāna".

chid + upa (33. 3) in *anupacchinnapravaṇa-*: "having uninterrupted declivity".

tatraloka- (53. 9), "the other world".

triviṣūka- (46. 9; 47. 2), "diverging into three directions".

dakṣiṇāpratigraha- (54. 8), name of certain mantras in the T. Ā.

dahanakalpa- (45. 1), "crematory rite".

dahanavat (42. 2; 59. 7), "as at the cremation".

dāruciti- (38. 8 etc.), "a pyre".

diṣṭagamana- (45. 5; 55. 10), euphemistic instead of *maraṇa-*, compare Rāmāyaṇa II. 103. 8: *diṣṭā gatiḥ.*

dīrghavaṃśa- (58. 10), "a long piece of bamboo".

dhūnvana- (37. 8) synonymous with *sigvāta-*; derived from *dhūnoti*, commonly *dhuvana-* (comp.: *dhūnana-*).

nāpitakarman- (44. 9), "the barber's work".

nivapanānta- (44. 12), "concluding with the haviryajñanivapana". Compare C. 401.

naidāghī (45. 7), name of a summer month.

pañcahaviṣ- (55. 7), adj. "consisting of five kinds of haviṣ".

parītāna- (46. 2), "the act of stretching the cord round".

pātracaya- (44. 11) = *pātracayana-*.

piṣṭasaṃyavana- (38. 13), one of the sacrificial utensils.

puruṣāhuti- (15. 15; 33. 1), "the oblation of a man".

pāthikṛtī (sc. iṣṭi) (55. 8), "a sacrifice to Agni pathikṛt".

brahmamedha- (54. 1; 55. 3; also Baudh. in the 2nd praśna), compare C. 52. 615.

bhartṛsūkta- (54. 7), name of certain mantras in the T. Ā.

mṛtyusūkta- (54. 11), id.

yajñalopa- (56. 10), "disturbance of the sacrifice".

vijanana- (41. 5), "the act of bearing childern".

vidhṛtiloṣṭa- (49. 1; 50. 10), "a clod of earth to serve as a separation".

viyūṣka- (39. 3) "being without gravy", compare the subst. *yūṣ* (T. S. VI. 3. 11. 1).

saṃvāditṛ- (46. 10), "holding a colloquy".

saṃgāhana- and *saṃgāhante* (37. 8; 54. 11 and 40. 2), compare C. 275.

sthalārtha- (45. 8), compare C. 486.

sphigdaghna- (50. 5), "reaching to the hip".

hṛdaya- (54. 8), name of certain mantras in the T. Ā.

The sūtras of this text have also been divided by the wedge (˘), on the whole as Gopālayajvan separates them in his bhāṣya.

III. The Gautamapitṛmedhasūtra.

I have not been able to give a critical edition of this pitṛmedhatext. What I offer is only an attempt to reconstruct the text as it lay before the writer of the bhāṣya. Copies of the Gautamapitṛmedhasūtra probably exist in Southern India; they are perhaps more commonly known as the Gautamīyavidhi or simply the "Vidhi"; but I have not been able to verify this statement, much less to obtain other copies of this work [1]). So the only manuscript I could consult, was:

Gautamapitṛmedhasūtravivaraṇam by Anantayajvan, No. 177 of the collection MSS. presented by Burnell to the India Office Library (see Burnell's Catalogue of a collection Sanskrit MSS., 1870, page 57).

The manuscript consists of 56 palmleaves, 8 lines a page, in Grantha-writing; although very small and trying to the eyes, the writing is fair and without many clerical errors. When, where and by whom the present copy was made, may be inferred from the data at the end:

---

1) After my manuscript of the pitṛmedhatexts had been sent to the printing office, I became acquainted with Kṛṣṇa Dīkṣita's aurdhvadehikaprayoga (MS. Ind. Off. No. 481). On this MS. see C. page IX. A few extracts of the prayoga have been given as appendix to the Gautamapitṛmedhasūtra. [corr. n.]

siddhārtivatsare kanyāmāse pakṣe valarkṣake
ṣaṣṭhyāṃ tithau bhānuvāre lakṣmīnārāyaṇe pure
vāsovedavidāṃ śreṣṭho dāso veṅkaṭarāghavaḥ
lilekhāparabhāṣyañ ca tiraskṛtasudhārarasaṃ (sic)
śrīkṛṣṇabhaṭṭācāryasya sūnunānantayajvanā
kavīyasātābhaṭṭena racitaṃ sarvakāmadam.

. . . *lakṣmīnārāyaṇapuravāsino velāmūrpaṅtyaṃgiveṅkaṭarāghavasyedaṃ pustakam aparabhāṣyam.*

This Gautamatext, as we have it in Anantayajvan's Vivaraṇa, consists of two paṭalas, each of which is subdivided into seven khaṇḍas. The pitṛmedha proper, i. e. the funeral rite, is treated in the first paṭala and khaṇḍa 1 and 7 of the second; the śrāddha in II. 2—6. The numbers of the sūtras have been added by me.

Nobody, who has ever made an attempt at reconstructing out of a bhāṣya or vivaraṇa the original text that served as base to it, will wonder, when I confess that in many instances I have been in the greatest uncertainty as to whether what I read was to be taken as sūtra or as vivaraṇa; in texts of this kind the sūtra has indeed often enough been replaced by the vivaraṇa. On the whole, however, the text here offered may with some certainty be regarded as the text, Anantayajvan had before him, when he composed his vivaraṇa. With this result I have contented myself, although it may easily be proved that the redaction, Anantayajvan had before him, was often a corrupted one. It is to be hoped, that more copies of the sūtra itself or of the vivaraṇa will come to light, to correct my attempted reconstruction of the sūtra, which is in some passages mere guess-work.

That this pitṛmedhatext is one of the very last products of Vaidic literature and one of the last offshoots of the sūtra-period, is sufficiently clear from the wording of the text itself and the disposition of the materials treated in it. Of the mass of evidence, the text itself affords, I mention only: the redaction of the mantra in I. 1. 27, where the original plural has been changed into a singular, in order to adapt it for an anāhitāgni; *te*, in *jānātu te*, proves that the original redaction was *jānantu te*, compare Hir. XXIX. 7 s. f., the sec. Baudh. sūtra and C. 339; the expressions *dvitīyāntaṃ nāmoktvā* (I. 2. 7; I. 4. 7) and *pretasya nāma sambuddhyantena gṛhītvā* (I. 3. 13); the pleonastic *sigvātena vātaṃ prayacchanti* (I. 2. 37) and *sāmagānam anugītaḥ* (I. 3. 20); the

mention of the policeman (*rājapuruṣa*, I. 4. 4); the incorrect *vāsodakam* instead of *vāsa-udakam* (I. 4. 7); the reading *citāyāṃ* (from the younger *citā*) *vāhitam*, replacing an older *citāv āhitam* (II. 7. 11). On the evidence of the śrāddhakalpa, compare: Bijdragen tot de taal- land- en volkenkunde van Ned. Indië, VIe volgreeks, deel I, p. 99 sqq.

The external evidence furnished especially by the comparison with other kindred texts, are numerous. On a previons occasion, in a treatise „der Gautamaśrāddhakalpa, ein Beitrag zur Geschichte der Sāmavedaschulen" (Bijdragen VI. 1. p. 97), I endeavoured to prove, that the śrāddhakalpa contained in our sūtra (II. 2—6) was that of the Rāṇāyanīyas, and younger than the śrāddhakalpas attributed to Kātyāyana and Gobhila. I also pointed out, that in this śrāddhakalpa the influence of those kalpatexts, whose home is especially the southern part of India (Baudhāyana-, Āpastambatexts), is unmistakable. The same observation holds for the entire Gautama sūtra. The greater number of the rites described in it, are to be traced in the sūtras of Southern India, particularly in the secondary sūtra of Baudhāyana. Closely cognate is also the Vaikhānasasūtra. For parallelpassages and conformity of rites it suffices to refer the reader to the description of the funeral rites in "die altindischen Todten- und Bestattungsgebräuche", passim.

The only proof, that our sūtra is ascribed to Gautama, is the introduction of Anantayajvan, see Burnell in his Catalogue of a collection Skt. MSS. l. c. But that it is closely connected with the sūtras of Drāhyāyaṇa (the sūtra of the Rāṇāyanīyas), and follows t h e s e rituals and not those of Lāṭyāyana, is proved by the last chapter (II. 7), where the text of sūtras 7—32 (incl.) is the same as that of Drāhyāyaṇa XXIII. 4. 16—23 (readings of the Grantha-MS.)[1]); only in two places there is a slight difference: *karṇayor vā* of Gautama (pi. sū. II. 7. 15) is not found in Drāhyāyaṇa, and instead of *pṛṣadājyena pūrayitvā* (Gaut. l. c. 32), Drāhyāyaṇa has *pṛṣadājyavanti*. There is, however, a difficulty connected with the repetition of this part of the Drāhyāyaṇasūtra. As it must be taken for granted, that a follower of the Rāṇāyanīya school ought to be acquainted with both the śrautasūtra of

1) To Dr. Reuter at Helsingfors I am indebted for the collation of this chapter of Drāhyāyaṇa.

Drāhyāyaṇa and with the gṛhyasūtra of Khādira, why is this whole passage of Drāhyāyaṇa repeated here? Apparently for the same reason, why in the śrāddha (Gaut. pi. sū. II. 4. 7) a whole passage of the Sāmavidhānabrāhmaṇa is repeated, while in the older Gobhilaśrāddhakalpa the passage had been indicated (as might be expected) by the words *pitryā saṃhitā*, *mādhucchandasī saṃhitā* etc. The cause of this irregularity is either the fact, that the texts in question were being forgotten, or the practical desire to have the whole of the rites together, without reference to other texts. Whichever of these alternatives may be accepted, either will be in favour of my assertion, that this Gautamatext is one of the youngest offshoots of Vaidic and ritualistic literature.

In my notes on the Gautamasūtra, I have given here and there short extracts of Anantayajvan's vivaraṇa. His remarks are generally of little value: he is uncritical, his view is limited, he does not compare his text with other sūtratexts. And yet nothing advances the right understanding of ritualistic texts more than a comparison of kindred texts, nay, this comparison is, I should say, a conditio sine qua non for the right understanding of a text of this kind.


In conclusion I have to express my sincerest thanks to Dr. E. Hultzsch, Government Epigraphist at Baṅgalore, for providing me with copies of some valuable Tanjore-MSS., to Prof. Kern of Leiden for reading a proof of the texts, to the Chief Librarians of the India Office and the Court and State Library at Munich for the liberal manner in which they have lent me their MSS. and to Prof. Windisch, through whose kind mediation the texts have been printed at the expense of the German Oriental Society.

Breda, August 1896.

The Editor.

अथ

वौधायनपितृमेधसूत्रम्



अथ यद्याहिताग्निर्निर्मारं गच्छत्युपतपता वा जरया वाग्निष्ठ एवास्य यजमानायतने शयनं कल्पयेयुर्जघनेन गार्हपत्यमन्तरक्षि भक्षानाहरन्ति यावदलं भक्षाय मन्यते ऽस यद्यगदो भवति पुनरेति ऽयद्यु वै प्रैति न पयः समासिञ्चत्येथैतदग्निहोत्रं सायमुपक्रमं प्रातरपवर्गमाचार्या ब्रुवते ऽ
5 तत्रोदाहरन्ति स यदि सायं हुतेऽग्निहोत्रे प्रेयात्प्रतिक्रम्य प्रातरग्निहोत्रं जुहुयादेथ यदि प्रातरग्निहोत्रे हुते कुशलमेथेमौ दर्शपूर्णमासौ पौर्णमास्युपक्रमावमावास्यासंस्थावाचार्या ब्रुवते ऽतत्रोदाहरन्ति स यदि पौर्णमास्यां वृत्तायां प्रेयात्प्रतिक्रम्यामावास्यायां यजेतोऽथ यद्यमावास्यायां वृत्तायां कुशलमेथ यस्योभे पर्वणी व्यतिपन्ने स्यातामतिपन्न-
10 प्रायश्चित्तं कुर्वीतोऽथ यद्यार्तस्याग्निहोत्रं विच्छिद्येत यदस्य पुत्रो वान्तेवासी वालं कर्मणे स्यात्सोऽरण्योरग्नीन्समारोह्योद्वसाय मथित्वाग्नी-

---

2. संकल्पयेयुः T; कल्पयेयुः H Bü. — °पत्यंतरक्षि T (pr. m.); °पत्यमंतरक्षि T (sec. m.); °पत्यंतदक्षि H Bü. The original reading °पत्यमंतरक्षि may at first have been corrupted into °पत्यमतरक्षि, then into °पत्यमतदक्षि, and finally into °पत्यंतदक्षि.

3. 4. Comp. Baudh. pi. sū. II. 1: यद्यो एतन्न पयः समासिञ्च्यामिचार्थं पयोवशेषयेयुरित्येवेदमुक्तं भवति.

6. हुते om. T. In a quotation by Gopālayajvan the word is given.

8. प्रतिक्रम्यामावास्यांयज° H Bü; प्रतिक्रम्यामावास्यायां T; this passage is found also with °मावास्या, °मावास्यया.

9. 10. For the atipannaprāyaścitta comp. Āp. śrs. IX. 4. 2.

11. Uncertain: वालंकर्मणस्यात् T; वालंकर्माणस्यात् (कर्मणि?) H Bü. In the II[nd] Baudh. praśna the same expression occurs a few times, written as T gives the words here.

न्विहृत्याग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपतिऽशरावं दक्षिणां ददातिऽसा प्रसिद्धेष्टिः संतिष्ठतेऽथ यदि विप्रक्रान्ते प्रेयात्तूष्णीमेतं तन्त्रं संस्थाप्यापो भक्षानभ्यवहरेयुरपो भक्षानभ्यवहरन्तीति विज्ञायतेऽथास्याग्नीनुपनिर्हृत्येमां दिशं विहारं कल्पयित्वा दक्षिणाप्राचीमेषा हि पितॄणां प्राची दिगिति विज्ञायतेऽथैनमादायान्तरेण वेद्युत्करौ प्रपाद्य जघनेन गार्हपत्यमुपसादयन्त्येव हविर्निरुप्यत इत्यथैनमादायान्तर्वेदि प्राक्शिरसमासादयन्त्येव हविरासाद्यत इत्यथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा प्रेतस्य दक्षिणं बाहुमन्वारभ्य जुहोति परेयुवांसं ॥ १ ॥

परेयुवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानं । वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्यत स्वाहेत्येतयैव गार्हपत्ये जुहोतिऽतूष्णीमन्वाहार्यपचने हुत्वाथैनमादायान्तरेण वेद्युत्करावुदङ्ङुपनिर्हृत्याथैनं परिश्रयन्तिऽतस्य दक्षिणा द्वारं कुर्वन्त्यथास्य केशश्मश्रु वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीताथास्य दक्षिणं कुक्षिमपावृत्य निष्पुरीषं कृत्वाद्भिः प्रक्षाल्य सर्पिषान्त्राणि पूरयित्वा दर्भैः संसीव्यतिऽतदु तथा न कुर्यात्क्षोधुकास्य प्रजा भवतीति विज्ञायतेऽपि वा सपुरीषमेवाप्लाव्याक्षाल्यालंकृत्याथैनमादायान्तरेण वेद्युत्करौ प्रपाद्य जघनेन गार्हपत्यमासन्द्यां कृष्णाजिने दक्षिणाशिरसं संवेश्य शिरस्तो नलदमालां प्रतिमुच्य पत्तोदशेनाहतेन वाससा प्रोर्णोतीदं त्वा वस्त्रं

1. Comp. Āp. śrs. IX. 8. 5.

2. Comp. Baudh. dhś. II. 17. 23; विप्रक्रान्ते (sc. तन्त्रे or अग्निहोत्रे) comp. Āp. śrs. VII. 7. 5. — Uncertain: एतंमंत्रं T; एतंतन्त्रं H Bü.

7. °सादयत्व° T (twice); °सादयंत्व° H Bü and quotation by Gopālayajvan.

11. स्वाहेत्येतयैव H Bü; स्वाहेत्येतेनैव T.

12. 13. उदङ्ङुनिर्हृत्य H Bü; उदंगुपनिर्हृत्य T.

13. °श्रयंति H Bü; °श्रयति° T.

प्रथमं त्वागन्नित्यथैतरदपोहत्यपेतदूह यदिहाबिभः पुरा । इष्टापूर्तमनु-
संपश्य दक्षिणां यथा ते दत्तं बहुधा विबन्धुष्वित्यथास्य पुत्रो वान्ते-
वासी वा पत्नी वा परिदधीत ˇ तदु हाजरसमेव वसीताहःशेषं वाथ
त्रीन्कृष्णलानुपकल्पयतेथ यदि न कृष्णला भवन्त्यन्तर्वेदि परागवहतानां
5 कृष्णानां व्रीहीणामन्वाहार्यपचने त्रींश्चरूञ्छ्रपयन्त्येकं वा ˇ गार्हपत्य
आमिक्षां श्रपयन्त्यथैतान्संभारानुपकल्पयते दधि च सर्पिर्मिश्रमाज्यं
चोदकुम्भं च दर्भांश्च परिस्तरणीयान्हिरण्यं चाजं च शासं चेडमूनं च
कुम्भीं च प्रच्यावनीं सिकताश्च शुल्वं च तिस्रश्च पर्णशाखाः ˇ कथमु
खल्वेनं दहेयुरिति ˇ यो बह्वयाजी स्यात्तं पूर्वाग्निना दहेयुरित्येतदेकमें-
10 वर्ह्निरेनं दहेयुरित्येतदेकं ˇ निर्मथ्यैरेनं दहेयुरित्येतदेकमुत्तपनीयैरेनं दहे-
युरित्येतदेकमपि वा तिस्र उलपराजीरादीप्य यथाप्रयः संगच्छेरन्त-
त्रोल्मुकमादीप्य तेनैनं दहेयुरित्येतदपरमथातोनुस्तरणीकल्पः ॥ २ ॥

अथातोनुस्तरणीकल्प ˇ आनयन्त्येतां कृष्णां कूटां जरतीं मर्खां
तज्जघन्यामनुस्तरणीं पदि बद्धा ˇ सव्ये पदि बद्धा भवतीति विज्ञायत ˇ
15 एतस्मिन्कालेस्यामात्यास्तिसृभिस्तिसृभिरङ्गुलीभिरुपहत्य पांसूनंसेष्वावपन्ते
खल्वघन्नास्याघन्नो एवाघमित्यथास्य भार्याः कनिष्ठप्रथमाः प्रकीर्णकेश्यो

---

2. °ष्वित्यथास्य H Bū; °ष्वितितस्य T.

3. So Pi. Sā.; हाजरसामेव H Bū; T corrupt.

4. °च om. T.

10. So T; निर्मथ्येनं H Bū.

14. सव्यपदि H Bū; सव्यपति T.

15. तिसृभिः once only T, Pi. Sā.; twice H Bū, Gṛhyaprayoga.

16. The mantra seems to be hopelessly corrupt. Bū: खल्वघ(or व)न्वा(or चा)स्याध्वं(or दं)नोप(or ए)वाघम्; H: खल्वचान्वास्या(or स्या)ध्वं(or दं)नोप(or ए)वाघम्; T: खल्वघन्नास्याखंनोएवासम्. Keśavasvāmin seems to give: खल्वघन्नास्यघ(or व)न्नोएवाहम्. The Prayogamālā, part III, fol. 11. b: खल्वाघन्नास्याघन्नोएवाघम्. Gṛhyaprayoga: खल्वखल्वन्वासोघन्वोएवागम्.

व्रजेयुः पांसूनंसेष्वावपमानाˇ एतस्मिन्काले गार्हपत्ये पालाशं काष्ठमा-
दीप्याथोल्मुकप्रथमाः प्रतिपद्यन्तेऽथ स्वधितिरथाप्ययोथ पाचाग्नि दध्याज्यं
दर्भा राजगवीति यद्यान्यदप्येवं युक्तमथैनमेतयासन्द्या तल्पेन कटेन
वा संवेष्ट्य दासाः प्रवयसो वा वहेयुरथैनमनसा वहन्तीत्येकेषामेनच्चे-
द्युञ्ज्यादिमौ युनज्मि ते वह्नी असुनीथाय वोढवे । याभ्यां यमस्य
सादनं सुकृताश्चापि गच्छतादितिˇ समोप्याग्नीन्हरन्ति समारोप्य वान्त-
रेण वा हत्वाग्नीन्हरन्त्यथैनमाददत आदीयमानमनुमन्त्रयते पूषा त्वे-
तश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः । स त्वैतेभ्यः परिददात्पि-
तृभ्योऽग्निर्देवेभ्यः सुविदत्रेभ्य इतिˇ तृतीयमेतस्याध्वनो गत्वा निदधात्य-
थैतेषां छगलानामेकं शस्त्रेण प्रच्णीत्यथ यदि न छगला भवन्ति चरुं
मेक्षणेन प्रयौतिˇ यद्यु वा एक एव भवति चरोस्तृतीयं मेक्षणेन प्रयूय
लोष्टानुपसंहृत्य तेषूपमृज्य कनिष्ठप्रथमाः प्रकीर्णकेशास्त्रिरपसलैः परि-
यन्ति सिग्भिरुपवातयन्तˇ एवममात्या एवं स्त्रियःˇ संयम्य केशान्यथेतं
त्रिः पुनः प्रतिपरियन्त्यथैनमाददत आदीयमानमनुमन्त्रयते पूषेमा
आशा अनुवेद सर्वाः सो अस्माँ अभयतमेन नेषत् । स्वस्तिदा
आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रविद्वानित्यर्धमेतस्याध्वनो गत्वा नि-
दधात्यथैतेषां छगलानामेकं शस्त्रेण प्रच्णीत्यथ यदि न छगला भवन्ति
चरुं मेक्षणेन प्रयौतिˇ यद्यु वा एक एव भवति चरोरर्धं मेक्षणेन प्रयूय

---

1. So T; after **आवपमाना** H Bü repeat the mantra, but compare Prayogamālā l. c: **तूष्णीं स्त्रियः**.

3. Quoted in Pi. Sā. without **इति**.

6. **अग्नि** T.

7. **हत्वा** om. T.

10. **प्रच्णीत्य°** H Bü; **सच्णोत्य°** T.

11. **प्रयूय** T and Pi. Sā.; **प्रयौति** H Bü. So also p. 6, l. 18 and p. 7 l. 8.

12. **उपसंहृत्य** H Bü (twice) T (thrice); **उपसंहृत्य** H B (once), Pi. Sā.

लोष्टानुपसंहृत्य तेषूपमृज्य कनिष्ठप्रथमाः प्रकीर्णकेशास्त्रिरपसलैः परि-
यन्ति सिग्भिरुपवातयन्तˇएवममात्या एवं स्त्रियःˇसंयम्य केशान्यथेतं
त्रिः पुनः प्रतिपरियन्त्यथैनमाददतˇआदीयमानमनुमन्त्रयत आयुर्वि-
श्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यत्रासते
सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधात्वितिˇसमस्तमेतस्या-
ध्वनो गत्वा निदधात्यथैतेषां कुगलानामेकं शस्त्रेण प्रक्ष्णौत्यथ यदि
न कुगला भवन्ति चरुं मेक्षणेन प्रयौतिˇयदु वा एक एव भवति
चरोरवशिष्टं मेक्षणेन प्रयूय लोष्टानुपसंहृत्य तेषूपमृज्य कनिष्ठप्रथमाः
प्रकीर्णकेशास्त्रिरपसलैः परियन्ति सिग्भिरुपवातयन्तˇएवममात्या एवं
स्त्रियःˇसंयम्य केशान्यथेतं त्रिः पुनः प्रतिपरियन्त्यथैतां चरुस्थालीं सु-
संभिन्नां भिनत्ति यथास्थि कपालेषूदकं न तिष्ठेदितिˇयत्रात्र स्त्रिय
आरुस्तत्कुर्वन्ति ॥ ३ ॥

अथास्यावकाशं जोषयतेˇपश्चादुदकमनूषरमनुपहतमविस्रग्दार्यनि-
रिणमसुषिरमभङ्गुरमवल्मीकमनागर्तवङ्कलौषधिंˇयत्र क्षीरिणो वृक्षा
ओषधयो वाभ्याशे न स्युर्यस्माद्दक्षिणाप्रतीच्य आपः शनैर्गत्वा प्रतिष्ठेरं-

---

5. **समस्तमेतस्याध्वनो** T, T. Ā. Gṛhyapray.; **एतस्य** om. H Bü.

13. **अनुपहतम°** T; **अनुपहितम°** H Bü. Comp. Hir. XXVIII. 1, init. and Baudhāyana Karmāntasūtra 5, where the MS. Haug reads **अनूपहितम°**. — **अविस्रग्दायनि°** H Bü; **अविसृग्दार्यनि°** T. Compare Hir. l. c.; Karmāntasūtra (according to MS. Haug): **अविस्रग्दीर्घम्**. The word occurs also in Hemādri I, p. 763.

14. **अवल्मीकम्** so emended by me; **अवल्याकम°** H Bü; **अवलीकम°** T. Comp. Keśavasvāmin **सुषिरोषरप्रदरवल्मीकक्षीरवृक्षौषधिरहितं**. — **अनागर्त°** H Bü; **अजागर्त°** T; Prof. Kern suggests: **अनाखुगर्त°**. — **वङ्कलौषधि** H Bü; **वलौषह** T, but comp. Hir. XXVIII. 1. The Karmāntasūtra has: **वङ्कलौषधोकं**.

15. **वा अभ्याशेन** H Bü; **वासापिरन्** (!) T. — **प्रतिष्ठेरन्तथा** H Bü; **प्रतिष्ठेरनस्थाः** T; Gop. quotes with **ताः**.

यथा प्रदक्षिणमभिपर्यावृत्य महानदीमभ्यवेत्य प्राच्यः संपद्येरन्दक्षिणाप्रत्यक्प्रवणमित्येकेषामुदक्प्रत्यक्प्रवणमित्येकेषामपि वा यः समंभूमिस्तंस्माद्दीरुध उद्धारयन्ति कालां च पृश्निपर्णीं च तिल्वकां चापारकां चापामार्गं च शुक्रीं च वज्रपत्त्रिकां च विस्रंसिकां च राजवृक्षपर्णीं
5 च याश्चान्याः क्षीरिण्य ओषधयो भवन्त्यथैनं मध्ये शकलेनोद्धत्यावोक्ष्य हिरण्येन परिकीर्य पर्णशाखया वेद्यत्यपेत वीत वि च सर्पतातो येत्र स्थ पुराणा ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मा इति दारुचितां कुर्वन्ति दक्षिणाप्राचीमेषा हि पितॄणां प्राची दिगिति विज्ञायते जघनेन चितां दक्षिणाप्राचीं विहारं
10 कल्पयित्वा दर्भैरग्निं चितां चापसलैः परिस्तीर्य दक्षिणेन विहारं दक्षिणाग्रान्दर्भान्संस्तीर्य तेष्वेकैकशो न्यञ्चि पात्राणि संसादयत्येकपवित्रेण प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य प्रेतं चितां चाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वोद्वास्योत्पूय तूष्णीं दर्भैः पात्राणि संमृज्य तूष्णीं दार्शपौर्णमासिकान्याज्यानि गृहीत्वोत्थाप्य राजगवीमुपाकरोति भुवनस्य पत
15 इदं हविरग्नये रयिमते स्वाहेति तस्यां निपद्यमानायां सव्यानि जानु-

---

1. अभ्यवेत्य H Bü, quot. Gop.; अभ्येत्य T.

2. उदक्प्रत्यक्प्र° T; उदक्प्रवण° H; Bü forgets this passage. — So: समंभूमि° H Bü; समंसुभूमि° T; comp. Hir. XXVIII. 1 with crit. note.

3. As in Hir. (XXIX. 1) the names of the plants are partly uncertain. चापारखां H Bü; चापारकां T.

4. शुक्रीं च om. T. — वज्रपुत्रिकां H Bü; वज्रपर्णिकां T.

5. So T; अथैनमुद्धत्यथैनमुद्धत्यावोक्ष्य H Bü.

6. वेद्वति T; पेव्यति H Bü; compare furtheron (kaṇḍ. 15), where the gerund of the same verb occurs: वेटयित्वा (Bü), पेटयित्वा (H); वद्यित्व (T); वेडयित्व° (Brl).

8. Before दारु° T has तद°.

11. संसादयति T; सादयति H Bü.

न्युपनिघ्नन्ते पुरुषस्य सयावर्यपेद्यानि मृज्महे । यथा नो अत्र नापरः
पुरा जरस आयतीति ˘तामन्वचैव ग्रस्त्रा घ्नन्त्येथास्य प्राणान्विसस्रमा-
नाननुमन्त्रयते पुरुषस्य सयावरि वि ते प्राणमसिस्रसं । शरीरेण
महीमिहि स्वधयेहि पितॄनुप प्रजयास्मानिहावहेत्युपोत्थाय पांसूनवमृ-
5 जन्ते मैवं मांस्ता प्रियेहं देवी सती पितृलोकं यदैषि । विश्ववारा
नभसा संव्ययन्त्युभौ नो लोकौ पयसाभ्यावबृत्स्वेत्येथैनं संशास्त्येङ्गाद्-
ङ्गादनस्थिकानि पिशितानि प्रच्छिद्य संक्षादयन्तोप्रच्यावयन्त एकोल्मुकेन
श्रपयत ˘प्रज्ञातां वपां निधत्त प्रज्ञातं हृदयं प्रज्ञातौ च मतस्नौ
प्रज्ञातां जिह्वां प्रज्ञातं चर्म सशीर्षवालपादं प्रज्ञातं मेद इत्येथास्य
10 भार्यामुपसंवेशयतीयं नारी ॥ ४ ॥

इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतं ।
विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहीति ˘तां पति-
हितः सव्ये पाणावभिपाद्योत्थापयत्युदीर्ष्व नार्यभि जीवलोकमितासु-
मेतमुपशेष एहि । हस्तग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभिसंबभूवे-
15 त्येथास्य सुवर्णेनेन हस्तौ निमृजते सुवर्णं हस्तादाददाना मृतस्य श्रियै
ब्रह्मणे तेजसे बलाय । अत्रैव त्वमिह वयं सुशेवा विश्वा स्पृधो

---

2. गामन्वचैवग्रस्त्राघ्न° Bü; मन्वचैवग्रस्त्रतघ्न° T; तामन्वचैवग्रस्त्राघत quot. Gopāla.

4. 5. अवमृशन्ते T, T.Ā.; अवमृजन्ते H Bü.

5. यदैषि H Bü T; यदेषि T.Ā.

6. So emended. संशात्य° H Bü; T deficient.

7. Uncertain: संह्लादयन्तो T; संक्षादयन्तो H Bü; perhaps to be read असंक्षाद° or असंह्राद°.

10. Sing. verbi T, T.Ā.; plur. H Bü.

12. 13. पतिहितः T, quot. Gop., Gṛhyaprayoga (twice); प्रतिहितः H Bü; प्रतिगतः T.Ā.

13. अभिपाद्य T.Ā.; अभिवाद्य T; अभिपात्य H Bü; °पाद्य or °वाद्य Gṛhyaprayoga.

अभिमातीर्जयेमेति ब्राह्मणस्य धनुर्हस्तादाददाना मृतस्य श्रियै ब्रह्म-
णीजसे बलाय । अत्रैव त्वमिह वयं सुशेवा विश्वा स्पृधो अभिमा-
तीर्जयेमेति राजन्यस्य मणिं हस्तादाददाना मृतस्य श्रियै विशे पुष्ट्यै
बलाय । अत्रैव त्वमिह वयं सुशेवा विश्वा स्पृधो अभिमातीर्जयेमेति
5 वैश्यस्य यद्यत्र स्त्रियं आकुस्तत्कुर्वन्त्येवैनमेतयासन्द्या सह चितावाद-
धत्यपहत्य रज्जूरासन्दीमपविध्यन्ति कृष्णाजिने चैव रज्जुषु चोत्तानः
शेते तस्य प्राणायतनेषु हिरण्यशकलान्प्रत्यस्य नानाचतुर्गृहीताभ्याम-
क्ष्णोर्जुहोति चित्रं देवानामुदगादनीकमित्यर्धर्चाभ्यां जुहोतीति वि-
ज्ञायते कथमु खल्वस्य पात्राणि नियुञ्ज्यादिति तानि दध्ना सर्पिर्मिश्रेण
10 पूरयित्वा मुखेऽग्निहोत्रहवणीं नासिकयोः स्रुवावक्ष्णोर्हिरण्यशकलावाज्य-
स्रुवौ वा प्रत्यस्य कर्णयोः प्राशित्रहरणं भित्त्वा शिरसि कपालानि ललाट
एककपालं शिरस्तः प्रणीताप्रणयनं चमसं निदधातीममग्ने चमसम् ॥ ५ ॥

इममग्ने चमसं मा विजीह्वरः प्रियो देवानामुत सोम्यानां । एष
यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्तामिति दक्षिणे हस्ते
15 जुहूं सव्य उपभृतमुरसि ध्रुवामरणी च दक्षिणेंऽसे मेक्षणं सव्ये पिष्टो-
द्वपनीं पृष्ठे स्फ्यमुदरे दारुपात्रीं पार्श्वयोः शूर्पं छित्त्वा वैकं कुक्ष्योश्च-
मसौ सांनाय्यापिधानीं चेडोपहवनं च वक्षणयोः सांनाय्यकुम्भ्यौ
श्रोण्योरन्वाहार्यस्थालीं चरुस्थालीं च पादयोरग्निहोत्रस्थालीमाज्य-
स्थालीं चोर्वोरुलूखलमुसलेऽण्डयोर्दृषदुपले शिश्ने वृषारवं शम्यां च

3. Instead of राजन्यस्य (so H Bü T.Ā.) T has क्षत्रियस्य. — From श्रियै to खल्वस्य (l. 9) om. H Bü.

6. अपहत्य T; अपहाय Pi. Sā., Gṛhyaprayoga.

17. °हवनंचाचयोः H Bü; °हवनस्रुवंचणयोस् T; the sec. Baudh. reads वक्षणयोः.

18. Instead of श्रोण्योर° (T), H Bü have wrongly श्रोचयोर°. — चाज्यस्थालीं instead of चरुस्थालीं T.

18. 19. चरुस्थालीं instead of आज्यस्थालीं T. — वृषारवं H Bü; मृषारवं T.

शिरस्त उपसादनीयं कूर्चं निदधाति ˇपत्त उपावहरणीयमˇथावशि-
ष्टानि पात्राण्यन्तरेण सक्थिनी निवपेयुरˇपो मृन्मयान्यभ्यवहरेयुरˇपो
मृन्मयान्यभ्यवहरन्तीति विज्ञायतेˇचैव वा निदध्युर्ब्राह्मणेभ्यो यन्मयानि
लोहमयानि च द्रव्येषां यान्यासेचनवन्ति तानि दध्ना सर्पिर्मिश्रेण
5 पूरयेत्संसृशेदितराण्यरिक्तानि पात्राणि भवन्तीति विज्ञायतेˇचैवाध्य-
स्यन्त्युपवाजनं खारीण्डुमित्यˇथास्यामिक्षां व्युद्वृत्य पार्श्वोरादध्यान्मित्रा-
वरुणाभ्यां त्वेत्यˇथास्य मतस्नावुत्खिद्य पार्श्वोरेवादध्याच्छ्यामशबलाभ्यां
त्वेति ˇदक्षिणे दक्षिणं ˇसव्ये सव्यं ˇहृदये हृदयमंसे जिह्वां ˇयथाङ्गमि-
तराणि संप्रच्छाद्य वपयास्य मुखं प्रच्छादयति ˇमेदसा प्रोर्णोतीति वि-
10 ज्ञायतेˇथैनं चर्मणा सशीर्षवालपादेनोत्तरलोम्ना प्रोर्णोत्यग्नेर्वर्म ॥ ६ ॥

अग्नेर्वर्म परि गोभिर्व्ययस्व संप्रोर्णुष्व मेदसा पीवसा च । नेत्त्वा
धृष्णुर्हरसा जर्हृषाणो दधद्विधक्ष्यन्पर्यङ्खयाता इति ˇस एष यज्ञायुधी
यजमानोऽञ्जसा स्वर्गं लोकमेतीति विज्ञायतेˇथ यद्यनुस्तरणीं नानुस्तरि-
ष्यन्तो भवन्त्युत्सृजेद्वैनां ˇब्राह्मणाय वा दद्यादˇथाल्वेव श्रेयसि भवतीति
15 विज्ञायतेˇथ यद्युत्स्रक्ष्यन्भवति तां त्रिरपसलैरग्निं पर्याणयत्यपश्याम
युवतीमाचरन्तीमिति तिसृभिः ˇपर्याणीयोत्तरतः प्रतिष्ठितामनुमन्त्रयते
ये जीवा ये च मृता ये जाता ये च जन्त्या इत्यˇथास्याः कर्णलोमा-
न्युत्पाद्य पार्श्वोरेवादध्यान्मित्रावरुणाभ्यां त्वेति ˇदक्षिणे दक्षिणानि ˇसव्ये

---

1. 2. अवशिष्टानि H Bü, sec. Baudh.; अतिशि° T.

6. उपवाजनं H Bü; उपवाजिनं T. — खारीण्डुम् conjectural reading: खारीडुम् H Bü; वारिनल्पम् T. — व्युद्वृत्य H Bü; विधृत्य T.

9. Between मेदसा and प्रोर्ण° T gives स्रुचौ. Rightly?

13. From अथ यद्यनु° to यद्युत्स्र (l. 15) om. T.

14. The reading अथाल्वे° is wholly uncertain, as based on H Bü alone.

18. पार्श्वोरादध्या° H Bü. — मित्रा° त्वेति om. T. — After °भ्यां त्वेति, H Bü (not T) have the following interpolation: अथास्य मतस्नावुत्खिद्यपार्श्वोरेवादध्यात्श्यामशबलाभ्यांत्वेति.

सव्यान्येवैनामुत्सृजति माता रुद्राणां दुहिता वसूनां स्वसादित्यानाम-
मृतस्य नाभिः । प्र णु वोचं चिकितुषे जनाय मा गामनागामदितिं
वधिष्ट पिबतूदकं तृणान्यत्तु ओमुत्सृजतेत्येवैनमुपोषति पुरस्तादाहव-
नीयेन दक्षिणतोन्वाहार्यपचनेन पश्चाद्गार्हपत्येनोत्तरतः सभ्यावसथ्या-
5 भ्यामेवाप्युत्प्रेक्षा भवति ˘ तं यद्याहवनीयः प्रथममभ्युज्ज्वलयेद्देवलोकम-
भ्यजैषीदित्येनं जानीयादथ यद्यन्वाहार्यपचनः पितृलोकमेव यदि
गार्हपत्यो गन्धर्वलोकमेव यदि सभ्यावसथ्यौ सप्तर्षीणां लोकमेव यदि
सर्व एव सहाभ्युज्ज्वलयेयुर्ब्रह्मलोकमभ्यजैषीदित्येनं जानीयादेवात्र स्त्रिय
आक्रमात्कुर्वन्ति ॥ ७ ॥

10 अथैनमादीपयत्यादीप्यमानमनुमन्त्रयते मैनमग्ने विदहो माभि-
शोचो मास्य त्वचं चिक्षिपो मा शरीरं । यदा शृतं करवो जात-
वेदोथेमेनं प्रहिणुतात्पितृभ्य इति ˘ प्रज्वलितमनुमन्त्रयते शृतं यदा
करसि जातवेदोथेमेनं परिदत्तात्पितृभ्यः । यदा गच्छात्यसुनीतिमेता-
मथा देवानां वशनीर्भवातीत्येव षड्ढोतारं व्याचष्टे ˘ षड्ढोता ˘ सूर्यं ते
15 चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा । अपो वा
गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैरित्येवैतमजं चित्य-
न्तेवलेन शुल्वेन बध्नात्यजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं
ते अर्चिः । यास्ते शिवास्तनुवो जातवेदस्ताभिर्वहेमं सुकृतां यत्र लोका
इति ˘ स यद्यपोद्द्रवति नैनं प्रत्यानयति ˘ प्राग् हैक उपोषणादुदकुम्भेन

---

5. उत्प्रेक्षा भवति H Bü here and kaṇḍ. 13 (once भवंति); उपेक्षा भवंति T here, but आपेक्षा भवंति k. 13; in kaṇḍ. 13. Brl reads उपेक्षा भवति. It seems to be uncertain, whether उपेक्षा or उत्प्रेक्षा is the true reading. Somehow it must be an equivalent of Hir.'s विज्ञानं. — So T; H Bü omit अभि before उज्ज्वल°.

6. एवं instead of एनं H Bü. The same v. l. ad l. 8.

19. Conjectural reading. यद्योद्द्रवति H Bü T.

त्रिरपसव्यैः परिषिञ्चन्ति वारुणीभिस्तं प्रत्याछिद्य पर्णमयेन स्रुवेणोपघातं
जुहोति य एतस्य पथो गोप्तारस्तेभ्यः स्वाहेति नव स्रुवाहुतीरˇथान्यां
जुहोत्ययं वै त्वमस्मादधि त्वमेतदयं वै तदस्य योनिरसि । वैश्वानरः
पुत्रः पित्रे लोककृज्जातवेदो वहेमं सुकृतां यत्र लोका इत्यˇथैव स्रुव-
5 मनुप्रहरत्यˇथैतान्यवदानानीडसूने प्रच्छिद्यौदुम्बर्या दर्व्योपघातं जुहोत्य-
ग्नये रयिमते स्वाहेत्यˇथैव दर्वीमनुप्रहरति ˇजघनेन चितामथैनं नवर्चेन
याम्येन सूक्तेनोपतिष्ठते प्र केतुना बृहता भात्यग्निरित्यासीनः ˇपरा-
चानुशंसति वा ˇजघनेन वादहनं तिस्रो दक्षिणाप्राचीः कर्षूः कुर्वन्त्यˇ-
थैना अद्भिरनुपरिस्राव्य सिकताभिरनुप्रकीर्य संगाहन्ते ˇयवीयान्यवी-
10 यान्पूर्वः पूर्वः संगाहन्तेश्मन्वती ॥ ८ ॥

अश्मन्वती रेवतीः संरभध्वमुत्तिष्ठत प्रतरता सखायः । अत्रा
जहाम ये असन्नशेवाः शिवान्वयमभि वाजानुत्तरेमेति ˇजघनेन कर्षूः
पर्णशाखे निहत्यावलेन शुल्वेन बद्ध्वा विनिःसर्पन्ति यद्वै देवस्य सवितुः
पवित्रं सहस्रधारं विततमन्तरिक्षे । येनापुनादिन्द्रमनार्तमार्त्यै तेनाहं
15 मां सर्वतनुं पुनामीति ˇजघन्यो व्युदस्यति या राष्ट्रात्पन्नादपयन्ति
शाखा अभिमृता नृपतिमिच्छमानाः । धातुस्ताः सर्वाः पवनेन पूताः

---

1. °षिञ्चति all. — वारुणाभिसृक्प्रत्याछिद्य T; वारुणीभिस्तत्प्रत्या-छिद्येन H Bü. I have emended hesitatingly तं (i. e. उदकुम्भं).

4. After लोका T has स्वाहा, wanting also in T.Ā.

8. वा is both times omitted in T, but आदहनं, not दहनं is the word required by the context. The alternative is not clear. According to the paddhatis and the rites of Hir., both, the *anuśaṃsanam* and the *karṣūkhananam* take place.

8. Instead of दक्षिणाप्राचीः, sometimes दक्षिणाः प्राचीः is read in H Bü Brl in kaṇḍ. 16 and in Brl in kaṇḍ. 12. Gopāla quotes with °णाप्रा°.

9. परि om. T, Gṛhyapray.

10. संगाहंते T H Bü, संगाहते Gṛhyapray.; संगाहने quot. Gop.

प्रजयास्मान् रय्या वर्चसा संसृजाथेति˘यत्रापस्तदन्त्यनवेक्षमाणा˘अपः
सचेला दक्षिणामुखाः समृत्तिका आप्लवन्ते धाता पुनातु सविता
पुनात्विति˘नामग्राहं त्रिरुदकमुत्सिच्योत्तीर्याचम्यादित्यमुपतिष्ठत उद्वयं
तमसस्परीत्यथ गृहानायन्ति˘यत्रात्र स्त्रिय आक्रुसत्कुर्वन्त्येतस्मिन् का-
5 लेस्वामात्याः केशश्मश्रूणि वापयन्ते ये सन्निधाने भवन्ति˘विकल्प
इतरेषु वापयेरन्वा निवर्तयेरन्वा˘श्रुतवता तु वप्तव्यमेवासन्निधानेपीति
बोधायनस्य कल्पो˘न समावृत्ता वपेरन्नन्यत्र विहारादित्येके˘मातरि
पितर्याचार्य इति त्रिरात्रमक्षारलवणभोजनमधःशयनं ब्रह्मचर्यं˘त्र्यहं
षडहं द्वादशाहं संवत्सरं वा यावद्ग्रहणं˘द्वादशाहावरार्ध्यं परमगुरु-
10 ष्वेवमघोदकमितरेषु त्रिरात्रं˘यावज्जीवं प्रेतपत्न्येव यथाहिताग्निरन्यत्र
प्रेयात् ॥ ९ ॥

अथ यथाहिताग्निरन्यत्र प्रेयाद्दीप्यमानैरह्वयमानैरासीरन्यावदस्य

---

4 sqq. I am not certain about the reading and interpretation of this difficult passage, quoted also in the commentary on the Pi. Sā. (p. 108 and 104).

6. 7. °पीतिबोधायनस्यकल्पोन H Bū; °पिनबोधायनकल्पेन Pi. Sā.; T: °पितुनुबो° etc. as H Bū.

7. °रन्नन्यत्रविहाराद् Pi. Sā.; °रन्नित्यत्यवि° Bū: °रन्नित्यत्रवि° H; °नंनन्वत्रवि° T. Compare Āp. dhś. I. 10. 7 and Hir. dhś. in Bühler's edition of Āp. dhś., ad II. 15. 11.

8. Before त्र्यहं H Bū (not T, Pi. Sā.) have च.

9. वा only in H Bū, not in T and Pi. Sā.

10. Instead of °वमघोदक° H Bū give °वमघोदकम°, T °वं-सोदकम° (i. e. °वमसोदकम°). Compare the preface.

12. दीप्यमानीरह्वय° H Bū; दीप्यमानैर्ह्वय° Pi. Sā.; दीप्यमानैः-ह्वय° T. Comp. the Baudhāyanapassage quoted by Rudradatta on Āp. śrs. IX. 8. 5: दीप्यमानेष्वेवाह्वयमानेषु यावन्त्यतिक्रान्तान्यग्निहोत्राणि सुप्तानि प्रतिसंख्याय जुहुयात्; Śat. Br. XII. 5. 1. 1: अथैक आहुः। एवमेवान्वाहिता अह्वयमानाः शयीरन्निति. Here अन्वाहिताः

शरीरमग्निभिः समागमयेरन्नित्येवैतदभिवान्यायै पयो दोहयित्वा गार्ह-
पत्येऽभिविष्यन्दयित्वाहवनीयेऽभिविष्यन्दयेदधस्तात्समिधमाहरेदुपरिष्टाद्धि
देवेभ्यो हरतीति विज्ञायतेऽथैनमादायान्तरेण वेद्युत्करौ प्रपाद्य प्रसि-
द्धमुपोषेयुरित्येवं यदि दग्धः स्यादस्थीन्याहृत्यान्तर्वेदि शरीराणां
5 कृष्णाजिने पुरुषाकृतिं कृत्वा तेषूपरि पात्राणि चित्वा कुशतरुणकैः
प्रतिछाद्य प्रसिद्धमुपोषेयुरित्येवं यद्यस्थीनि न विन्देयुस्त्रीणि षष्टि-
शतानि पर्णत्सरूणामेव कृष्णाजिने पुरुषाकृतिं कृत्वा तेषूपरि पात्राणि
चित्वा कुशतरुणकैः प्रतिछाद्य प्रसिद्धमुपोषेयुरित्येवं यदि दिगेव
प्रज्ञायते तां दिशं विहारं कल्पयित्वासावेहीति नामग्राहमाहूय
10 पर्णत्सरूणामेव कृष्णाजिने पुरुषाकृतिं कृत्वा तेषूपरि पात्राणि चित्वा
कुशतरुणकैः प्रतिछाद्य प्रसिद्धमुपोषेयुरित्येवं यदि दिगपि न प्रज्ञायत
इमां दिशं विहारं कल्पयित्वासावेहीति नामग्राहमाहूय पर्णत्सरूणा-
मेव कृष्णाजिने पुरुषाकृतिं कृत्वा तेषूपरि पात्राणि चित्वा कुशतरु-
णकैः प्रतिछाद्य प्रसिद्धमुपोषेयुरित्याहिताग्निमग्निभिर्दहन्ति यज्ञपात्रै-
15 श्चेति विज्ञायते पुरुषाकृतिर्ह्यस्य प्रियतमेत्येतामनुख्यां दहनस्य ब्रुव-
तेऽथाप्युदाहरन्ति शरीरदायादा ह वा ऋषयो भवन्तीति तदपि
दाशतये विज्ञायते शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं
तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषता-
युर्गन्तोरिति ॥ १० ॥

---

answers to दीप्यमानैः; Ait. Br. VII. 2: एवमेवैनान् (sc. अग्नीन्) अजस्रानजुह्वत इन्धीरन्.

1. 2. So H Bü; गार्हपत्येऽभिविष्यपित्वाहवनीयेऽधस्तात्समिधमाहरं-त्युपरिष्टा° T.

4. Here and l. 6, 8, 11 H Bü every time omit इति.

6. Here and l. 8. 14 H Bü both times omit प्रसिद्धं.

16. इति om. T.

17. दाशतये i. e. ṚS. I. 89. 9.

अथातः संचयनमेकस्यां व्युष्टायां तिसृषु वा पञ्चसु वा सप्तसु वा नवसु वैकादशसु वायुग्मा रात्रीरर्धमासान्मासानृतून्संवत्सरं वा संपाद्य संचिनुयुरिति ˘स उपकल्पयते सतं च क्षीरं चाज्यं चोदकुम्भं च दर्भांश्च परिस्तरणीयान्नीललोहिते सूत्रे बृहतीफलं चाश्मानं चापामार्गं च वेतसशाखां च सिकताश्च शुल्वं च पर्णशाखे चोत एवादहनादङ्गा-रान्निर्वर्त्य तिस्रोवसर्जनीया जुहोत्यव सृज पुनरग्ने पितृभ्यः संगच्छस्व पितृभिर्यन्ति कृष्णः शकुन आतुतोदित्येवैतस्मिन्सते क्षीरं चोदकुम्भं च निषिच्य वेतसशाखयावोक्षन् संपादयत्यप्रकाशयञ्छरीराणि यं ते अग्निममन्थामेति षड्भिः ˘प्रथमां वोत्तमां वा द्विरभ्यावर्तयेयुरथैतदाद-हनमुदकुम्भैः स्ववोक्षितमवोक्ष्य यास्य स्त्रीणां मुख्या सा सव्ये पाणौ बृहतीफलं नीललोहिताभ्यां सूत्राभ्यां विग्रथ्याश्मानमन्वास्थायापा-मार्गेण सकृदुपमृज्यानन्वीक्षमाणा दन्तैः शिरसो वास्थि गृह्णात्युत्ति-ष्ठातस्तनुवं संभरस्व मेह गात्रमवहा मा शरीरम् । यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवः सविता दधात्वितीदं त एकमिति द्वितीयं˘ पर ऊ त एकमिति तृतीयं˘तृतीयेन ज्योतिषा संविशस्वेति चतुर्थं˘ संवेशनस्तनुवै चारुरेधीति पञ्चमं˘प्रियो देवानां परमे सधस्थ इति

---

4. लोहितसूत्रे T.

5. शुल्वं T, शुल्वे H Bü.

6. °वसर्जनीया is a conjectural reading. °वर्जनीया H Bü, विसर्जनीया T, Gṛhyapray.

7. Is चोदकुम्भं (so all MSS.) to be corrected into चोदकं?

8. °वोक्षन् or °वोक्षत् H Bü; °वोक्ष्य T. — With °पादयत्य° begins the MS. Burnell. °पादयत्य° T Brl, Gṛhyaprayoga; पात-यत्य° H Bü. I am uncertain, which reading to accept.

9. अथैतद्° H Bü; अथैनद्° T Brl Gṛhyaprayoga.

10. अवोक्षति Gṛhyaprayoga; अवोक्षिति Brl, अवोक्ष्य H Bü T.

षष्ठमेऽथैनं सुसंचितं संचित्य पिण्डं करोति˘तं तथा करोति यथास्य कपोतश्छायायां नोपविशेदित्यथैनमपरिमितैः क्षुद्रमिश्रैरश्मभिः परि-
चिनोति˘न तेन परिचिनुयाद्यथास्य कपोतश्छायायां नोपविशेदित्य-
थैतान्यस्थीन्यद्भिः प्रक्षाल्य कुम्भे वा सते वा कृत्वादायोपोत्तिष्ठत्युत्तिष्ठ
5 प्रेहि ॥ ११ ॥

उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन् । यमेन त्वं यम्या संविदानोत्तमं नाकमधिरोहेममिति˘तं प्रतिविशं कुम्भं निधायाथातो हविर्यज्ञियं निवपनं˘यं कामयेतानन्तलोकः स्यादिति˘समस्या उद्धते सिकतोपोप्ते परिश्रिते निदधाति पृथिव्यास्त्वा क्षयित्वा अपामोष-
10 धीनां रसे सुवर्गे लोके नाकस्य त्वा पृष्ठे ब्रध्नस्य त्वा विष्टपे सादया-
म्यसावित्यनन्तलोको हैव भवतीति विज्ञायते˘जघनेन कुम्भं तिस्रो
दक्षिणाप्राचीः कर्षूः कुर्वन्तीति तत्पुरस्ताद्व्याख्यातं˘जघनेन कर्षूः पर्ण-
शाखे निहत्यावलेन शुल्वेन बद्ध्वा विनिःसर्पन्तीति तत्पुरस्ताद्व्याख्यातं˘
यत्रापस्तद्यन्त्यनवेक्षमाणा˘अपः सचेला दक्षिणामुखाः समृत्तिका आप्ल-
15 वन्ते धाता पुनातु सविता पुनात्विति˘नामग्राहं त्रिरुदकमुत्सिच्यो-
त्तीर्याचम्यादित्यमुपतिष्ठत उद्वयं तमसस्परीत्यथ गृहानायन्ति˘यत्रात्र
स्त्रिय आङ्गसत्कुर्वन्ति ॥ १२ ॥

ते यदि पुनर्धक्ष्यन्तो भवन्ति पुरस्तादेवावशेषयेयुर्जुहूं चारणी च

---

1. Between संचित्य and पिण्डं H Bū add तस्य, not T Brl. — करोतितंतथा om. H Bū; they have करोत्यथास्य.

2. अथैनमप॰ H Bū; अथैनान्यप॰ Brl; अथैनानप॰ T. — So emended; ॰मिश्रैरश्मिभिः all MSS. Compare C. 385.

3. नतेन H Bū Brl; नते T.

4. सते T Brl; शरावे H Bū.

7. निधाया॰ all; निदधात्वा॰ Brl (sec. m.?).

9. After निदधाति T adds शांत्वा इति.

10. सुवर्गे T Brl; स्वर्गे H Bū.

कृष्णाजिनं दृषदुपले शम्यामित्यथ यदनुप्रहृतानि स्रुचस्यैव कस्य चाग्र-
त्यस्यारणी गृहीत्वा मथित्वाग्निमुपसमाधाय संपरिस्तीर्य दक्षिणेनाग्निं
दक्षिणायान्दर्भान्संस्तीर्य तेषूपरि कृष्णाजिने शम्यायां दृषदुपले युक्त्वा-
स्त्रीन्यवाञ्जनं पिष्ट्वा पुराणसर्पिषा समुदायुत्य जुह्वा प्रत्येकं जुहोत्यस्मा-
5 त्त्वमधि जातोस्ययं त्वदधि जायताम् । अग्नये वैश्वानराय सुवर्गाय
लोकाय स्वाहेत्यथैवानुप्रहरति जुहूं चारणी च कृष्णाजिनं दृषदुपले
शम्यामित्येषाप्युत्प्रेक्षा भवति तं यदि ज्वालोर्ध्वमभ्युज्ज्वलयेद्देवलोक-
मभ्यजैषीदित्येनं जानीयादथ यदि मुहूर्तमुदेत्य व्याध्मेदन्तरिक्षलोक-
मित्येनं जानीयादथ यदीमामनुविनयेदिहैवेति जानीयादेवाच स्त्रिय
10 आक्रन्त्कुर्वन्ति न चास्मात ऊर्ध्वं श्मशानं कर्तुमाद्रियेताकृतीर्वास्या-
दहने वपेदपस्वाभिर्वा परिचिनुयात्तमभ्येवादित्यस्तपत्यभि वातः पवते
तमापः स्पृशन्ति स नादित्यस्य सकाशान्न वायोर्नापां स्पर्शाच्छिद्यते

---

1. So emended; **यस्यैवकचाग्र°** H; **यस्यैवचाग्र°** Bü; **यस्यचैवै-कस्याग्र°** T; **यस्यचैवैकस्यचाग्र°** Brl.

2. Between **दक्षिणेन** and **दक्षिणायान्** Brl has **अग्निं**, T: **आह-वनीयं**, H Bü nothing.

3. **शम्यां** T; **शम्यायां** the others.

3. 4. **युक्तितान्यस्त्रीन्यवा°** H Bü; **युत्कास्त्रीन्यवा°** Brl; **युत्का-स्त्रवा°** T.

6. **°चारणीं** H Bü Brl; **°चारणिं** T.

7. For **उत्प्रेक्षा** comp. p. 12, l. 5. — **°र्ध्वमभ्युज्ज्वलयेद्** Brl; **°र्ध्वंभ्युज्ज्वलयेद्** T (consequently = Brl); **°र्ध्वमत्युज्ज्व°** H Bü.

8. Instead of **एनं** (T, Brl) H Bü have **एवं** here and l. 9. — **उदेत्यव्याध्मेद्** Brl; **वाभूमेद्** T; **उदेत्युज्ज्वलयेद्** H Bü.

9. **°मामनुविनयेद्** Brl; **°मानविनयेद्** T; **°मामनुविनशेद्** H Bü.

10. **°येताकृतिर्वा** H Bü; **°येताकृतिवा** Brl; **°येताकृतिव्या** T. Compare the parallelpassage of Hir. and the preface.

11. **वपेद्** H Bü T; **निवपेयुर्** Brl.

यमेवं निदध्युर्य उ चैनदेवं विदुरेवमु हाहीनाहा श्वःश्वोहायनास्तं हो एवं चक्रे तस्यो हेमेहीनाहा श्वःश्वोहायना˘श्रेयसी श्रेयसी ह्यस्मै व्युच्छन्ती व्युच्छति˘वस्यसी वस्यसी प्रजा भवति यमेवं निदध्युर्य उ चैनदेवं विदुरेतां ह कौषीतकिर्विदां चकार˘तस्यो हेमे कौषीतकिनः˘
5 श्रेयसी श्रेयसी ह्यस्मै व्युच्छन्ती व्युच्छत्यस्मै वस्यसी वस्यसी प्रजा भवति यमेवं निदध्युर्य उ चैनदेवं विदुर्य उ चैनदेवं विदुः ॥ १३ ॥

एकाहं धुनुयुस्त्रीण्यहानि धुनुयुः पञ्च सप्त नवैकादशाहान्यर्धमासं धुनुयुरयुग्मा रात्रीरर्धमासान्मासानृतून्संवत्सरं वा संपाद्य धुनुयुरिति˘स उपकल्पयते दधि च वाजिनमिश्रं कुम्भीं च शतातृण्णां तिस्रः
10 पालाश्यो मेख्यो रोहितं चर्मानडुहमाहननार्थमपसव्यावृत्तां रज्जुं परिश्रयणीं षट्शतानीष्टका आममया अपरिमिताश्च लोकंपृणा द्वया

---

1. 3. 6. यमेव H Bü; यमेवं T Brl.

1. This passage may be called the most difficult of the whole sūtra. I therefore give the vv. ll. of all my MSS., as I have read them: एवमुहाहीनाहाश्वत्थ्याहायनास्तंहोएवञ्चक्रेतस्येहोमेहीनाहाश्रेयसी° Brl; एवमुहाहाहीनाहाश्व(or श्व)ध्योहायनांस्तंहोएवंचक्रेतस्योहेमेहाहीनाश्वध्याहायनाश्रेयसी° Bü; एवमुहाहाहिनाश्वध्योहायनास्तं (etc., the rest as Bü) H; एवंमुखानाहाद्दाहायनास्तंहोहेवञ्चतेस्योहेमोहाहिनाहाश्वत्यायहायनाश्रेयसिं° T. I have without hesitation taken into the text the ingenious conjecture of Prof. Kern: श्वःश्वो instead of श्वध्यो or श्वत्थ्यो. But nevertheless the interpretation has many difficulties. Compare the shorter redaction of this „vijñānam" in the Hiraṇyakeśisūtra. The meaning seems to be: „whomsoever they inter in this way, and they, who know this, (with those it will be) even thus: ever and ever returning years with not-lessened days — so him (for whom this ceremony has been performed) he (the performer) makes, his are those ever and ever returning years with not-lessened days". If this is the sense of the words, to अहीनाहा the visarga ought to be added.

5. Comp. TS. II. 1. 10. 3.

धानास्तिलमिश्राश्चातिलमिश्राश्चाथैतदभिवान्यायै दुग्धमर्धपात्रं समूलं
बर्हिर्नलेषीकां भुक्तभोगं च वासः क्षेत्रवितृणीं चतुरो लोष्टान्पञ्च चरू-
न्पञ्चापूपांस्तेषां घृतेनैकोभिघारितः˘शृतेनैकः˘क्षीरेणैको˘दध्नैको˘मधु-
नैकश्चतुरः स्तम्बानर्जुनस्तम्बं दूर्वास्तम्बं काशस्तम्बं कुशस्तम्बं चतुरो
5 नानावृक्षीयान्परिधीन्पर्णमयवारणवैतसशमीमयान्द्वे शाखे वारण-
शाखां च शमीशाखां च यवान्सर्वौषधीः सिकताश्च शुल्बे च तिस्रश्च
पर्णशाखा˘अथान्तरेण ग्रामं च श्मशानं चागारं वा विमितं वा
कारितं भवति˘तद्वृथाग्निमुपसमाधाय जघनेनाग्निं तिस्रः पालाश्यो
मेथ्यो निहत्य तासामन्तरेणास्थिकुम्भं निधाय तदुपरिष्टाच्छतातृण्णाम-
10 ध्युद्यम्य दध्ना वाजिनमिश्रेण पूरयति वैश्वानरे हविरिदं जुहोमीमं
समुद्रं शतधारमुत्समिति द्वाभ्यां˘द्रप्साननुमन्त्रयते द्रप्सश्चस्कन्देत्यथैनं
रोहितेन चर्मणानडुहेनाभिघातमभिघातं त्रिरपसलैः परियन्त्यजिनमौ
अजिनमौ इति त्रिस्त्रिरेव रात्रेः परियन्ति˘त्रिरह्नः˘एवममात्या
एवं स्त्रियस्तदनु नर्तक्यश्चानुनृत्येयुर्यश्चापहन्यते˘खार्यां वा पल्वे वा

---

1. So H Bü Brl; °श्चांश्चाभिवान्या° T.

5. नानावृक्ष्यान् Brl; नानावृक्षान् T H Bü, but comp. kaṇḍ. 15 s. f. and Āp. śrs. V. 17. 5. — वैतस° T Brl; वेतस° H Bü.

6. Instead of शमी° Brl has पर्ण° (T omits the word), but comp. kaṇḍ. 16. — सर्वौषधीस् Brl, सर्वौषधं the others.

8. तद्वृथाग्निं T Brl; तद्यथाग्निं H Bü. Comp. kaṇḍ. 17 init.

9. Between निहत्य and तासाम° Brl has तदुपरि.

12. अभिघातं only once T Brl.

12. 13. यन्त्यजिनमौ इति Brl; यन्त्यजिनमौअजिनमौलिति T; यंत्यजिनमौअजिनमौइति H Bü. The Baudh. paddh. Burnell has: अजिनमोर्यजिनमोर्यजिनमोयीति. Compare Hir. XXIX. 2 (med.) and C. 84. The repetition of अजिनमौ, although it is to be said thrice, has its analogy in मधु, Āp. śrs. XV. 8. 6.

14. Uncertain reading. पल्वेवा Bü; पल्वे(पल्वे?)वा H; पल्वे-

समवग्रमयन्तेऽयद्येषां समवग्रमितव्यं भवति तेन तथा प्रययुर्यद्दहनं
पुरस्तान्न पश्चाच्चन्द्रमसं पश्येयुस्ते महारात्र उत्थाय प्रययुः ॥ १४ ॥

ते महारात्र उत्थाय प्रययुर्ज्ञात्वा श्मशानकरणमेधिते ब्राह्मणा
अभीरादायोत्तरतो गत्वा लोष्टानुपसंहरन्तीष्टका वोधितदादहनमुद्-
5 कुम्भैः स्ववोचितमवोचत्यपेत वीत वि च सर्पतातो येत्र स्थ पुराणा
ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मा
इतिऽयथा जीवदुपसर्पेद्विज्ञायते न जीवन्तमभिनिदध्याद्यज्जीवन्तम-
भिनिदध्याज्जीवतो ह्येष प्राणानभिनिदध्यादितिऽपर्णशाखया वेदयि-
त्वापसलावृत्तया रज्ज्वा परियन्ति प्रेमां मात्रामुपस्तुहीतिऽतस्य मात्राऽ
10 यदि ग्रीवदघ्नं पुरस्तान्नाभिदघ्नं पश्चाद्यदि नाभिदघ्नं पुरस्ताज्जानुदघ्नं
पश्चाद्यदि जानुदघ्नं पुरस्ताद्गुल्फदघ्नं पश्चाद्यदि गुल्फदघ्नं पुरस्तात्समं
भूमेः पश्चात्पुरुषमात्रं भवतीति विज्ञायतऽउक्तं विधाभ्यासमेनुसन्धं

वा T; पल्वे(or पल्पे)वा Brl. Hir. (XXIX. 1. s. f.) has तल्पे वा, compare also Kāty. śrs. XXI. 3. 7. In the Baudh. gṛhyasūtra II. 13 the same पल्वे occurs also at the side of गोष्ठे.

1. समवग्रमयंते Bü H T; समवग्रामयन्ते Brl. For this word compare Śat. Br. VII. 3. 2. 1 and Śāṅkh. gṛhs. I. 14. 7. — समवग्रमि(or यि)तव्यं Bü H; समवग्रमैतव्यं Brl T.

2. महाराचादुत्थाय here and 21. 3 H Bü; महारात्रउ° T; सहात्रउ° Brl.

3. Emended. MSS.: आर्तीरा°, अभिरा°, अद्रिरा°.

7. So emended. जीवदुपसर्पेद् H Bü; जीवमुपसर्पेद् T; जीवमु(?)पसर्पेद् Brl. But a paddhati: यथा उदकस्वनेन सर्वे जन्तवोपसर्पेयुः. Comp. Hir. XXIX. 1. s. f. The words यज्जीवन्तमभिनिदध्याज् are only found fully in Brl. But T has: निदध्याद्यज्जीवतो, with यत्!

8. Comp. the crit. note on 8. 6.

12. उक्तं namely in the Cayanasūtra cp. 19. — From अनुसन्धं to कुर्वन्ति is also found in the Baudh. cayanasūtra c. 19.

लेखां लिखत्यपोद्धृत्य सन्धां कर्षूः खानयन्त्युक्षन्त्यपस्या ˇदक्षिणतश्च
पश्चाच्च वर्षीयसीः कुर्वन्त्यथ द्वाभ्यामात्मन्नग्निं गृह्णीते मयि गृह्णाम्यग्रे अ-
ग्निं यो नो अग्निरिति ˇस्वयंचितिं जपति यास्ते अग्ने समिधो यानि धा-
मेति ˇश्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु
5 तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथास्थितत्पुरस्तादेवौदुम्बरं युगलाङ्गलं
कारितं भवति सप्तगवं वा त्रयोदशगवं वोऽयुग्मा युक्तास्स भवन्त्यथा-
नडुहो युनक्ति सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे ।
तेभिर्युज्यन्तामघ्निया इति ˇकर्षति शुनं वाहाः शुनं नराः शुनासीरा-
विमां वाचमिति द्वाभ्यां ˇसीतां प्रत्यवेक्षते सीते वन्दामहे त्वार्वाची
10 सुभगे भव । यथा नः सुभगाससि यथा नः सुफलाससीत्यथास्थि-
कुम्भं सीतायां निदधाति सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ
आदधे । तेभिरदिते शं भवेत्यथानडुहो विमुञ्चति विमुच्यध्वमघ्निया
देवयाना अतारिष्म तमसस्पारमस्य । ज्योतिरापाम सुवरगन्मेति ˇत
एतेऽध्वर्योर्भवन्ति यदि दक्षिणावान्पितृमेधो ˇयद्यु वै सत्त्रियोऽग्निर्यथा-
15 गवं व्युदचन्ति ˇयद्वैवानडुहस्तद्युगलाङ्गलमथैनमुपवातयति प्र वाता

---

2. From अथ द्वाभ्यां to ध्रुवा सीदेति = Baudh. cay. sū. c. 20, init.

5. From अथास्थि° to °गवं वा is also found in the Baudh. cay. sū. 24 s. f. but with षड्गवं वा द्वादशगवं वा.

6. After °दशगवं वा Brl continues with नलं स्रवं (24. 10).

9. From वाचमिति to देवता प्रजापति° (p. 23. l. 6) om. T.

13. 14. From त एते to युगलाङ्गलं (l. 15) also in the cayanasūtra (cp. 25), but here we have दक्षिणावता यजते instead of दक्षिणावान्पितृमेधः.

15. व्युदचंति H; व्युदन्वंति B; व्युदंचति cayanasūtra (MS. Haug); व्यादचन्ति Mahāgnisarvasva; यदि सत्रेऽग्निं चीयते तदा यथागवं यस्य ते बलीवर्दास्तस्यैवोत्सृजन्ति । न त्वध्वर्यवे दातव्याः तस्यापि तत्र यजमानत्वात् Mahāgnisarvasva, MS. Burnell fol. 31. a. 1.

वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते सुवः । इरा विश्वस्मै
भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावतीत्येमिवत्सर्वौषधीर्वपति
यथा यमाय हार्म्यमवपन्पञ्च मानवाः । एवं वपामि हार्म्यं यथासाम
जीवलोके भूरय इत्येव सिकता निवपत्यग्ने तव श्रवो वय इति
5 षड्भिरनुछन्दसमेथोर्ध्वचित उपदधाति चितः स्थ परिचित ऊर्ध्वचितः
श्रयध्वं पितरो देवता प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिर-
स्वद्ध्रुवा सीदेति˘ अथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य˘ सं ते
पयांसीति त्रिष्टुभा राजन्यस्य˘ यथासुष्ठु यथाशर्करमनुव्यूहत्येथ द्वाभ्या-
मात्मन्नग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति˘ स्वयं-
10 चितिं जपति यास्ते अग्ने समिधो यानि धामेति˘ श्वेतमश्वमभिमृश्या-
धिद्रवणं जपत्यपामिदं न्ययनं नमस्त इति द्वाभ्यामेथ चेत्रवितृणीं
चतुरो लोष्टानुपदधात्युत्ते तभ्नोमि पृथिवीं त्वत्परीमं लोकं निदधन्मो
अहं रिषं । एतां स्थूणां पितरो धारयन्तु तेत्रा यमः सादनात्ते
मिनोत्विति पुरस्तादुपदधात्युपसर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं
15 सुशेवां । ऊर्णम्रदा युवतिर्दक्षिणावत्येषा त्वा पातु निर्ऋत्या उपस्थ
इत्युत्तरत˘ उच्छ्वञ्चस्व पृथिवि मा वि बाधिथाः सूपायनास्मै भव
सूपवञ्चना । माता पुत्रं यथा सिचाभ्येनं भूमि वृण्विति पश्चादुच्छ्वञ्च-
माना पृथिवी हि तिष्ठसि सहस्रं मित उप हि श्रयन्तां । ते गृहासो

---

4. From सिकता निवपति to अनुव्यूहति (l. 8) also in the cayanasūtra (26. s. f.) with the exception of पितरः . . . सादयतु.

8. On यथासुष्ठु यथाशर्करं compare Mahāgnisarvasva fol. 26. a: यथा अग्निचित्रं समं भवति यथा च तद्बहिः शर्करा दृढा भवन्ति तथा शर्करा अनतिक्रम्य संभारान्व्यूहति.

8. 9. With अथ द्वाभ्यां T Bū H begin a new chapter; H Bū repeat the words अथ द्वाभ्यां . . . °णीते, H closing them with ॥ १४ ॥. In Bū the number is added in margine.

11. TS. IV. 6. 1. 3.

मधुश्चुतो विश्वाहास्मै शरणाः सन्त्विति दक्षिणतस्तया देवतं कृत्वा
सूददोहसः करोत्यथैनं तिलमिश्राभिर्धानाभिरुपकिरत्येणीर्धाना हरि-
णीरर्जुनीः सन्तु धेनवः । तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा
सन्त्वनपस्फुरन्तीरित्यथैतदभिवान्यायै दुग्धमर्धपात्रं दक्षिणत उपदधा-
5 त्येषा ते यमसादने स्वधा निधीयते गृहे । अक्षितिर्नाम ते असा-
वित्येव यजमानस्य नाम गृह्णाति ˘ तया देवतं कृत्वा सूददोहसं
करोति ˘ दक्षिणतः समूलं बर्हिर्निदधातीदं पितृभ्यः प्रभरेम बर्हि ˘ र्देवेभ्यो
जीवन्त उत्तरं भरेम । तत्त्वमारोहासो मेध्यो भव यमेन त्वं यम्या
संविदान इति ˘ तया देवतं कृत्वा सूददोहसं करोत्यथ नलेषीकामु-
10 पदधाति नलं प्लवमारोहैतं नलेन पथोन्विहि । स त्वं नलप्लवो भूत्वा
संतर प्रतरोत्तरेति ˘ तया देवतं कृत्वा सूददोहसं करोत्यथास्थिकुम्भं
भुक्तभोगेन वाससा निर्णिज्य यथाङ्गं चिनोति सवितैतानि शरीराणि
पृथिव्यै मातुरुपस्थ आदधे । तेभ्यः पृथिवि शं भवेत्येव षड्ढोतारं व्या-
चष्टे ˘ षड्ढोता ˘ सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च
15 धर्मणा । अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा
शरीरैः । परं मृत्यो अनुपरेहि पन्थामिति चोथैनमुपवातयति शं
वातः शं हि ते घृणिः शमु ते सन्त्वोषधीः । कल्पन्तां मे दिशः
शग्मा इत्यथैतान्पञ्च चरून्त्सापूपानुपदधात्यपूपवान् घृतवांश्चरुरेह सी-
ददुत्तभ्नुवन्पृथिवीं द्यामुतोपरि । योनिकृतः पथिकृतः सपर्यत ये
20 देवानां घृतभागा इह स्थ । एष ते यमसादने स्वधा निधीयते
गृहेसावित्येव यजमानस्य नाम गृह्णाति ˘ दशाक्षरा तां रक्षस्व तां
गोपायस्व तां ते परिददामि तस्यां त्वा मा दभन्पितरो देवता ।
प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवः सीदेति पुरस्तादुप-
दधात्यपूपवान्कृतवानित्युत्तरतोऽपूपवान् क्षीरवानिति पश्चादपूपवान्द-
25 धिवानिति दक्षिणतोऽपूपवान्मधुमानिति मध्ये ˘ शताक्षरा सहस्राक्षरा-

---

24. From °कृतवान् to क्षीरवान् omitted in H Bü.

युताचराच्युताचरेति प्रतिदिशमनुषजति तया देवतं कृत्वा सूददोहसः करोत्यैनमतिलमिश्राभिर्धानाभिरुपकिरत्येतास्ते स्वधा अमृताः करोमि यास्ते धानाः परिकिराम्यत्र । तास्ते यमः पितृभिः संविदानोत्र धेनूः कामदुघाः करोत्विल्येथ चतुरः स्तम्बानुपदधाति चरूणा-
5 मुपरिष्टात्त्वामर्जुनौषधीनां पयो ब्रह्माण इद्विदुः । तासां त्वा मध्याद्दादधे चरुभ्यो अपिधातव इति पुरस्तादर्जुनस्तम्बं दूर्वाणां स्तम्बमाहरैतां प्रियतमां मम । इमां दिशं मनुष्याणां भूयिष्ठानुविरोहत्वित्युत्तरतो दूर्वास्तम्बं काशानां स्तम्बमाहर रक्षसामपहत्यै । य एतस्यै दिशः पराभवन्नघायवो यथा ते नाभवन्पुनरिति पश्चात्काशस्तम्बं दर्भाणां
10 स्तम्बमाहर पितृणामोषधीं प्रियां । अन्वस्यै मूलं जीवादनु काण्डमथो फलमिति दक्षिणतो दर्भस्तम्बं चतुर्णां स्तम्बानामग्रैर्मध्यमं चरुमपिदधात्येतैरेव चतुर्भिर्मन्त्रैस्तया देवतं कृत्वा सूददोहसः करोत्यथ चतुरो नानावृक्षीयान्परिधीन्परिदधाति मा त्वा वृक्षौ संबाधिष्टां मा माता पृथिवि त्वं । पितॄन्ह्यत्र गच्छास्येधासं यमराज्य इति पर्णमयवारणौ
15 पुरस्ताच्चोत्तरतश्च मा त्वा वृक्षौ संबाधेथां मा माता पृथिवी मही । वैवस्वतं हि गच्छासि यमराज्ये विराजसीति वैतसशमीमयौ पश्चाच्च दक्षिणतश्च तया देवतं कृत्वा सूददोहसो करोत्येव नलेषीकाविल्येकैकं लोष्टानुपदधाति पृथिव्यास्त्वा ॥ १५ ॥

पृथिव्यास्त्वा लोके सादयाम्यमुष्य शर्मासि पितरो देवता प्रजा-
20 पतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति शतं पुरस्तादुपदधात्यन्तरिक्षस्य त्वा लोके सादयामीति शतमुत्तरतो दिवस्त्वा लोके सादयामीति शतं पश्चाद्दिशां त्वा लोके सादयामीति शतं दक्षिणतो नाकस्य त्वा पृष्ठे ब्रध्नस्य त्वा विष्टपे सादयामीति द्विशतं

13. नानावृक्षीयान् H Bü; °वृक्ष्यान् Brl; °वृक्षान् T. Comp. p. 20. 5.

17. नलेषीकाविल्येके Brl, T; नलेषीकामुपदधातीत्येके H Bü.

मध्ये ऽतया देवतं कृत्वा सूददोहसः करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणाथो सीद शिवा त्वं । इन्द्राग्नी त्वा बृहस्पति-रस्मिन्योनावसीषदन्निति ऽलोकंपृणाभिः सहस्रं संपद्यते ऽद्विषहस्रादिष्वे-तान्येव पुनः पुनरुपदध्यात्काठकाग्निचितावपि पञ्चाशीतिशतमुपदध्या-
5 द्विभ्यतेऽग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्यामिक्षया वेति काठ-कामीनां ब्राह्मणं ऽतया देवतं कृत्वा सूददोहसः करोत्यथावद्रुत्य कृष्णमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्टो दिवीति ऽतया देवतं कृत्वा सूददोहसं करोत्यथैनमुपवातयति शं वातः शं हि ते घृणिः शमु ते सन्त्वोषधीः । कल्पन्तां ते दिशः सर्वा इत्यथैनमभिमृशतीद-
10 मेव मेतोपरामार्तिमाराम कां चन । तथा तदश्विभ्यां कृतं मित्रेण वरुणेन चेति ऽपुरस्ताद्वारणशाखां निदधाति वरणो वारयादिदं देवो वनस्पतिः । आर्त्यै निर्ऋत्यै द्वेषाच्च वनस्पतिरित्युत्तरतः चैत्रवितृणीं निदधाति विधृतिरसि विधारयास्मद्घा द्वेषांसीति ऽपश्चाच्छमीशाखां निदधाति शमि शमयास्मद्घा द्वेषांसीति ऽदक्षिणतो यवान्निदधाति
15 यव यवयास्मद्घा द्वेषांसीत्यथैनमुपतिष्ठते पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो गच्छ सुवर्गच्छ सुवर्गच्छ दिशो गच्छ दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छापो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरी-रैरिति ऽजघनेन चितां तिस्रो दक्षिणाप्राचीः कर्षूः कुर्वन्ति तत्पुरस्ता-द्व्याख्यातं ऽजघनन कर्षूः पर्णशाखे निहत्यावलेन गुल्वेन बद्धा विनिः-

---

1. From अथ लोकं° to अथावद्रुत्य (excl.) is omitted in Brl.

1. T has, as mostly in this part of the sūtra, only the pratika.

3. So T; द्विषाहस्रादिषु° H Bū.

6. This brāhmaṇam is found TBr. III. 12. 5. 12.

6. 7. The passage from अथावद्रुत्य to पृष्टो दिवीति is again taken from the cayanasūtra. Brl has: पृष्टो दिवि पृष्टो अग्निरिति. The whole passage is forgotten by T.

19. Before कर्षूः H Bū (not T Brl) have वा.

सर्पन्तीति तत्पुरस्ताद्व्याख्यातं ˘ यत्रापस्तदन्त्यनवेक्षमाणा ˘ अपः सचेला
दक्षिणामुखाः समृत्तिका आप्लवन्ते धाता पुनातु सविता पुनात्विति ˘
नामग्राहं त्रिस्त्रिरुदकमुत्सिच्योत्तीर्याचम्यादित्यमुपतिष्ठत उद्वयं तमसस्प-
रीत्येव गृहानायन्ति ˘ यत्रा च स्त्रिय आक्रन्दत्कुर्वन्त्येव शान्तिं कुर्वन्ति ˘
5 सौत्रामख्या प्रत्याम्नायो भवत्यत्रामिक्षया वेति ˘ संतिष्ठते लोष्टचितिः ˘
संतिष्ठते लोष्टचितिः ॥ १६ ॥

अथ गृहानेष्वनुपकल्पयते वारणं स्रुक्स्रुवं च वारणान्परिधीन्
कुशमयं बर्हिः पर्णमयमिध्मं लोहितं चर्मानडुहं नवं च सर्पिराञ्जनं
चाश्मानं चानडुहं च शमीशाखां च कुशतरुणकानि च दर्भस्तम्बं
10 चाज्यं च यवांश्चेत्येवान्तरेण ग्रामं च श्मशानं च तद्वृथाग्निमुपसमाधाय
कुशमयं बर्हिः स्तीर्त्वा वारणान्परिधीन्परिधाय पर्णमयमिध्ममभ्यज्य
स्वाहाकारेणाभ्याधायाथैतल्लोहितं चर्मानडुहं जघनेनाग्निं प्राचीनग्री-
वमुत्तरलोमोपस्तृणाति ˘ तदारोहन्ति यावन्तोऽस्य ज्ञातयो भवन्त्यारो-
हतायुर्जरसं गृणाना अनुपूर्वं यतमाना यति ष्ठ । इह त्वष्टा सुज-
15 निमा सुरत्नो दीर्घमायुः करतु जीवसे व इत्येथैनाननुपूर्वं कल्पयति
यथाहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति क्लृप्ताः । यथा न पूर्व-
मपरो जहात्येवा धातरायूंषि कल्पयैषामित्येव वारणेन स्रुवेण वा-
रण्यां स्रुचि चतुर्गृहीतं गृहीत्वा जुहोति न हि ते अग्ने तनुवै क्रूरं

---

5. So gives Brl (only भवन्त्य॰); सौत्रामख्या T Brl, ॰मख्याः H Bü, quot. Gop.; भवत्य॰ H Bü Gop.; भवंत्य॰ (न्त्य॰) T Brl; अत्र is omitted by Gop.; ॰ामिक्षया T Brl; ॰ामिक्षाया Gop.; ॰ामिक्षायां H Bü; वेति Brl Gop.; चेति T; instead of वे(चे)ति H Bü have जुहुयादिति.

7. So T Brl Gṛhyaprayoga; स्रुवंचस्रुचंच H Bü.

10. तद्वृथाग्नि॰ H Bü T; वृथाग्नि॰ quot. Gop.; लौकिकाग्नि॰ Brl.

15. अनुपूर्वं H Bü Brl Gṛhyaprayoga; अनुपूर्वान् T. Compare also Hir. XXVIII. 11.

चकार मर्त्यः । कपिर्बभस्ति तेजनं पुनर्जराय गौरिव । अप नः
शोशुचदघमग्ने शुशुध्या रयिं । अप नः शोशुचदघं मृत्यवे स्वाहेत्येव
वारणेन स्रुवेणोपघातं जुहोत्यप नः शोशुचदघमिति द्वादश स्रुवाहु-
तीरथोपोत्थायानड्वाहमन्वारभन्तेनड्वाहमन्वारभामहे स्वस्तये । स न
5 इन्द्र इव देवेभ्यो वह्निः संपारणो भवेतिˇप्राञ्चो यन्तीमे जीवा वि
मृतैराववर्त्तिन्नभूद्भद्रा देवहूतिर्नो अद्य । प्राञ्चोगामा नृतये हसाय
द्राघीय आयुः प्रतरां दधाना इतिˇजघन्यः शमीशाखया पदानि
संलोपयते मृत्योः पदं योपयन्तो यदैम द्राघीय आयुः प्रतरां द-
धानाः । आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियास
10 इत्यथान्तरेणाग्निं च ग्रामं चाश्मानमुपदधातीमं जीवेभ्यः परिधिं द-
धामि मा नोनुगादपरो अर्धमेतं । शतं जीवन्तु शरदः पुरूचीस्तिरो
मृत्युं दध्महे पर्वतेनेत्यथैताः पत्नयो नवेन सर्पिषा संमृशन्त इमा ना-
रीरविधवाः सुपत्नीराञ्जनेन सर्पिषा संमृशन्तामितिˇकुशतरुणकैस्त्रैक-
कुदेनाञ्जनेनाङ्क्ते यदाञ्जनं त्रैककुदं जातं हिमवतस्परि । तेनामृतस्य
15 मूलेनारातीर्जम्भयामसीत्यथैतानि कुशतरुणकानि समुच्छित्य दर्भस्तम्बे
निदधाति यथा त्वमुद्भिनत्स्योषधे पृथिव्या अधि । एवमिम उद्भिन्दन्तु
कीर्त्या यशसा ब्रह्मवर्चसेनेतिˇप्रत्येत्य गृहानासन्दीः प्रोष्ठानित्यारोह-
न्त्यनश्रवो अनमीवाः सुशेवा आरोहन्तु जनयो योनिमग्र इत्येजं चै-

---

8. **संलोपयते** H Bü Brl; **संलोपयते** T; **संकुलोपयन्ते** Gṛhyaprayoga. Comp. Hir. XXVIII. 11 and Wiener Zeitschr. für die Kunde des Morgenl. VIII, p. 369.

10. With **अथान्तरेणाग्निं** Brl breaks off.

15. **समुच्छित्य** Bü T.Ā. p. 714; **समुच्चित्य** H Gṛhyaprayoga; T om.; compare C. 461.

17. **गृहानासंतिप्रोष्ठानित्यारोहन्त्य°** T; **गृहएनासंदींप्रोष्ठानित्या-रोहयंत्य°** H Bü. **आसन्दींप्रोष्ठान्** Gṛhyaprayoga.

तदहः पचन्ते यवौदनं चौजस्वान्नात्वजोस्यजास्मद्धा द्वेषांसीति ˘ यवौ-
दनस्य च प्राश्नाति यवोसि यवयास्मद्धा द्वेषांसीत्यथास्य श्राद्ध
कुर्वन्त्येकस्यां व्युष्टायां तिसृषु वा पञ्चसु वा सप्तसु वा नवसु वैकाद-
शसु वायुग्मेष्वहःस्वर्धमासेषु मासेष्वृतुषु संवत्सरे वा दद्यात्सोममहर-
5 हरेकादश मासान्नयन्ति ˘ न द्वादशं मासमभ्यारोहन्ति ˘ संवत्सरे संवत्सर
एतस्मिन्नहनि दद्यात्स एष एवं विहित एवानाहिताग्नेः ˘ स्त्रियाः पुं-
लिङ्गपात्रचयनेष्टकाकेशवपनवर्जं ˘ पितुर्मातुराचार्यस्य वा क्रियेत ˘ सह-
सदक्षिणो वाप्यन्यस्य पितृमेधः ˘ संतिष्ठते पितृमेधः ॥ १७ ॥

॥ इति प्रथमः प्रश्नः समाप्तः ॥

---

1. पचंते T; the others are defect here.


3. So T; एकस्यांवाकाष्टायां H Bü.

5. अहर् once H Bü. — So T; द्वादशमसस्यारोहंति H Bü.; comp. Baudh. gṛhyapariś. III. 11 (in Altind. Ahnencult, p. 217, l. 7).

8. So H Bü; वाप्यनन्यस्यसंतिष्ठतेपितृमेधः ॥ T.

अथ

हिरण्यकेशिपितृमेधसूत्रम्



अथातः पैतृमेधिकं दहनं पुरुषाकृतिर्ह्यस्य प्रियतमेति विज्ञायत आहिताग्नेर्मरणसंशये दहनदेशं जोषयते दक्षिणाप्रत्यक्प्रवणमनिरिण-मसुषिरमनूषरमभङ्गुरमनुपहतमविसृग्दार्यनुपच्छिन्नप्रवणं यस्माद्दक्षिणा-प्रतीच्य आपो निःसृत्योदीच्य एत्य महानदीमवेत्य प्राच्यः संपद्यन्ते
5 समं वा सुभूमिं बहुलौषधिं वनस्थावनं चैचस्थाचैचमिरिणस्यानिरि-णमित्येके यस्मादारात्क्षीरिणो वृक्षाः कण्टकिनश्च तथौषधीर्स्तस्मिंस्त्रे-धोल्लिख्योद्धत्यावोक्ष्य गार्हपत्यं मथित्वाहवनीयं ज्वलन्तमुद्धरत्यन्तरा दाहचितेरवकाशं शिष्ट्वाग्नीनुपवपति पुरस्तादाहवनीयं पश्चाद्गार्हपत्यं दक्षिणतोन्वाहार्यपचनं पुरस्तात्सभ्यावसथ्यावौपासनं च तेष्वजस्रेषु जुहु-

---

1. A begins with आहिताग्नेर्म°.

3. अनुपहतम° A² and Pi. Sā.; अनूप° all the others. Comp. Baudh. 7. 13. — अविसृग्दारि T H H² B¹ B²; °सृग्दारि A¹ A²; comp. Baudh. l. c. and C. 129; Pi. Sā. quotes with अविदरणं.

4. °प्रतीच्य आपो A¹ A² H Pi. Sā.; प्रतीच्या T B²; प्रती-च्यापो B¹. — निःसृत्य A¹ A² Pi. Sā.; निससृत्य (i. e. निसृ°) B¹; निसृत्य T B².

5. समंवासुभूमिं H H² B¹ B² A¹ A² Pi. Sā.; समंवासभूमिं T. Most probably the original reading was समं वा भूमिं, as given by the Tanjore Brahmamedhaprayoga, comp. Baudh. 8. 2 and Hir. XXIX. 4, Kauś. sū. 25. 24, Śat. Br. III. 6. 1. 18, Kāty. śrs. VI. 3. 12. — बहुलौषधिं only A¹ A² Pi. Sā.; °षधि the others.

5. 6. So (अनिरिणमित्येके) H B¹; °रिणइत्येके T H². The passage वनस्थावनं . . . इत्येके (l. 5 and 6), missing in A¹ A², is found in Pi. Sā.

6. So all except H: तथौषधीश्च and Pi. Sā.: तथौषध्यस्.

द्वसति प्राणा वा एत आहिताग्नेर्यदग्नयस्त एनं समिद्धाः पारयन्त्यगदो
ह भवतीति विज्ञायते तस्यैतदग्निहोत्रोच्छेषणं निदधाति ग्रामे वा-
स्यैतेन कल्पेन जुहुयाद्यदि जीवेत्यविदेतदग्निहोत्रोच्छेषणं यदि मरणं
गच्छेत ब्रह्मविदाप्नोति परं भृगुर्वै वारुणिरित्येतावनुवाकौ ब्रह्मविदो
5 दक्षिणे कर्णे जपत्यायुषः प्राणꣳ सन्तन्विति वा यदि प्रैति प्रेतमात्याः
प्राचीनावीतिनः केशान्प्रकीर्य पांसूनावपन्ते तं जघनेन गार्हपत्यं द-
क्षिणाशिरसं दर्भेषु संवेशयन्ति सर्वस्य प्रतिशीवरीति संवेषु संवेशनेषु
दक्षिणाशिराः पूर्वया द्वारोपनिर्हृत्यान्तराग्नी निपात्यान्वारब्धे मृत
आहवनीये स्रुवाहुतिं जुहोति परेयुवाꣳसमित्येवं गार्हपत्ये तूष्णीमन्वा-
10 हार्यपचनेऽथास्य दक्षिणेन विहारं परिश्रिते प्रेतस्य केशश्मश्रुलोमन-
खानि वापयित्वा स्नापयित्वा ग्राम्येणालङ्कारेणालङ्कृत्य शुक्लसूत्रेणाङ्गुष्ठौ
बद्ध्वा नलदमालामाबध्य ॥ १ ॥

औदुम्बर्यामासन्द्यां कृष्णाजिनं दक्षिणाग्रीवमधरलोमास्तीर्य त-
स्मिन्नेनमुत्तानं निपात्य पत्तोदशेनाहतेन वाससा प्रोर्णोतीदं त्वा वस्त्र-
15 मित्येषास्येतरदपादत्तेपैतद्वहेति तत्पुत्रो भ्राता वान्यो वा प्रत्यासन्न-
बन्धुः प्रतीतः परिधाया जरसो वसीतोऽथाप उपस्पृश्यापरेणाहवनीयं

---

1. सुसमिद्धाः A[1] A[2].

3. The passage यदि जीवेत् . . . यदि प्रैति not found in A[1] A[2].

5. So H[2] T; कर्णे जपतीतरस्यायुषः H B[1] Pi.Sā.

6. तं T H[2] B[1] A[1]; प्रेतं H.

10. विहारं H A[1] Pi.Sā.; विहारे T H[2]. — परिश्रिते T H H[2] A[2] Pi.Sā.; °श्रृते A[1]; Gopāla: परिश्रिते कटादिभिः परिवृते.

11. 12. A[1] has: स्नापयित्वाकाशावालङ्कृत्य नलदमालामाबध्य, but compare Gopālayajvan: केचिदत्राकाश इति न पठन्ति तत्राकाशादन-र्थसिद्धिं भवत्येव.

12. So T H[2]; आबध्य नलदेनानुलिंपन्ति H. None of these words are found in B[2] (B[1] is defect here).

16. अथाप उपस्पृश्य only in the MSS. of Hir., not in A and B.

प्रतीचीस्तिस्र उत्तपराजीः स्तीर्त्वा परापावमवहतानां व्रीहीणामन्वा-
हार्यपचने तूष्णीमुपचरितं चरुं श्रपयति ˘ गार्हपत्ये च मैत्रावरुणीमा-
मिक्षां यदि सांनाय्ययाजी भवति ˘ पालाशं काष्ठमग्न्यगारात्तृणैर्गार्हपत्य
आदीप्य तेनोल्मुकप्रथमा गच्छन्त्यजमनुनयन्ति राजगवीं सव्ये पदि
5 बद्धामग्नीनग्निभाण्डमग्निहोत्रोच्छेषणमित्येतान्यनुहरन्ति ˘ न हीनमन्वाह-
रेयुरेष तमाद्दतैनसा वहन्तीत्येके ˘ कृष्णगवं स्यादिति शाट्यायनक-
मिमौ युनज्मीत्येष योजन आम्नात ˘ आदीयमानमनुमन्त्रयते पूषा
त्वेतश्च्यावयत्विति ˘ तुरीयमध्वनो गत्वा निधाय दक्षिणतो लोष्टानव-
रुज्य तेषु चरुं प्रतिष्ठाप्यैकवाससो दक्षिणान्केशपक्षानुद्ग्रथ्य सव्यान्प्रस्रस्य
10 दक्षिणानूरूनाघ्नानाः त्रिभिरभिधून्वन्तस्त्रिः प्रसव्यं परियन्त्यप नः शो-
शुचदघमिति ˘ सव्यानुद्ग्रथ्य दक्षिणान्प्रस्रस्य सव्यानूरूनाघ्नाना अनभि-
धून्वन्तस्त्रिः प्रतिपरियन्त्यप नः शोशुचदघमिति ˘ मेक्षणेन लोष्टेषु च-
रोस्त्रिः प्रयौति ॥ २ ॥

---

1. °राजीस्तो° T H H² A¹; °राजीरागार्हपत्यात् A²; °राजीर् Brahm. pray.

5. °भाण्डमित्येताननुहरन्तिनहीनम° T; °भाण्डमग्निहोत्रोच्छेषण-मित्येताननु° H; °भाण्डमग्निहोत्रोच्छेषणमितिनहीनम° B¹; °भाण्ड-मित्येतान्यनुहरंतिनहीनम° H² (pr. m.) B²; °भाण्डमग्निहोत्रोच्छेषणंये-नचान्येनार्थोभवतिनहीनम° H² (sec. m.) Pi. Sā.; °भाण्डमितियेनचा-न्येनार्थोभवतिनहीनम° A¹ A² (अग्निभाण्डमित्यौपासनभाण्डः A²). The sūtra येनचा° भवति is very common in the Kalpa of Āpast.

7. एष H A¹ A² B; एषां T H²; A²: इमौ युनज्मीत्यनुष्टुबात्मक एष मन्त्रो वाहयोर्योजनकरणतया आम्नातः.

8. 9. अवरुज्य i. e. उत्खाय (A²).

9. उद्ग्रथ्य T H A¹ (both times), Brahm. pray. (twice), Pi. Sā.; उद्ग्रन्थ्य T H² (twice). With this passage comp. Āp. śrs. XIV. 22. 1—2.

13. त्रिभागं H²; त्रिः all the others.

परीत्य परीत्य प्रयौतीत्येक˘आदीयमानमनुमन्त्रयते पूषेमा आशा इति˘तुरीयमध्वनो गत्वा निधाय पूर्ववत्कृत्वादीयमानमनुमन्त्रयत आयुर्विश्वायुरिति˘तुरीयमध्वनो गत्वा निधाय पूर्ववत्कृत्वा तृतीयेन सह चरुं प्रक्षिणुयाद्देयास्य कपालानि सुसम्भिन्नानि संभिनत्ति यथैषूदकं न तिष्ठेत्तूष्णीं चतुर्थमादाय गत्वा जघनेन दहनदेशं निधायोदञ्चः समुत्क्रामन्त्येषा वै देवमनुष्याणां शान्ता दिक्तामेवैनाननूत्क्रामन्तीति विज्ञायते˘प्रत्येत्य हरिख्या पलाशशाखया शमीशाखया वा श्मशानायतनं संमार्ष्ट्यपेत वीतेति˘दक्षिणतः शाखामुदसित्वाप उपस्पृश्योद्धत्यावोक्ष्य हिरण्यशकलमवधाय तस्मिन्दक्षिणाग्रान्दर्भान्संस्तीर्य तेषु दक्षिणाग्रैर्याज्ञिकैः काष्ठैर्दारुचितिं चित्वाग्नीनुपवपति पुरस्तादाहवनीयं पश्चाद्गार्हपत्यं दक्षिणतोन्वाहार्यपचनं पुरस्तात्सभ्यावसथ्यावौपासनं च˘ दक्षिणाप्रागग्रैर्दर्भैरग्नीन्दारुचितिं च परिस्तीर्य दारुचितेः पश्चाद्दर्भान्संस्तीर्य तेष्वेकैकशः पात्राणि प्रयुनक्ति˘रज्जूरवहत्यासन्दीमपविध्यन्ति˘ रज्जुषु चैव कृष्णाजिने चोत्तानः शेते˘एकपवित्रेण प्रोक्षणीः संस्कृत्य मृतं पात्राणि दारुचितिं च प्रोक्ष्याथाज्यानि गृह्णाति दर्शपूर्णमासव-

---

3. प्रक्ष्णुयाद् T H[2] H; प्रक्षिणुयात् A[1] Pi.Sā.; प्रदक्षिणाद् B[1]; प्रक्ष्णुयात् seems to be recommended by कुम्भमाक्ष्णौति, Kāty. śrs. XXI. 4. 6, प्रक्षिणुयात् by Hir. Kalpasūtra XII. 8: कुम्भं प्रक्षिणोति and Śat. Br. XIII. 8. 3. 4: कुम्भं प्रक्षीय. Comp. also C. 464*.

7. 8. So T H B[1] Pi.Sā.; अवोक्ष्य मध्ये हिर° H[2] A[1] A[2].

9. निधाय A[1]; अवधाय the others.

12. अग्नीन्दारुचितिं च T B[1] H[2] (अग्निं); अग्नीन्प्रेतं दारुचितिं च H Brahm. pray.; A is defect here.

13. तेष्वेकैकशः om. T. — After प्रयुनक्ति H adds: शुक्लसूत्रे छित्त्वा and reads: अपहत्या°.

15. A[1] omits अथ before आज्यानि गृह्णाति. Before अथ H inserts: अथाज्यं निर्वपति दर्शपूर्णमासवत्तूष्णीं.

तूष्णीमेंमिहोचोद्वेषणमन्येन दध्ना संसृज्य पात्राणि पूरयति यान्यासे-
चनवन्त्यभ्युचतीतराश्चरिक्तताया इति विज्ञायते ॥ ३ ॥

अथैनमुदरे विदार्य निरान्त्रं निष्पुरीषं कृत्वावटे पुरीषमवधाय
प्रक्षाल्य प्रत्यवधाय सर्पिषा पूरयतीति शाट्यायनकमैंपि वा न निष्पु-
5 रीषं कुर्याद्यदि कुर्यात्प्रजा ह्यस्य चोधुका भवतीति विज्ञायतेऽथ रा-
जगवीमुपाकरोति भुवनस्य पत इति जरतीं मूर्खां तज्जघन्यां कृष्णां
कृष्णाक्षीं कृष्णवालां कृष्णखुरामैंपि वाक्षिवालखुरमेव कृष्णं स्यात्तां
ज्ञातयोन्वारभन्तेंऽघात्यन्तप्रदेशो धून्वनेन्वारम्भणे सङ्गाहने संसर्पण उद्-
कोपस्पर्शन आरोहण इति सर्वत्र कनिष्ठप्रथमा अनुपूर्वा इतरे स्त्रि-
10 योऽग्रे तां घ्नन्त्युत्सृजन्ति वा यद्युत्सृजन्त्यपश्याम युवतीमाचरन्तीमित्येता-
भिस्तिः प्रसव्यं राजगवीमग्नीन्दारुचितिं च परिणीय ये जीवा इत्य-
भिमन्त्र्य माता रुद्राणामिति द्वाभ्यामुत्सृजन्ति ॥ ४ ॥

यदि घ्नन्ति ततः संप्रैष्यत्यपिधाय मुखं दक्षिणापदीं प्रत्यक्शिरसीं
घ्नतेति निहन्यमानायाः सव्यानि जानून्यनुनिघ्नन्तः पांसूनवमृजन्ते पुरु-
15 षस्य सयावरीत्यथाह विस्रंसयतेति विस्रस्यमानामनुमन्त्रयते पुरुषस्य
सयावरि वि ते प्राणमसिस्रसमिति ततः संप्रैष्यत्यङ्गादङ्गादनस्थिकानि
पिशितान्युत्खिदन्तोप्रक्षालयन्तोप्रच्यावयन्त उल्मुके श्रपयतात्प्रज्ञातं ह-

---

1. 2. The passage पात्राणि . . . इति विज्ञायते occurs also Āp. śrs. XV. 14. 13.

5. भवन्तीति H B[2] Pi. Sā.; भवतीति T A[1] H[2]. A[2] also has sing. verbi; comp. Baudh. 4. 16.

6. जरंतीं T H. For this passage see TS. VII. 1. 6. 4.

7. So H[2] (°खुमुत्पमेव°) A[1] A[2] B[1]; °खुरामेवकृष्णाऽस्यात् T H.

8. धून्वने A[1] A[2] (twice) H[2] B[1]; धुन्वने T H[2].

11. चर्षिं T. — राजगवीं om. A[1] A[2]. — H adds again प्रेतं before दारुचितिं; राजगवीं -- दारुचितिं B[1].

17. उत्खिदन्तोप्रक्षा° T H H[2]; उत्खदाप्रक्षा° B[1] B[2] A[1] A[2].

द्यं निधत्तात्प्रज्ञातौ मतस्नौ प्रज्ञातं मेदः प्रज्ञातां वपां प्रज्ञातं
सपाद्वालशीर्षचर्मेत्येव पत्नीमुपनिपातयतीयं नारीति ˘ तां पतिस्थ
एकधनेनोत्थापयत्यन्यो वा ब्राह्मण उदीर्ष्व नारीत्येव पत्नी साहस्रं
वरं ददाति ˘ हस्तौ संमार्ष्टि ˘ सुवर्णेन ब्राह्मणस्य सुवर्णं हस्तादिति ˘
5 धनुषा राजन्यस्य धनुर्हस्तादिति ˘ मणिना वैश्यस्य मणिं हस्तादित्येवैनं
चितावुपर्यध्यूहत्येव वा पत्न्याः संवेशनादि क्रियतेऽथास्य प्राणायतनेषु
हिरण्यशल्कान्प्रत्यस्यत्याज्यबिन्दून्वा ˘ पात्राणि चिनोति ˘ सर्वाण्यनुलो-
मानि ध्रुवावर्जं ˘ तस्य दक्षिणे हस्ते स्फ्यं जुहूं च निदधाति ˘ सव्य
उपभृतमुरसि ध्रुवामरणी च ॥ ५ ॥

10 मुखेऽग्निहोत्रहवणीं ˘ नासिकयोः स्रुवावक्ष्णोर्हिरण्यशकलावाज्यस्रुवौ
वा ˘ कर्णयोः प्राशित्रहरणे भित्त्वा वैकं ˘ हन्वोरुलूखलमुसले ˘ दत्सु ग्राव्णो
यदि ग्रावाणो भवन्ति ˘ शिरसि कपालानि ˘ ललाट एककपालमुदरे
पिष्टसंयवनीं पात्रीं ˘ नाभ्यामाज्यस्थालीं ˘ पार्श्वयोः शूर्पे छित्त्वा वैकं ˘
वङ्क्षणयोः सांनाय्यकुम्भ्यौ यदि संनयत्यण्डयोर्दृषदुपले ˘ शिश्ने दृषारवं
15 शम्यां च ˘ प्रतिष्ठयोरग्निहोत्रस्थालीमन्वाहार्यस्थालीं च ˘ पत्त उपावह-

---

1. मतस्नौ T; मतस्ने H H^2 (प्र° म° fails in B^1); वृक्कौ A^1. Baudhāyana (11, 7) has मतस्नौ; in the Saṃhitās the dual मतस्ने is current. See also Schwab, Das altind. Thieropfer, p. 127.

2. पतिस्थ H A^1 A^2; पतित्य B^1 B^2 Pi. Sā.; H^2 is defect here; पतिक्ष or पतिथ T. Comp. C. 176.

3. साहस्रं T H^2 A^1 B^1 B^2; सहस्रं H.

7. °शकलान् A^1 A^2; the others, also Pi. Sā.: शल्कान्.

10. अक्ष्णोर् T H H^2; so also Baudh. 10, 10; अक्ष्योर् A^1 A^2 B^1.

12. The passage यदि ग्रा° भ° seems to be missing in A^1 A^2.

14. यदि संनयति missing in A^1 A^2. — दृषारवं T H H^2; दृष-- B^1; वृषारवं A^1, also Baudh. (10. 19) and the Mādhyandina-texts. Gopālayajvan (A^2) seems to have known both readings. Compare C. 212.

रणीयं कूर्चं ˘ वेदं शिखायां ˘ शिरस उपसादनीयमिडापात्रं चैममग्ने
चमसमिति मध्ये चमसमेवंशिष्टान्यन्तरा सक्थिनी ˘ स एष यज्ञायुधी
यजमानोऽञ्जसा स्वर्गं लोकमेतीति विज्ञायत ˘ उल्मुके वियूष्काख्यवदा-
नानि श्रपयित्वा हृदयेऽस्य हृदयं निदधाति ˘ दक्षिणे हस्ते दक्षिणं
5 मतस्नं सव्ये सव्यं श्यामशबलाभ्यां त्वेति ˘ हस्तयोरेव मैत्रावरुणीमामिक्षां
मित्रावरुणाभ्यां त्वेति ˘ वपयास्य मुखं प्रोर्णोति मेदसा शिरः संप्रोर्णुष्व
मेदसा पीवसा चेति ॥ ६ ॥

अथैनं सपादवालशीर्षचर्मणोत्तरलोम्ना प्रोर्णोत्यग्नेर्वर्मेत्यथैनमुपो-
षति मैनमग्ने विदह इति पुरस्तादाहवनीयेन ˘ शृतं यदेति पश्चाद्गार्ह-
10 पत्येन ˘ तूष्णीं दक्षिणतोऽन्वाहार्यपचनेन ˘ पुरस्तात्सभ्यावसथ्याभ्यामौपासनेन
चोथैनमुपतिष्ठते सूर्यं ते चक्षुरिति ˘ विज्ञानमुपैति यद्यूर्ध्वो धूम उदि-
याद्द्युलोको ह भवतीति विज्ञायते यद्यन्तरिक्षमन्तरिक्षलोको यदि
पृथिवीं पृथिवीलोको ˘ जघनेन चितिमजमवत्तेन शुल्वेन संवध्नात्यजो
भाग इत्युद्द्रवन्तमनुमन्त्रयते˘चैतद्धविरिडसूनेन पात्र्या चमसेन वा जुहो-
15 त्यग्नये रयिमते स्वाहेति ˘ नव च स्रुवाहुतीर्य एतस्य पथो गोप्तार
इत्येतैरुभयं प्रहरति येन जुहोत्यथ परेणाग्निं प्राङ्मुख उपविश्याथैनं या-
म्येन सूक्तेन नवर्चेन पराचानुशंसति प्र केतुनेति ˘ जघनेन दहनदेशमु-

---

1. वेदं शिखायां missing in A^1 A^2.

3. उल्मुकेविग्रू° H H^2 A^1 A^2; उल्मुकेनाविग्रू° T; उल्मुकेग्रू° B^1.

5. Instead of मतस्नं H H^2 T B^1 have हस्तं. I have emended without hesitation. A^2 has again वृक्कं instead of मतस्नं.

11. 12. उदियाद्द H; उदीयात् T H^2. Instead of विज्ञायते A^1 reads विद्याद्.

14. So emended; उद्द्रवंतम° T H^2 B^1; उपद्रवंतम° H; the two words उद्द्र° अनु° fail in A^1(?). — Between अनुम° and (अ)चैतद्ध° T adds: (अ)यं वै त्वमस्मादित्य्. — इडसूनेन T A^1; इडसूनुना H H^2; इडमूलेन B^1. — पात्र्या B^1 A^1; पात्रिया T H H^2.

दीचीस्तिस्रः कर्षूः खात्वाश्मभिः सिकताभिश्चोपप्रकीर्यायुग्भिरुदकुम्भैरपः
परिस्राव्य तासु ज्ञातयः संगाहन्तेऽश्मन्वती रेवतीरिति ॥ ७ ॥

जघनेन कर्षूः पलाशशाखे शमीशाखे वा निघ्नन्त्यथैने दर्भमयेन
शुल्वेन संबध्य तेऽन्तरेण प्रसर्पन्ति यद्दै देवस्य सवितुः पवित्रमिति
5 जघन्यः शाखे व्युदस्यति या राष्ट्रात्पन्नादित्युद्वयं तमसस्परीत्यादित्यमु-
पस्थायानवेक्षमाणा अपोऽवगाहन्ते धाता पुनातु सविता पुनात्विति
केशान्प्रकीर्य पांसूनोप्यैकवाससो दक्षिणामुखाः सकृदुपमज्योत्तीर्य वासः
पीडयित्वोपविशन्त्येवं त्रिस्तत्प्रत्ययं तिलमिश्रमुदकमुत्सिच्याहरहरञ्जलि-
नैकोत्तरवृद्धिरा दशाहादप्रतीक्षा ग्राममेत्य यत्स्त्रिय आहुस्तत्कुर्वन्त्यन-
10 शनानध्ययनाधःशय्योदकोपस्पर्शनान्याकालमनूचीनेषु द्व्यहं त्र्यहं षडहं
द्वादशाहं वा गुरुष्वनशनवर्जं संवत्सरं मातरि पितर्याचार्य इत्येकेऽन-
शनानध्ययनवर्जं यावज्जीवं प्रेतपत्न्युदकोपस्पर्शनमेकभुक्तमधःशय्या ब्रह्म-
चर्यं क्षारलवणमधुमांसवर्जनं च ॥ ८ ॥

॥ इति प्रथमः पटलः ॥ १ ॥

---

7. From **केशान्प्रकीर्य** to the end of this paṭala is not given by Āpastamba (A), who finishes this paṭala with **पुनात्विति.** The reading, above given, from 7 sqq. to the end of the paṭala is that of T and H². After **उत्तीर्य** H and quot. Pi. Sā. p. 139 add: **सव्यं आन्वाच्य.** Comp. Āp. dhś. II. 15. 10 with Bühler's note.

8. After **तत्प्रत्ययं** H and quot. Pi. Sā. p. 76, 139 add: **सगोत्रनामधेयं.** — **उत्सिच्यैवमहर॰** H² and the quotation given by Gopālayajvan from the Āp. dhś.

10. **॰न्याकालमनुचीनेषु** T H H², but comp. Āp. dhś. II. 15. 11—12 (note) and Hir. dhś. (praśna XXVII. 8 med.), where the ms. Haug gives exactly the same passage with **आकालमनूचीनेषु.** — The interpunction of l. 10—14 is uncertain.

अपरेद्युस्तृतीयस्यां पञ्चम्यां सप्तम्यां वास्थीनि संचिन्वन्ति˘ क्षीरो-
त्सिक्तेनोदकेनौदुम्बरशाखयाप्रक्षालयञ्छरीराण्यवोक्ष्य यं त्वमग्ने
मन्यामेति पञ्चभिरेत एवाङ्गारान्दक्षिणा निर्वर्त्य तिस्रः स्रुवाहुतीर्जु-
होत्यवसृजेति प्रतिमन्त्रमयुग्मिभरुदकुम्भैः सव्योपचितमवोक्ष्यायुजः स्त्रियः
5 संचिन्वन्ति˘ यस्याः पुनर्विजननं न स्यात्सा सव्ये हस्ते नीललोहिताभ्यां
सूत्राभ्यां बृहतीफलमाबध्य सव्येन पदाश्मानमास्थाय सव्येन पाणिना
प्रथमानन्वीक्षमाणास्थीन्यादत्त उत्तिष्ठात इति दद्यः शिरसो वा˘
तद्वाससि कुम्भे वा निदधातीदं त एकमिति द्वितीयांसाभ्यां बाहुभ्यां
वा˘ पर ऊ˘त एकमिति तृतीया पार्श्वाभ्यां श्रोणीभ्यां वा˘ तृतीयेन
10 ज्योतिषेति चतुर्थ्यूरुभ्यां जङ्घाभ्यां वा˘ संवेशन इति पञ्चमी पद्भ्यामेवमे-
वायुजकारं सुसंचितं संचिन्वन्ति˘ भस्माभिसमूह्य संहत्य शरीराकृतिं
कृत्वा शरीराण्यादायोत्तिष्ठत्युत्तिष्ठ प्रेहीति˘ शम्यां पलाशमूले वा कुम्भं
निधाय जघनेन कुम्भं कर्ष्वादि समानमा स्नानान्मृदा स्नातीत्येके ॥ ९ ॥

अथातो हविर्यज्ञियं निवपनं यं कामयेतानन्तलोकः स्यादिति˘
15 समस्या उद्धतेवोक्षिते सिकतोपोप्ते परिश्रिते वाग्यतोऽनन्वीक्षमाणो
दर्भेष्वस्थीनि निवपति पृथिव्यास्त्वाक्षित्या अपामोषधीनां रसेन स्वर्गे
लोके निवपाम्यसावित्यनन्तलोको ह भवतीति विज्ञायतेऽथ यदि पु-

---

5. पुनर्विजनं T H H[2]; °विजननं A[1] A[2] Pi.Sā.; B[1] defect; B[2]: यस्याः पुनःप्रसूतिर्नास्ति.

8. So T H[2] B Pi.Sā.; तानि वाससि H; तद्वास्थिकुम्भे A[1].

10. 11. So H A[1] A[2] B[2]; °भ्यामेवायुज° H[2]; °भ्यामेववायुज° T, Pi.Sā. p. 126.

11. So H[2] A[1]; °भिसमुह्यसंहत्य T; समूह्यभस्मचितिमलङ्कृत्य-संहत्य H.

12. उत्तिष्ठति, given by T H H[2] B[2], missing in A[1] B[1] Pi.Sā. p. 127.

14. °र्यज्ञीयं A[1] A[2]. — लोकस्याद् T H[2] B[1] B[2] A[1]; लोकोस्यस्याद् H.

15. समस्या H H[2] A[1] A[2] B[2]; सामस्या T.

नर्धच्यन्तः स्युरग्निहोत्रहवणीं कृष्णाजिनं शम्यां दृषदुपले नानुप्रहरेयुरेत
एवाङ्गाराद्दक्षिणा निर्वर्त्य तिस्रो रात्रीरिद्धा दहनवदवकाशं जोष-
यित्वाग्निमुपसमाधाय संपरिस्तीर्यापरेणाग्निं दक्षिणाग्रान्दर्भान्संस्तीर्य
तेषु दर्शपूर्णमासवत्कृष्णाजिने शम्यायां दृषदुपलाभ्यामवाञ्जनं शरी-
5 राणि सुसंपिष्टानि पेषयित्वाज्यकुम्भे समुदायुत्याग्निहोत्रहवण्या जुहोत्य-
स्मात्त्वमधि जातोसीत्येतयैवान्तमेवैवाग्निहोत्रहवणीं कृष्णाजिनं शम्यां
दृषदुपले चानुप्रहरेयुर्न चात ऊर्ध्वं श्मशानं कर्तुमाद्रियेतोक्षतीर्वा-
स्यादहने वर्षेष्टकाभिर्वा परिचिनुयात्तमभ्येवादित्यस्तपति तमभि वातो
वाति तमापः स्पृशन्ते स नैवादित्यस्य सकाशाच्छिद्यते न वायोर्नापां
10 संसर्जनादेवं हि कौषीतकिर्विदां चकार ˘तं हैवं चक्रुरेवमु हाहैवमा-

---

4. **दर्शपूर्णमासवत्**, given by T H H² B², is omittted by A¹ B¹. — **अवाञ्जनं** all, also Bandh. 18. 4. B² gives: **सुवाञ्जनमिति सुवेण घृतमासिच्य पिनष्टि । - - - र्थो द्रष्टव्यः । अथ वा प्रमादपा-ठोवाञ्जनमिति ।** Compare C. 60, 404.

6. **शम्यायां** T H; **शम्याया** H²; **शम्या** A¹ B¹, cf. Bandh. 18. 7.

7. Emended hesitatingly. **आद्रियेतक्षतीर्** T H H² A¹ A² B¹; **विकल्पेनाक्षतीर्वा** B² (the bhāṣya), which points to **आक्षतीः**. The sūtra of Baudhāyana (18. 10) also has **आक्षतीः**. Possibly the original reading **आद्रियेताक्षतीः** was at first corrupted into **आद्रियेत । क्षतीः**. Comp. also C. 407.

10. One of the most difficult passages. **एवमुदाहैनमा°** T; **एवमुहाहैनमा°** H²; **एवमुहवैनमा°** H; **एवमुहवैनमा°** B¹; **एवमुहा-हैवमा°** A¹; A² also seems to point to the reading **°हैवमा°**, as it says: **आश्मरथ्यं चैवमेव चक्रुः.** Perhaps the words are to be separated thus: *evaṃ hi kauṣītakir vidāṃ cakāra. taṃ ha evaṃ cakruḥ. evaṃ u ha āha* („thus he had commanded to do with his remnants“). *evaṃ āśmarathyaṃ cakruḥ.*

श्मरथ्यं चक्षुस्तस्यो हैवैते अहीना हायनाˇव्युच्छन्ती व्युच्छत्यस्मैˇवस्यसी
वस्यसी व्युच्छतिˇप्रजा हास्य श्रेयसी भवति यमेवं निदधातीति वि-
ज्ञायते ॥ १० ॥

॥ इति द्वितीयः पटलः ॥ २ ॥

---

5 नवम्यां व्युष्टायां यज्ञोपवीत्यन्तरा ग्रामं श्मशानं चाग्निमुपसमा-
धाय संपरिस्तीर्यापरेणाग्निं लोहितं चर्मानडुहं प्राचीनग्रीवमुत्तरलो-
मास्तीर्य तद्दिनसमालिनो ज्ञातीनारोपयत्यारोहतेत्यथैनाननुपूर्वान्प्रक-
ल्पयति यथाहानीतिˇप्रतिलोमकृतया वारख्या स्रुचा द्वे चतुर्गृहीते
जुहोति न हि ते अग्ने तनुवा इतिˇदश च स्रुवाहुतीरप नः शोशु-
10 चदघमितिˇहुत्वा हुत्वा पात्र्यां संपातानवनयत्येवोभयं प्रहरति येन
जुहोत्युत्तरेणाग्निं रोहितोनड्वान्प्राङ्मुखोवस्थितो भवतिˇतं ज्ञातयोन्वा-
रभन्तेनड्वाहमन्वारभामह इतिˇप्राञ्चो गच्छन्तीमे जीवा इतिˇजघन्यो
वेतसशाखयावकाभिश्च पदानि संलोभयन्नेति मृत्योः पदमित्यथैभ्यो-

---

1. So B^1; तस्योहवैदेवा A^1, but the bhāṣya, A^2, seems to point to the same reading as given by B^1, as it says: तस्य पुनर्दहनसंस्कृतशरीरस्यैवैते हायनाः संवत्सरा अहीना भवन्ति सफला भवन्तीति यावत्. The three mss. of Hir. T H H^2 insert between तस्यो and हैवैते the words हैष. Prof. Kern, whom I consulted on this passage, suggested also to take हैष as a dittographia.

2. व्युच्छतीति प्रजा T H^2; without इति H A^1 B^1. Compare TS. II. 1. 10. 3. — एवं H B^1 B^2 A^1; एव T H^2.

6. Between अग्निं and लोहितं H inserts दर्भान्संस्तीर्य.

7. अनुपूर्वं A^1 A^2 B^1 B^2; अनुपूर्वान् the others, also Pi. Sā. and the quot. in Wilson, Sel. Ess. Vol. II. p. 300.

13. संलोभयन्नेति T H^2 H; संलोपयन्नेति B^1 A^1 A^2 Pi. Sā. (comm.: विलोपयन् गत्वा); संतभयन् समूहनं कुर्वन्ननुगच्छति B^2. Baudhāyana

ध्वर्युर्दक्षिणतोऽश्मानं परिधिं दधातीमं जीवेभ्यः परिधिं दधामीति˘ स्त्रीणामञ्जलिषु संपातानवनयतीमा नारीरिति˘ तैर्मुखानि विमृजन्ते˘ यदाञ्जनं त्रैककुदमिति त्रैककुदेनाञ्जनेनाङ्क्ते˘ यदि त्रैककुदं नाधिगच्छेद्येनैव केन चाञ्जनेनाञ्जीरन् ॥ ११ ॥

5 पृथिव्यामोषधिस्तम्बं प्रतिष्ठापयति यथा त्वमुद्भिनत्स्योषध इति˘ प्रत्येत्य गृहानुत्तरपूर्वदेशेऽगारस्याग्निमुपसमाधाय संपरिस्तीर्यानुलोमकृतया वारण्या स्रुचा द्वे चतुर्गृहीते जुहोत्यानन्दाय प्रमोदायेत्येवोभयं प्रहरति येन जुहोत्येवमेतदहः पचन्ति यवोदनं चौजोसीत्यजस्य प्राश्नीयार्द्वेवोसीति यवोदनस्योचासन्दीस्तल्पानित्यधिरोहन्ति˘ नापित-
10 कर्माणि च कारयन्त˘ एष प्रथमोऽलङ्कारः˘ सोयमेवं विहित एवानाहिताग्नेः पात्रचयेष्टकावर्जमौपासनेनानाहिताग्निं दहन्ति˘ निर्मन्थ्येन पत्नीर्मुत्तपनेनेतरानेवैकेषां कुम्भान्तं निधानमनाहिताग्नेः स्त्रियाश्च निवपनान्तं हविर्यज्ञयाजिनः पुनर्दहनान्तं सोमयाजिनश्चयतान्तमग्निचित इति˘ नासंनयतामामिक्षामुत्सर्गो राजगव्या अपशुबन्धयाजिनः स्त्रि-

---

has (28. 8) संलोपयते: त्वलोभयते Wilson l. c. Compare 28. 8 with crit. note.

1. For this passage comp. Āp. śrs. XIV. 22. 3; अध्वर्युः is omitted in A[1].

3. Comp. Āp. śrs. X. 7. 2.

6. पूर्वदेशे T H[2] Pi.Sā.; पूर्वेदेशे H A[1] B[1].

7. So T H H[2] B[1]. Instead of प्रमोदायेति A[1] has नवेतवेति, Pi.Sā.: न वै तवेति द्वाभ्याम्.

8. यवोदनं all, also Baudh.; but compare Hir. XXIX. 7. s. f.

9. आसन्दीं T H; आसन्दीस् A[1] H[2]; आसन्दीस B[1] Pi.Sā. Comp. Baudh. 28. 17. — अधिरोहयन्ते T H H[2]; अधिरोहन्ति B[1] A[1] Pi. Sā.

12. स्त्रियाश्च om. A[1] but comp. A[2]: अत्र केचित्स्त्रियाश्चेत्यपि न पठन्ति.

याश्च˘दहनकल्पेन न कल्पेरन्ननुपेतान्कन्याश्च˘पुनर्दहनमन्त्रेणैव दहेयुः˘
स्त्रियाश्चैवं˘पुंलिङ्गवपनवर्जमित्येक इत्येके ॥ १२ ॥

॥ इति तृतीयः पटलः ॥ ३ ॥

इति हिरण्यकेशिसूत्रे अष्टाविंशः प्रश्नः समाप्तः ॥ २८ ॥

---

5 दिष्टगमनाद्युक्तस्वहःस्वहोरात्रार्धमासमासर्तुषु संवत्सरे वा निद-
धात्येंप्रज्ञाति याथाकामी˘या माघ्याः पौर्णमास्याः फाल्गुन्याश्चैत्र्या
वैशाख्या नैदाघ्या वोपरिष्टादमावास्या तस्यामयुजो युजो वाभीरा-
द्रायोत्तरतो लोष्टानवहृत्य दक्षिणा निर्हरन्ति˘स्थलार्थानिष्टकार्थान्वा˘
पुरस्तादेव श्मशानायतनादोषधीरुद्धारयन्ति पाठापृश्निपर्णीकर्णिकार-
10 राजवृक्षकण्टूकतिल्वकविभीतकार्कशरयवदंष्ट्राध्यण्डा अन्याश्च क्षीरिणीर-

---

4. The colophon in H[2] runs thus: इति हिरण्यकेशिसूत्रे पञ्च-मषट्के चतुर्थः प्रश्नः समाप्तः; in B[1]: इति भारद्वाजपितृमेधिकसूत्रे प्रथमप्रश्नः.

8. Between अवहृत्य and दक्षिणा T and H[2] add तेषु, probably a false reminiscence of XXVIII. 2 (35. 10). Instead of दक्षिणा निर्हरन्ति (T H H[2]), दक्षिणतो हरन्ति is given by B[1] B[2]. — स्थलार्थान् H[2]; the others corrupt. Compare C. 486.

9. उद्धारयति B[1] B[2]; °यंति the others.

10. In the list of the plants not all is equally certain. Instead of °कण्टूक° as given by H[2] and B[2] (here slightly corrupted) T gives only वक, H B[1] omit the word. — Instead of तिल्वक T H[2] B[1] give तिलक, only H: बैल्वक. Baudh. (8. 3), Śat. Br. (XIII. 8. 1. 16) and Kāty. (śrs. XXI. 3. 20) give तिल्वक. — अध्यण्डा is given only by B[2], the others: °द्यंडा T, °ह्यंडा H[2], °त्यंडा H. Compare Śat. Br., Kāty. l. c. and Kauś. sū. 35. 4.

नुत्खेया˘ ऽपराह्णे श्मशानायतनं विमिमीते पञ्च पञ्च प्रक्रमान्त्सर्वतः˘ षट्टुरस्रादित्येके˘ माने परीतान इष्टकोपधान इति दिक्संयोगः सर्वत्र पुरस्तादुपक्रमः प्रसव्यं दक्षिणतोपवर्गस्त्रिवृता मौञ्ज्या बाल्वज्या वा रज्ज्वा प्रसव्यावृत्तया त्रिः प्रसव्यं परितत्यायुग्भिरुदकुम्भैः स्रवोचितम-
5 वोक्ष्य यथा प्राणदुत्सर्पेन्नं प्राणदधि निवपेर्वेदि प्राणदधि निवपेज्जी-
वतां ह तत्प्राणानधि निवपेत्खेर्यां तल्पे वा संभारानोप्य ॥ १ ॥

श्वो भूते पशुना तदर्थमन्नं संस्कृत्य तदमावास्यायां निदधात्यथ यदि पुनर्धविष्यन्तः सुखदगारं तल्पं वा मिन्वन्ति˘ तस्य पूर्वार्धे मध्ये पश्चार्धे वा पालाशीं मेथीं त्रिविषूकां निघ्नन्ति˘ पुरस्तादेव शूद्रो ब्रह्म-
10 बन्धुर्वा संवादितोपविशति˘ या स्त्री मुख्यतमा तामाह˘ वसतिं मया-
साविक्रतीति˘ न ददामीतोतरा प्रत्याहैवं द्वितीये करोत्येकैराचाय

---

1. प्रक्रमान्त्स° T H; प्रक्रामास° H[2], B defect.

4. Instead of प्रसव्यावृत्तयात्रिः (H B[1]), T H[2] give: प्रसव्यया-त्रिवृतात्रिः; B[2]: त्रिगुणयाप(स)व्यावृत्तयात्रिः. Here त्रिगुणया is the bhāṣya for त्रिवृता. Consequently B[2] points also to the reading of H B[1].

6. So emended; प्राणादुत्सर्पे° T H H[2]; प्राणंतत्सर्पे° B[1]; प्रा-णात् प्राणवदित्यर्थः B[2]. Baudhāyana replaces प्राणद् by जीवद्.

7. तदमा° T B[1]; तदहरमा° H and probably also H[2]. With तत् is meant the śmaśāna, as also above 46. 6: जीवतां ह तत्प्रा-णानधि निवपेत्.

8. धविष्य° H[2] B[1] B[2]; धूविष्य° H; हविष्य° T.

9. Instead of शूद्रो H[2] gives शूद्रोत्पन्नो.

10. संवादितोपविशति T H H[2]; सहसंवादिन उपविशति B[1]; संवादिनः . . . उपविशति B[2].

10. 11. So T; तामुवाहवसतिंमयासविक्रंलिति H; तामाह B[1] (the rest of this passage is wanting here); तामाहवसतिमयातिन-ददामीतोतरा H[2] (pr. m.); तामाहवसतिमयासपृक्तिनददामीतीतरा

ददामीति तृतीये˘ यावद्रात्रं वा धविष्यन्तः सुरैंतस्यां वाचि मेध्या
मूले शरीराणि निदधाति शतातृणं च कुम्भं त्रिविपूके˘ तस्य विलं
चर्मणा कुशैः परिणद्धं भवति˘ तस्मिन्दधि वाजिनमिश्रमानयति वैश्वा-
नरे हविरिदं जुहोमीति˘ विचरन्तमभिमन्त्रयते द्रप्सश्चस्कन्देमं समुद्र-
5 मिति द्वाभ्यां˘ चत्वारो ब्रह्मचारिणोऽन्ये वा ब्राह्मणायना दक्षिणान्केश-
पक्षानुद्ग्रथ्य सव्यान्प्रस्रस्य दक्षिणानूरूनाघ्नन्तः त्रिभिरभिधून्वन्तस्त्रिः
प्रसव्यं परियन्त्यजिनमोय्यजिनमोय्यजिनमोयीत्येवममात्याः स्त्रियश्चोत्त-
राभिः त्रिभिर्मन्त्रवर्जं पूर्ववत्परिक्रमणं˘ संप्रवदन्ति वीणाः शङ्खनाडी-
तूणवा नृत्तगीतवादित्राणीति˘ प्रातर्मध्यन्दिनेपराह्ण इत्येवं रात्रिस्त्रिरे-
10 परपक्षस्य तिस्रो रात्रीर्धुवन्ति पञ्च सप्त नवैकादश वार्धमासं मासं
संवत्सरमु हैके धुवन्त्येन्नं च यथाशक्ति देयं˘ तथा द्रव्याण्युत्तम एवाहनि
द्रव्यत्याग इत्येके˘ एतस्मिन्नेवाग्नौ तूष्णीमुपचरितान्पञ्च चरून् श्रपयति˘

H^2 (sec. m.). B^2 gives the following paraphrase: आह त्वया सह शयनं मह्यं देहीति. Comp. C. 81.

2. गूले T H; मूले H^2.

3. कुशैः T H^2 B^1 B^2; कुशैश्च H.

5. ब्राह्मणायना H^2; ब्रह्मणायना B^2; ब्राह्मणास्तपना B^1; ब्राह्मणास्तेवा T H.

7. So T H H^2 but °जिनमोपित्येवम° H^2; अजिनमोयिश्वजिनमौजी इत्येवम° B^2; अजिनमोइ - जिनमो - यो - श्चमात्या° B^1. Comp. Bandh. 20. 12 and C. 513.

8. पूर्ववत्परिक्रमणं om. T B^1; but पूर्ववत् is mentioned in B^2. — Uncertain. वीणाःशंखनालीतूणवदानृत्त° T H^2; वीणावादाःशंखानालीतूणवानृत्त° H; वीणाःशंखभा - - वादनृत्य° B^1.

9. Instead of एवंरात्रिस्त्रिर° (T H^2), H B^2 have: एवंरात्राव°.

9. 10. Instead of अपरपक्षस्य H^2 has: अपिवा.

10. Instead of एकादश, दश is given by T B^1.

12. श्रपयति H^2 H; °र्यंति T B^1.

तेषामभिघारणानि घृतं शृतं क्षीरं दधि मध्वित्यपूपापिधाना भवन्त्य-
परात्रे गच्छन्त्येपिः प्रथमोऽथोदकुम्भोऽनड्वाञ्छरीराणि संभारा इतिˇ
येन चान्येनार्थी भवतिˇन हीनमन्वाहरेयुरन्तरा ग्रामं श्मशानं चैत-
मग्निमिन्धान आस्ते ॥ २ ॥

5 व्युष्टायां हरिण्या पलाशशाखया शमीशाखया वा श्मशानायतनं
संमार्ष्टयपेत वीतेतिˇदक्षिणतः शाखामुदस्यत्याप उपस्पृश्योद्धत्यावोक्ष्य
संवर्तितानि शरीराणीति सीरं युनक्तिˇषड्गवं द्वादशगवं चतुर्विंशति-
गवं वाˇयावद्गवं सीरं तावन्ति शतानीष्टकानामेमा भवन्तीति
विज्ञायतेˇतस्माच्चतुर्विंशतिभागेनेष्टकाः करोति पादेष्टकाश्चˇवारणं
10 काष्ठमयंˇमौञ्जं रज्जुमयंˇवचनादन्यच्छुनं वाहा इति द्वाभ्यां प्रसव्या-
वृत्ताः षड्राचीः सीताः कृषत्युदम्य लाङ्गलंˇसीते वन्दामह इति
सीताः प्रत्यवेक्षतेˇसंवर्तितानि शरीराणीति मध्ये कृष्टस्यास्थिकुम्भं
निदधातिˇविमुचध्वमघ्निया देवयाना इति दक्षिणांसे बलीवर्दान्वि-
मुच्य दक्षिणेनोत्सृज्याध्वर्यवे दद्यादुदपात्रेणोदुम्बरशाखयावोक्षति प्र
15 वाता वान्तीतिˇपात्र्यां सर्वौषधीः संयुत्य वपति यथा यमायेतिˇ
चित स्थ परिचित इत्यपरिमिताभिः शर्कराभिः परिश्रित्याप्यायस्व
समेतु त इति सिकता व्यूहत्युत्तरया त्रिष्टुभा राजन्यस्यˇजगत्या वैश्यस्यˇ

---

1. तेषामभिघारणानि om. T.

2. °रात्रिगच्छ° B[1] B[2]; °रात्रेर्गच्छ° T H[2]; °रात्रे अयुग्मागच्छ° H.

4. Comp. Āp. śrs. V. 8. 4.

6. After अवोक्ष्य, H inserts: हिरण्यशकलमवधाय.

8. शतानीष्टकानामर्धेष्टकानांपादेष्टकानांमानानिभवंतीति H; only H[2] gives the right reading, T and B[1] are defect or corrupted.

10. So H[2]; चवनादन्यान्कु° T; वचनाद्‾कु° B[1]; वचनाद-न्यातःशु° H.

13. दक्षिणांसउत्तरेंसेवा H.

14. दक्षिणेनो° T H H[2]; दक्षिणो° B[1].

विधृतिलोष्टान्प्रतिदिशमनन्वीक्षमाण उपदधात्युत्ते तभ्नोमीत्येतैः प्रति-
मन्त्रं ˘ तिलमिश्राभिर्धानाभिस्त्रिः प्रसव्यं परिकिरत्येणीर्धाना इत्येभि-
र्वान्याथै दुग्धस्यार्धशरावे मन्थस्त्रिः प्रसव्योपमथित आमपात्रस्थस्तं
दक्षिणत उपदधात्येषा ते यमसादन इति ˘ समूलं वर्हिर्दक्षिणा स्तृणा-
5 तीदं पितृभ्यः प्रभरेम वर्हिरिति ˘ पालाशान्परिधीन्परिदधाति मा
त्वा वृक्षाविति पूर्वापरावुत्तरया दक्षिणोत्तरौ ˘ मध्ये नलेषीकां निद-
धाति नलं प्लवमिति ˘ पुराणेन सर्पिषा शरीराणि सुसंतृप्तानि संतृप्यो-
त्तरत आसीनोनन्वीक्षमाणो दर्भेषु निवपति सवितैतानि शरीरा-
णीति ˘ यथालिङ्गमङ्गानि संनिधायोर्थिनमुपतिष्ठते षड्ढोता सूर्यं ते
10 चक्षुरिति ˘ भुक्तभोगेन वाससास्थिकुम्भं निमृज्योपर्युपरि शिरो दक्षिणा
व्युदस्यति परं मृत्यो अनु परेहि पन्थामित्यथास्य कपालानि सुसंभि-
न्नानि संभिनत्ति यथैषूदकं न तिष्ठेद्भुक्तभोगेन वाससा शरीराणि
प्रक्षाल्योदपात्रेणोदुम्बरशाखयावोक्षति शं वात इति ॥ ३ ॥

॥ इति चतुर्थः पटलः ॥ ४ ॥

---

15 इष्टकाः प्रतिदिशमनन्वीक्षमाण उपदधाति पृथिव्यास्त्वा लोके
सादयामीत्येतैः प्रतिमन्त्रं ˘ मध्ये पञ्चमीं ˘ तां दक्षिणेन षष्ठीमेवं चक्ष-

---

3. प्रसव्योपमंथित आमपात्रस्थ९ दक्षि° H²; प्रसव्यमनारभ्योपमं-थितमामपात्रस्थ९ दक्षि° H; प्रसव्योपमथितं आमपात्रमुप्तंदक्षि° T; प्र-सव्येमथितेआमःपात्रेस्थस्तंदक्षि° T. Comp. also T.Ā. p. 695, readings of F and K, and for the whole passage C. 99, Āp. śrs. VIII. 14. 14 (दक्षिणामुखस्त्रिः प्रसव्यमनारभ्योपमन्थति), Hir. Kalpasū. V. 12 (दक्षिणासीनो ऽनारभमाणस्त्रिः प्रसव्यं मन्थमुपमन्थति).

4. दक्षिणायांस्तृणा° H.

10. निमृज्याथिनमुपर्यु° H B². — दक्षिणा T H B¹; दक्षिणतो H².

11. व्युदस्यति H² H; व्यस्यति T B¹.

नपूपवानिति प्रतिमन्त्रमेतैस्तिलाभिर्धानाभिस्त्रिः प्रसव्यं परिकिरत्येतास्ते स्वधा अमृताः करोमीत्योषधिस्तम्बान्प्रतिदिशमनन्वीक्षमाण उपदधाति त्वामर्जुनेति ˘ प्रतिमन्त्रलिङ्गैर्द्रव्यनियमो ˘ लोकं पृणेति लोकंपृणा उपद-धात्युत्तरया पुरीषेणानुविकिरति ˘ श्मशानस्य मात्रा ˘ द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं प्रादेशो वितस्तिर्जानुदघ्नमूरुदघ्नं स्फिग्दघ्नं वैषोत्तमा मात्रा श्मशानस्योत्तमां मात्रां नाध्याप्नुयाद्यावतीं पुरस्तात्ततोनन्तरं पश्चादपि वा द्व्यङ्गुलं पुरस्तात्समंभूमिं पश्चादित्येके ˘ उदपात्रेणोदुम्बरशाखयावो-क्षति शं वात इत्यारोहणं जपत्यवरोहणं जपत्युपस्थानेनोपतिष्ठत इदमेव मेतोपरामार्तिमाराम काष्ठेनेति ˘ वारणशाखां पुरस्तान्निदधाति वरणो वारयादिति ˘ विधृतिलोष्टमुत्तरतो विधृतिरसीति ˘ शमीशाखां पश्चा-च्छमि शमयेति ˘ यवं दक्षिणतो यव यवयेत्येनमुपतिष्ठते पृथिवीं गच्छान्तरिक्षं गच्छेति ˘ जघनेन चितिं कर्ष्वादि समानमा स्नानान्मृदा स्नातीत्येके ॥ ४ ॥

॥ इति पञ्चमः पटलः ॥ ५ ॥

यमयज्ञं स्वयंप्रोक्तं प्रवक्ष्ये बलिमुत्तमम् ।
मासि मासि तु कर्तव्योन्तकाय बलिस्तथा ॥
मेधाकामोर्थकामो वा पुत्रकामस्तु वै द्विजः ।
याम्येहनि सनक्षत्रे सर्वान्कामान्समश्नुते ॥
संवत्सरस्य कार्त्तिक्यां बलिं कुर्वीत यत्नतः ।
अकुर्वन्यस्तु कार्त्तिक्यां नरके स निमज्जति ॥

---

1. °मंत्रमतिलाभिर् H; °मंत्रंमनिवाभिर् B[1]; °मंत्रंतिलमिश्रा-भिर् TH[2].

5. ऊरुदघ्नं om. T; स्फिकदघ्नं T; स्फिक्दघ्नं HB[1]; स्फिदघ्नं H[2].

6. यावतीं TH[2]; यावंती H; यावती B[1].

18. सनक्षत्रे THH[2] Baudh.; सुन° B[1].

तस्मात्कुर्वीत कार्त्तिक्यां स्वर्गकामस्तु वै द्विजः ।
तिलप्रस्थस्य कर्तव्यं गुडमिश्रं तथा हविः ॥
एकेन तु न कर्तव्यः कर्तव्यो बहुभिः सह ।

हविष्कृत्याभिमन्त्र्य हविरादाय नमो ब्रह्मणे प्रजापतये देवेभ्य
5 ऋषिभ्यः पितृभ्यो यमायेत्युक्त्वा ग्रामात्प्राचीं वोदीचीं वा दिशमुपनि-
ष्क्रम्यानिरिणवद्देशे नदीतीरे समे वान्यस्मिञ्छुचौ देशे तस्य दिक्स्वस्ति
वेदिं करोति तस्यामुत्तरवेद्यां पश्चोत्तरवेद्यो दिक्स्वस्त्यो भवन्ति दक्षि-
णेन करकूपं खात्वोत्तरेणाग्निं प्रतिष्ठाप्य दर्भैः सोत्तरवेदिं संप्रच्छाद-
यति प्रागग्रैर्दर्भैर्विष्टरं निधाय प्रस्तरं चायातु देवः सुमनाभिरूतिभि-
10 र्यमो ह वेह प्रयताभिरक्ता । आसीदतां सुप्रयते ह बर्हिष्यूर्जाय जातै
मम शत्रुहत्योमिति यममावाह्य यमे इव यतमाने यदैतमिति चेमं
यम प्रस्तरमा हि सीदेति त्रिभिः प्रस्तरमभिमन्त्र्य सपवित्राख्यर्घ्यंस्ना-
नपाद्याचमनीयोदकानि दत्त्वा सार्वसुरभि गन्धपुष्पधूपदीपमाल्यं च
यथोपलब्धं ददाति कृष्णाः प्रतिसराः कृष्णसूत्रं च मध्यमेनान्तेन वा
15 पलाशपर्णेन जुहोति यमाय स्वाहान्तकाय स्वाहा धर्माय स्वाहान्ताय
स्वाहानन्ताय स्वाहा वैवस्वताय स्वाहा कालाय स्वाहा मृत्यवे स्वाहा
विष्णवे स्वाहा भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः
स्वाहेति ॥ ५ ॥

---

9. प्रागग्रैश्चदर्भैर् B[1].

11. यदैतम॰ T H H[2] Baudh.; यद्देतम॰ B[1] and T.Ā. VI. 5. 2.

12. त्रिभिः T H H[2]; तिसृभिः B[1], Baudh. — सपवित्राख्य॰ B[1]; सवित्राख्य॰ H; पवित्रपाणिर॰ T H[2] Baudh. — सार्वसुरभिर्गं॰ T H H[2]; सर्व--गं॰ B[1].

15. After धर्माय स्वाहा H and B[1] add: (ऽ)धर्माय स्वाहा, after विष्णवे स्वाहा, H has: बृहस्पतये स्वाहा.

16. कालाय स्वा॰ om. B[1].

व्याहृतिपर्यन्तं हविर्जुहोत्यथार्कपर्णान्यौदुम्बरपर्णानि वा निधाय मध्यमस्यामुत्तरवेद्यां यमाय हविर्निवेदयन्ते यमाय सोमं सुनुत यमाय जुहुता हविः । यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतोमिति ˇप्रतीच्यामुत्तरवेद्यां यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत । स नो देवेष्वा य-
5 मद्दीर्घमायुः प्रजीवसोमिति ˇप्राच्यामुत्तरवेद्यां यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन । इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्योमिति ˇदक्षिणस्यामुत्तरवेद्यां श्वभ्यां हविर्निवेदयन्ते यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसा । ताभ्यां राजन्परिदेह्येनं स्वस्ति चास्मा अनमीवं च धेह्योमित्युत्तरस्यामुत्तरवेद्यां यमदूताभ्यां हविर्नि-
10 वेदयन्त उरूणसावसुतृपावुलुम्बलौ यमस्य दूतौ चरतो वशाꣳ अनु । तावस्मभ्यं दृशये सूर्याय पुनर्दत्तावसुमद्येह भद्रमोमिति ˇयोऽस्य कौष्ठ्येति तिसृभिर्यमगाथाभिस्त्रिः प्रदक्षिणं परिगायन्ति ˇदक्षिणेन करकूपं गत्वा प्राचीनावीतं कृत्वा सव्यं जान्वाच्य हविरादाय मिषन्निमिषद्भ्यः स्वधा नम इति पिण्डान्ददाति ˇत्रीनुदकाञ्जलीनुपनिनीयातम्य प्राणान्सप्त-
15 व्याहृतिभिः सप्त पदानि प्राञ्चो गच्छन्ति ˇत्रीन्हि स्वर्गलोकानारूढा भवन्तीति विज्ञायते ˇदधिक्राव्णो अकारिषमिति पुनः प्राणानाप्याय्य

---

2. **मध्यमस्यामु॰** T H H^2; **॰मायामु॰** B^1 Baudh. — **॰यन्ते** H; Baudh. has also the plural, comp. T. Ā. p. 678; **॰यते** B^1 H^2.

7. Plur. verbi T H^2.

13. Thus T H H^2 (pr. m.); **मिषन्निमिषन्स्वधा पितृभ्य इति** B^1 B^2 Baudh. H^2 (sec. m., but with **निमिषन्**).

14. Thus T; **॰निनीयातस्य** H; **॰निनीयतस्य** B^1; **अतम्य** B^2; **आचम्य** (!) Baudh.

15. Thus T H^2; **त्रीर्हि॰** H; **त्रिभिःस्वर्गलोकमारूढ** B^1; **सप्तलोकानवलोक्य** Baudh.

16. Thus T H H^2; **आयम्य** B^1 Baudh.

यथेतं प्रत्येत्य नमस्कारः कूपेभ्यो नमस्कारः कूपेभ्यो नमस्कारः कूपेभ्य
इति करकूपमुपस्थाय यस्मै कामाय यममभिवादयन्ते यमो दधारे-
त्यनुवाकशेषेण हविरुद्धरन्ति नाके सुपर्णमिति प्रवाहयन्त्युरुं हि राजा
वरुणश्चकारेत्यनुवाकेनापोवगाहयन्त्यापोहिष्ठीयाभिर्मार्जयन्ते यमेन दत्तं
5 त्रित एनमायुनगिति चतसृभिरादित्यमुपस्थाय प्रतिसरमाबध्नीत ह-
विषा सर्वप्रायश्चित्तानि हुत्वाच हविःशेषान्भक्षयन्ति भक्षोस्यमृतभक्ष
इति भक्षस्य शेषं नयन्ति पुत्राय प्रियाय प्रियवादिने पुत्रभार्यायै
पुत्रवान्भवति पुत्रवती भवतीति वैवस्वतोऽब्रवीद्यमो ह यष्टारमितः
प्रयातमङ्के समाधाय पितेव पुत्रम् । सुहृन्नतिं गमयति तत्रलोकान्नि-
10 वर्तते चास्य छिनत्ति पन्थानं निवर्तते चास्य छिनत्ति पन्थानमिति ॥ ६ ॥

॥ इति षष्ठः पटलः ॥ ६ ॥

---

1. Uncertain reading. नमस्कारकूपेभ्यो thrice B^1; नमस्करकूपेभ्यो thrice H; नमस्कारकूपेभ्यस्करकूपेभ्योनमस्करकूपेभ्य T H^2; नमोनमस्कारकूपेभ्यो twice Baudh.

2. B^2: यस्मै यस्मै कामायेष्टिसिद्धये यममभिवादयंत अभिमुखास्तुवंति (?) तं कामं प्राप्नुवन्तीति सामार्थ्याद्वाक्यशेषः.

4. Thus B^2; आपोहिष्ठाभिर् B^1; आपोहिष्याभिर् T H; आपोहिष्ठामीति H^2.

5. TS. IV. 6. 7. 1.

6. The whole mantra is according to Baudh.: भक्षोस्यमृतभक्षस्य ते मृत्युपीतस्या (sic) मृतवतः स्वगाक्षतस्य (sic) मधुमत उपहूतस्यो- (v. l. °हूतस्यो)पहूतस्योपहूतो भक्षामि.

9. Instead of °मंके (B^1 B^2 Baudh.), T H H^2 give °मेके. — सुहृन्नतिं T H H^2 Baudh. Probably सुकृन्नतिं is to be read, with B^2.

10. चास्य T H^2 B^1 B^2; नास्य H; नचास्य Baudh. The passage beginning with यमो ह runs in Baudh. as follows: यमो ह यष्टारमिति ग्रत (v. l. ग्रंतं) प्रयांतमंके समाधाय पितेव पुत्रं सुहृन्नकंती न चास्य भिनत्ति पंथानं न चास्य भिनत्ति पंथानमिति स्माह बौधायनः.

अथात उत्तरं पितृमेधं व्याख्यास्यामो यं ब्रह्ममेध इत्याचक्षतेऽथा-
प्युदाहरन्ति

द्विजातीनामपवर्गो ऽर्थतस्तत्त्वदर्शिभिः ।
ऋषिभिस्तपसो योगाद्दृष्टिस्तु पुरुषोत्तमम् ॥
5 होतॄंश्च पितृमेधं च संसृज्य विधिरुत्तरः ।
विहितस्तु समासेन क्रतूनामुत्तमः क्रतुर् ॥

इति ˘ तस्य सग्रहैर्होतृभिर्होमो ˘ भर्तृसूक्तेन भरणं ˘ पत्नीभिरुपसंवे-
शनं ˘ दक्षिणाप्रतिग्रहैर्निर्मार्गो ˘ हृदयैर्हिरण्यशकलान्संभारयजुर्भिः पात्र-
चयनं ˘ ज्योतिष्मतीभिरुपोषणं ˘ नारायणाभ्यामुपस्थानं ˘ ब्राह्मण एकहो-
10 तेति चानुमन्त्रणं ˘ चित्तं सन्तानेनेति हविराहुतिः ˘ प्रयासाय स्वाहेति
स्रुवाहुतीर्मृत्युसूक्तेनानुशंसनं ˘ सौम्या संगाहनं ˘ सौर्येणादित्योपस्थानेमी-

---

Probably the words formed originally a triṣṭubh, with the Vaidic accusative पन्थाम् instead of पन्थानम्. As to छिनत्ति compare B[2]: पंथानं छित्त्वा विघ्नान्विनाशयित्वा पंथानं दर्शयति. The meaning seems to be: „Him, who has sacrificed, Yama takes, wenn he is gone forth from here (from the world of the living), as a father his son, on his lap; he brings him along the path of the Virtuous, and if he will (temporarily) return from yonder world (the reign of Yama), he cuts a path for him". निवर्तते refers to the genitive अस्य.

1. A opens this chapter as follows: अथातो ब्रह्ममेधं व्याख्यास्यामः । अथाप्युदाहरन्ति होतॄंश्च पितृमेधं च, omitting the first śloka.

3. विजातीनां द्विजातीनाम° T H; द्विजातीनां विजातीनां H[2]. — I have reconstructed the śloka. °वर्गोर्थतस् T H H[2]; °वर्गोव्यर्थतस् B[1]; वर्गोह्यर्थतस् Pi.Sa. — तत्त्वज्ञदर्शि° T H; तत्त्वदर्शि° the others.

5. उत्तमः only H instead of उत्तरः.

11. With स्रुवाहुतीः the Tanjore copy of Āpast. breaks off.

युष्ट इत्यवगाहनंˇसमानमत ऊर्ध्वं पैतृमेधिकर्मा यवोदनप्राशनात्तॉन्परं
ब्रह्मेत्याचक्षतेˇतान्न साधारणे श्मशाने प्रयुञ्जीत नानाचार्यायˇद्विजा-
तीनामेवˇसंतिष्ठते ब्रह्ममेधः ॥ ७ ॥

॥ इति सप्तमः पटलः ॥ ७ ॥

---

5 अथाजस्राणांˇद्व्यहं त्र्यहं षडहं द्वादशाहं वा धारयतिˇयावद्वा
संशयं मन्येतॉसंशयेजस्रैर्विरम्यामय आयुष्मते पुरोडाशमष्टाकपालं नि-
र्वपेत्कृतकृष्णलां पञ्चहविषं वाˇयो ज्योगामयावीत्युक्तं पुरस्तादॉयुष्मत्या
पाथिकृत्या वा यजेतˇग्रामेष्वेके पाथिकृतीं समामनन्तिˇबहिःष्ठो वा-
नप्रस्थो वारण्यमवतिष्ठेतˇग्रामं वा प्रविशेद्ब्राह्मणानुमतो ब्राह्मणैश्च सह
10 वनधान्येनॉपि वा नाजस्रान्कुर्वीतˇप्राग्दिष्टगमनाद्विहारं साधयेत्प्रेतॅपि
विहरणमेके समामनन्तिˇतदनर्धुकं प्रजाया इति विज्ञायतˇउदगयने
प्रमीताः सौर्येण पथा देवलोकं यान्तिˇदक्षिणायने सौम्येन पितृलो-

---

1. यवोदन° B[1], Brahmamedhaprayoga, Pi. Sā., T.Ā. p. 363; यवौदन° T H H[2] B[2]; comp. Hir. p. 44, l. 8 and Winternitz, Hochzeitsrituell p. 15. — तान् (sc. होतॄन्) before परं om. T H[2], T.Ā. p. 363, found in the others; तानेतान्परं H and Baudh. gṛhs. II. 15 s. f.

2. तानसाधारणे H; तान्नसाधारणे the others and Pi. Sā.

3. Instead of ब्रह्ममेध (B[1] B[2]) the others have पितृमेधः. Comp. also T. Ā. p. 363. — एव H[2], brahm. pr., B[1]; एवं T H F.Ā.

7. °कृष्णलां H H[2] B[1], quot. Gop.; °कृष्णालां T. — आयुष्मत्यया B[1], आयुष्मत्याः the others.

8. पथिकृत्या T H H[2]; पाथि° B[1] B[2]. — बहिष्ठो all.

9. °तिष्ठेत्ग्रा° T; °तिष्ठेतग्रा° H B[1]; °तष्ठेद्ग्रा° H[2]; °तिष्ठते B[2].

9. 10. सहवनधान्येन T H H[2]; संनहनंधान्येन B[1]; सहैववनधान्येन B[2].

12. प्रमीताः and यांति T H[2] B[1]; प्रमीतः and याति H B[2] (गच्छति).

कमिति विज्ञायत ˇ उदगयन आपूर्यमाणपक्षे दिवा ऋलन्ते श्रेयो
मरणमित्युपदिशन्ति ˇ यदि पूर्वपक्षे रात्रौ मरणं शङ्केत सायमाहुतिं
हुत्वा तदैव प्रातराहुतिं जुहुयादेवमपरपक्षे सायंप्रातराहुतिभिरेनं
पूर्वपक्षं नयेद्दर्शं च कुर्यादिष्टिविभवे प्रधानदेवताभ्यश्चतुर्गृहीतान्याज्या-
5 न्येकैकस्यै देवतायै पुरोनुवाक्यामनूच्य याज्यया जुहुयादेवं सर्वास्वा-
पत्स्वेव यदीष्ट्यपनयनमध्येवशिष्टेष्टिप्रधानदेवताभ्यश्चतुर्गृहीतान्याज्यान्ये-
कैकस्यै देवतायै पुरोनुवाक्यामनूच्य याज्यया जुहुयात् ॥ ८ ॥

अथ यदि चातुर्मास्यमध्ये पूर्ववदेव सायंप्रातराहुतिभिर्दर्शपूर्णमा-
साभ्यां चेष्टावशिष्टपर्वाण्यानीय समापयेत्पश्वविभवे तद्दैवतं पुरोडाश-
10 मामिक्षां पूर्णाहुतिं वा कुर्यान्म्रियमाणस्यैवं न यज्ञलोपो भवतीति
विज्ञायत ˇ उक्तं दीक्षितप्रमीतप्रायश्चित्तं ˇ यायावरा ह वै पुरा नाम
ऋषय आसंस्तेष्वन्यश्चाम्यंस्तेऽर्धमासायार्धमासायाग्निहोत्रमजुहवुस्तस्माद्या-
यावरधर्मेणामयाव्यार्तोऽध्वन्यापत्सु वार्धमासायार्धमासायाग्निहोत्रं जुहु-
यात्प्रतिपदि सायं चतुर्दश चतुर्गृहीतान्युन्नयत्येका समित्सकृद्धोमः ˇ
15 सकृत्पाणिनिमार्जनं ˇ सकृदुपस्थानमेवं प्रातरेतावान्विकारः ˇ शेषं प्रकृति-
वत्पक्षत्रये पुनराधेयमग्नीन्समारोपयते धारयते वौपवसथादौपवस-

---

2. **पूर्वपक्षे** only B[1], **°पक्ष°** the others.

3. **°ाहुतीरेनं** H[2] H; **°ाहुतिरेनं** T; **°ाहुतिभिरेनं** B[1].

4. **नयेद्** T H[2] B[2]; **नयेयुर्** H B[1].

8. **आहुतीभिर्** T H B[1]; **°तिभिर्** H[2]. Compare Kirste, The Gṛhyasūtra of Hir. preface, p. VIII.

11. This passage is quoted by Rudradatta on Āpast. śrs. VI. 29. 1.

14. **उन्नयंत्ये°** H[2] H; **उन्नयत्ये°** H B[1].

16. **धारयतेचौपवस°** T H[2]; **धारयतेवौपवस°** H B[1]; **धारय-तेवा** B[2].

ष्येहनि निर्मथ्योपवसथादि कर्म प्रतिपद्यते˘यदि समारूढो भवति यथा-
हिताग्निरुत्सृष्टाग्निर्विच्छिन्नाग्निर्विधुराग्निर्वा प्रमीयेत न तमन्येन चेता-
ग्निभ्यो दहन्तीति विज्ञायते चाधानप्रभृति यजमान एवाग्नयो भवन्ती-
त्यथापि ब्राह्मणं˘तमसो वा एष तमः प्रविशति सह तेन यमाहिता-
5 ग्निमन्येन चेताग्निभ्यो दहन्ति˘तस्य प्राचीनावीत्यग्न्यायतनान्युद्धत्यावोक्ष्य
यजमानायतने प्रेतं निधाय गार्हपत्यायतनेरणी संनिधाय मन्थति
येस्याग्नयोजुह्वतो मांसकामाः संकल्पयन्ते यजमानमांसम् । जानन्तु
ते हविषि सादिताय स्वर्गं लोकमिमं प्रेतं नयन्त्विति˘तूष्णीं विहृत्य
द्वादशगृहीतेन स्रुचं पूरयित्वा तूष्णीं हुत्वा प्रेतमात्वा इत्येतदादि
10 कर्म प्रतिपद्यते ॥ ९ ॥

यद्यात्मन्नरण्योर्वा समारूढेष्वग्निषु यजमानो म्रियेत पूर्ववदग्न्या-
यतनानि कल्पयित्वा गार्हपत्यायतने लौकिकमग्निमुपसमाधाय प्रेतस्य
दक्षिणं पाणिमभिसमाधाय तत्पुत्रो भ्राता वान्यो वा प्रत्यासन्नबन्धु-

---

1. निर्मथ्योपवसथादिप्रतिपद्यते T H[2]; निर्मथ्योपवसथादिकं कर्म प्रति° H B[1]; --थ्योपवसथादि B[2]. — Between भव and तियथा°, H inserts यद्याहिताग्निरध्यानं . . . संपद्येरन् (XXIX. 11, p. 59, l. 3—6).

2. प्रमीयेत H[2] B[1]; प्रमीयते T H.

3. The passage चाधानप्रभृति . . . भवन्तीत्य् is wanting in B[1].

3. 4. भवन्तीत्यपि ब्राह्मणं H[2].

6. °रणी संनिधाय T H[2]; °रणीसंधाय H; °रणींनिधाय B[1].

7. येऽस्याग्नयो T H; यस्याग्नयो B[1] B[2] H[2]; येस्याग्नयो quot. Gop. It seems more probable that येस्याग्नयो was corrupted into यस्याग्नयो than यस्याग्नयो into येस्या°; योस्याग्निर् is also the beginning of this mantra, as given ऊहेन by Gautama (pi. sū. I. 1. 27). Baudh. (II praśna) reads यस्याग्नयो and संजायन्तु, but a Baudh. paddhati येस्याग्नयो and जानन्तु.

रुपावरोहेत्युपावरोहयत्येँपिवोपावरोह जातवेद इमं तं स्वर्गाय लो-
काय नय प्रजानन्नायुः प्रजां रयिमस्मासु धेह्यजस्रो दीदिहि नो दुरोण
इति लौकिकेग्नावुपावरोहयत्येँरण्योर्वोपावरोह्य मन्थेदेँदरण्योः समा-
रूढः स्वाग्निर्वर्तमाने प्रेतमन्वारम्भयित्वेतं मन्त्रं जपेद्विंहरणादि समा-
5 नमाहिताग्निं जने प्रमीतमुपसंश्रुत्याग्नये पथिकृते पुरोडाशमष्टाकपालं
निर्वपेद्दोमिचां पूर्णाहुतिं वा कुर्यात्प्राचीनावीती जुहोतीत्येकˇएत-
स्मिन्नेव विहारे पैतृमेधिकं कर्म प्रतिपद्यतेˇतस्मिन्नहनि शरीराण्याह-
रन्तिˇयद्यन्यस्मिंस्तस्याभिवान्यवत्सायाः पयसाग्निहोत्रमित्युक्तमाहिताग्निं
जने प्रमीतं तैलद्रोण्यामवधाय शकटेनाहरन्तिˇनिर्मन्थ्येन वा दग्ध्वा
10 कृष्णाजिनेस्थीन्युपनह्यति वाहतेन वाससा संवेष्ट्य दीर्घवंशे प्रबध्य नाधो
निदधानाः प्रयता मृन्मयभोजना आहरन्ति ॥ १० ॥

तानि ग्राममर्यादायां प्रतिष्ठाप्याग्नीन्पैतृमेधिकभाण्डं च निर्हरन्तिˇ

---

1. The mantra is a variation on Āp. śrs. VI. 28. 12. According to Baudh. it finishes thus: धेहि प्रेताहुतिं चास्य जुषस्व स्वाहा.

3. Comp. Āp. śrs. VI. 28. 14.

4. 5. After समानं B[1] has: प्रवासमरणे संग्रामे वा हते वा श-रीरमादाय विधिना दाहयेत्.

8. °वत्सायाः T H H[2]; °वत्सायै B[1] B[2], Āp. śrs. IX. 11. 5. — उक्तं, namely Hir. Kalpasūtra XV. 12, Bhār. Kalpasūtra VIII. 14, Āp. śrs. l. c. — Before आहिताग्निं, T H and H[2] insert यम्; it is omitted in B[1] B[2], quot. Gop., quot. Rudr. ad Āp. śrs. IX. 11. 12.

10. उपनह्यतिवाहतेन H[2]; उपसंनह्यतिवा ग्रहतेन H and T (but here उपन°). उपनह्यनिधाय ॥ वाहतेन B[1]. Probably we ought to read with a quotation by Gopāla and a quot. by Rudradatta उपनह्याहतेन. — °बध्यनाधो° T; the others, also two quotations, have °बध्यानधो.

11. °भोजना T H H[2], Baudh. pi. sū. II., quot. Rudr.; °भोजिनः B[1], quot. Gop.

12. पैतृमेधिकभांडंच T H H[2]; पैतृमेधिकंचभांडं B[1].

नासति यजमाने ग्राममर्यादामग्नीनतिहरेयुर्यद्यतिहरेयुर्लौकिका संप-
द्येरन्निति विज्ञायते च प्रवसन्यजमानोऽग्निभ्यः परिदाय गृहानिति˘यदि
सीमान्तरे पत्न्यभिनिम्रोचेदभ्युदियाद्वा लौकिकाः संपद्येरन्यद्याहिताग्नि-
रध्वानं गच्छेत्सहाग्निचयेण पार्श्वतोऽग्निहोत्रेणानुव्रजेद्दाहिताग्निरन्तरं न
5 व्यवेयाद्यावत्यो ग्राममर्यादा नद्यश्च तावतीरतिक्रामन्तमन्वारभेयातां˘
यदि नान्वारभेयातामग्नयो लौकिकाः संपद्येरन्तस्माद्ग्राममर्यादां ना-
तिहरन्ति˘शरीरैरग्नीन्त्समानीय दहनवदवकाशं जोषयित्वा प्रेतमात्वा
इत्येतदादि कर्म प्रतिपद्यते˘तयोर्यः पूर्वो म्रियेत यजमानः पत्नी वा
तस्याग्निचेतायां पितृमेधः संपद्यते˘यः पश्चात्तस्यौपासनेन˘सहैव प्रमीते
10 सहैव पितृमेधो˘दारकर्माणि यथाशक्त आत्मार्थमग्न्याधेयं कुर्याद्दर्श-
पूर्णमासाग्रयणार्थं च˘शेषाणि कर्माणि न भवन्ति˘यद्याहिताग्निः पशुभ्यो
म्रियेता गावो अग्मन्निति द्वे चतुर्गृहीते जुहुयाद्यद्याहिताग्निरशनिहतो
म्रियेत तस्य प्रायश्चित्तं मूर्धानं दिवो अरतिं पृथिव्या इति चतुर्गृहीतं

---

3. **सीमान्तरे** T H² B¹; **सीमान्ते** H. — Thus T H H²; **पत्नीम-
भितोनिम्रोचेद्** B¹. The text seems to be spoiled.

3. 4. From **यद्याहिताग्निर॰** on, there is some confusion in the arrangement of the contents. The above given is the text of T and H².

4. **अनुव्रजेदाहिताग्निरंतरं** T H²; **अनुद्रवेयुराहिताग्निरंतरं** H; **आद्यं अनुव्रजेदाहिताग्निरंतरं** B¹.

5. Thus T H²; between **अन्वारभेयातां** and **यदि** H inserts: **तयोर्वा.**

5. 6. **तावतीरभिक्रामंनन्वारभेतान्वारंभणेलौकिका भवंति** B¹.

9. **चेतायां** T H H² B¹ and a quotation by Gopālayajvan.

10. **॰धेयं वा कुर्याद्** H².

11. **च** T H H² (sec. m.); B¹ om.

12. Here and furtheron after **म्रियेत** B¹ and Pi.Sā. insert every time **तस्य प्रायश्चित्तं.**

जुहुयाद्यद्याहिताग्निरप्सु म्रियेतेमं मे वरुण तत्त्वा यामीति द्वे चतुर्गृ-
हीते जुहुयाद्यद्याहिताग्निर्विषदृष्टो म्रियेत नमो अस्तु सर्पेभ्य इति
तिसृभिश्चतुर्गृहीतैर्जुहुयाद्यद्याहिताग्निर्दंष्ट्रिभ्यो म्रियेत दंष्ट्राभ्यां मलिम्लू-
निति द्वे चतुर्गृहीतेन जुहुयाद्यद्याहिताग्निः प्रोषितः प्रमीतो न प्रज्ञायेत
5 यां दिशमभि प्रस्थितः स्यात्तामस्याग्निभिः कक्षं दहेयुरपि वा त्रीणि
षष्टिशतानि पलाशवृन्तानां तैः कृष्णाजिने पुरुषाकृतिं कृत्वा तामस्या-
ग्निभिर्दहेयुरिति विज्ञायतेˇपलाशवल्कैः कुशैर्वा सन्धिषु संवेष्ट्य चत्वा-
रिंशता शिरः प्रकल्पयतेˇदशभिर्ग्रीवांˇविंशत्योरस्त्रिंशतोदरंˇपञ्चाश-
तापञ्चाशतैकैकं बाहुंˇताभ्यामेव पञ्चभिःपञ्चभिरङ्गुलीरुपकल्पयतेˇसप्त-
10 त्यासप्तत्यैकैकं पादंˇताभ्यामेव पञ्चभिःपञ्चभिरङ्गुलीरुपकल्पयतेऽष्टाभिः
शिश्नंˇद्वादशभिर्वृषणौˇस्नापयित्वालङ्कृत्यान्तर्वेदि कृष्णाजिनं दक्षिणाग्री-
वमधरलोमास्तीर्य तस्मिन्नेनमुत्तानं निपात्य पत्तोदशेनाहतेन वाससा
प्रच्छाद्य बान्धवाः पर्युपविशन्त्ययमस्यासौ यस्य त इमे अग्नय इतिˇ
प्रेतमात्मा इत्येतदादि कर्म प्रतिपद्यतेˇयदि तानि न विन्देरन्नवानां

---

2. विषदोष्टो T H H²; विषयदृष्टो B¹; विषहतो Pi.Sā.

3. चतुर्गृहीतैर् H T H²; ॰गृहीता B¹; ॰गृहीतेनाज्येन Pi.Sā.

4. चतुर्गृहीतेन T H H² Pi.Sā.; ॰गृहीते B¹. — After जुहुयाद् Pi.Sā. has एतदेवास्य प्रायश्चित्तं भवतीति विज्ञायते. With यद्याहि॰ प्रोषि॰ प्रमी॰, B¹ begins a new (the 12th) chapter. — Comp. Āp. śrs. IX. 11. 22, 23.

6. 7. Instead of कृत्वा ... इति विज्ञायते, B¹, Āpast. l. c. and Pi.Sā. give only कुर्वन्ति.

8. पञ्चाशता once B¹ T; twice H H², Āp. l. c., quot. Gop.

13. अयमस्यासीयस्यतइमेअग्नय T H H², Āp. l. c.; अयमस्यसोय-मस्यसस्यतइमेअग्नय B¹; अयमस्यसौयस्यइमेअग्नय quot. by Gop.

